M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 623

Title: Vyavahara Mayukha

623

व्यवहार मयूख:

Vyavahāra Mayookha	Title
Nilkantha Bhatta	Author
	Editor
	Year, Vols.
	Publisher
623	Remarks

॥श्रीगणेशायनमः॥ ॥श्रीसवित्रेनमः॥ उत्स्कान्नृपनयरीतिं नत्वा नास्वत्पदांबुजं सम्यक् । विरचयति नि
लकंठो व्यवहारविनिर्णयोक्तिं किंचित्॥१॥ द्विजराजैकमूर्द्धन्यद्वपा ध्वज्ञशिवान्वितम्। काश्यपा सर्वोपदेष्टारं ना
वयेशंकरं गुरुं॥२॥ विरोधिमार्गद्वयदर्शनार्थं द्वैधावभूवात्र परः पुमान्यः। श्रीशंकरो नद्दइहैकरूपो मी
मांसकाद्वैतमुरीचकार॥३॥ व्रतारकैरादृतमत्रकिंचिन्मयानुनिर्मूलतयातदुज्झितम्। उनोक्तिता नेन हि
तेन काचिद्वपुष्पहीनापचितिर्नहीयते॥४॥ विप्रतिपद्यमाननरांतरगता ज्ञाताधर्मज्ञापनानुकूलो
व्यापारो व्यवहारः। वादिप्रतिवादिकर्तृकः संभवे भोगसाक्षिप्रमाणविरोधिकोटिव्यवस्थापनानुकू
लेवाव्यापारः स। संप्रतिपत्फनरेतु व्यवहारपदप्रयोगो नास्ति इतिमदनरत्ने। वादवितंडादिव्याहृत्यर्थमुत्त
रत्नं। अर्थतत्पदं। याज्ञवल्क्यः। स्मृत्याचारव्यपेतेन मार्गेण धर्षितः परैः। आवेदयति पञ्राजे व्यवहार रामः
पदं हि तत्। आधर्षितस्तिरस्कृता त्यायनोक्तेः। मनुः। व्यवहारान्दिदृक्षुस्तु ब्राह्मणैः सहप्पा कृतः। तस्या
ष्टादशानोद्दानाहमनुः। तेषामाद्यमृणादानं निक्षेपोऽस्वामिविक्रयः। संभूयवसमुत्थानं दत्तस्यानपक ॥४६२॥

र्म च चेतनस्यैव चादानं संविदश्च व्यतिक्रमः। क्रयविक्रयानुशयो विवादः स्वामिपालयोः। सीमाविवादधर्म
श्च पारुष्ये दंडवाचिके। स्तेयं च साहसं चैव स्त्रीसंग्रहणमेव च। स्त्रीपुंधर्मो विभागश्च द्यूतमाह्वयमेव च।
पदान्यष्टादशैतानि व्यवहारस्थिता विदेति। अनपकर्माप्रदानं। अनुशयः पश्चात्तापः। द्यूतम् प्राणिकरणि
काक्रीडा। प्राणिकरणिका समाह्वयः। अत्र मनुष्य दंडपारुष्याणां साहसभेदत्वेपि पृथङ्निर्देशो गोबलीव
र्दन्यायेन। एतेषां चाष्टादशपदानां स्वरूपमग्रेव्यक्तीकरिष्यते। अथ व्यवहारमातृका। बृहस्पतिः। दुर्ग
मध्ये गृहं कुर्यात् जलवृक्षान्वितं पृथक्। प्राग्दिशि प्राङ्मुखीं तस्य लक्षण्यां कल्पयेत्सभां। सैव च धर्माधि
करणं धर्मशास्त्रविचारेण सारासार विवेचनाय यत्राधिक्रियते स्थाने धर्माधिकरणं हि तदिति कात्यायनो
क्तेः। मनुः। व्यवहारान्दिदृक्षुस्तु ब्राह्मणैः सह पार्थिवः। मंत्रज्ञैर्मंत्रिभिश्चैव विनीतः प्रविशेत्सभां। विनीतवेषा
नरणां पश्येत्कार्याणि कार्यिणां। याज्ञवल्क्यः। व्यवहारान्नृपः पश्येद्विद्वद्भिर्ब्राह्मणैः सह। धर्मशास्त्रानुसा
रेण क्रोधलोभविवर्जितः। नृपः प्रजापालनाधिकृतो यः कश्चित् न क्षत्रिय एव। कात्यायनः। सप्राड्विवाक

व्य.म.

॥२॥ सामात्यः सब्राह्मणः पुरोहितः॥ स सभ्यः प्रेक्षको राजा स्वर्गे तिष्ठति धर्मतः॥ अत्र ब्राह्मणो नियुक्तः॥ सभ्यास्तु नियु
क्ताः॥ तथा चोक्तं॥ नियुक्तो वानियुक्तो वा धर्मज्ञो वक्तुमर्हतीति॥ प्राड्विवाकस्वरूपमाह बृहस्पतिः॥ विवादे पृच्छति
प्रश्नं प्रतिप्रश्नं तथैव च॥ प्रियपूर्वं प्राग्वदति प्राड्विवाकस्ततः स्मृत इति॥ अमात्यस्वरूपमाह व्यासः सर्वशास्त्रा
र्थवेत्तारमलुब्धं न्यायभाषिणं॥ विप्रप्राड्विवाकमायात ममामात्यं स्थापयेद्द्विजमिति॥ अत्र पुनर्द्विजग्रहणं विप्रा
भावे क्षत्रियवैश्ययोरुपादानार्थं॥ तथा च कात्यायनः॥ यत्र विद्वान विप्रस्यात् क्षत्रियं तत्र योजयेत्॥ वैश्यं वा ध
र्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेत् इति॥ सभ्यानाह याज्ञवल्क्यः॥ श्रुताध्ययनसंपन्ना धर्मज्ञाः सत्यवादिनः॥ राज्ञा
सभासदः कार्या रिपौ मित्रे च ये समा इति॥ एतेषां संख्यामाह बृहस्पतिः॥ लोकवेदज्ञधर्मज्ञाः सप्त पंच त्रयोपि वा
यत्रोपविष्टा विप्राः स्युः सा यज्ञसदृशी सभेति॥ शाब्दाभिधानतत्त्वज्ञौ गणनाकुशलौ शुची॥ नानालिपिज्ञौ कर्तव्यौ
राज्ञा गणकलेखकौ॥ शाब्दः शब्दशास्त्रं अभिधानं कोशः॥ कात्यायनः॥ श्रोतारो वणिजस्तत्र कर्तव्या न्यायद
र्शिनः॥ तत्र सन्नायं॥ बृहस्पतिः॥ आकारगोरक्षणे च समाद्यार्थिप्रतिवादिनोः॥ सभ्याधीनः सत्यवादी कर्तव्यस्तु रामः

॥४६३॥

स्वरूपः॥ अयं च शूद्र एव॥ तथा च व्यासः॥ साध्यपालस्तु कर्तव्यो राज्ञा साध्यस्य साधकः॥ क्रमायातो दृ
ढः शूद्रः सभ्यानां च मते स्थित इति॥ याज्ञवल्क्यः॥ अपश्यता कार्यवशाद्व्यवहारान्नृपेण तु॥ सभ्यैः सह नि
योक्तव्यो ब्राह्मणः सर्वधर्मवित्॥ नृपाध्यक्षादीनां कार्यमाह बृहस्पतिः॥ वक्ताध्यक्षो नृपः शास्ता स
भ्याः कार्यपरीक्षकाः॥ गणको गणयेदर्थं लिखेन्न्यायं च लेखकः॥ स एव पूर्वामुखस्तूपविशेद्राजा सभ्यास्तदमु
खाः॥ गणकः पश्चिमास्यस्तु लेखको दक्षिणामुखः॥ राजसनातो निर्णयकर्तमाह याज्ञवल्क्यः॥ नृपेणा
धिकृताः पूगाः श्रेणयोऽथ कुलानि च॥ पूर्वं पूर्वं गुरु ज्ञेयं व्यवहारविधौ नृणां॥ नृपेणाधिकृता प्राड्विवाका
दयः॥ पूगाः नानाकर्मोपजीविनां विजातीयानां समूहाः॥ पूगास्तु नानाकर्मोपजीविनां विजातीयविपरीताः श्रे
णयः॥ कुलानि ज्ञातिसंबंधिबंधूनां समूहाः॥ बृहस्पतिरपि॥ ये वारण्यचरास्तेषामरण्ये करणं भवेत्
सेनायां सैनिकानां तु सार्थेषु वणिजां तथा॥ करणं सभा॥ व्यवहारदर्शने कालमाह कात्यायनः॥ सभ्यास्था
नेषु पूर्वाह्णे कार्यासने निर्णयं नृप॥ कृपाच्छास्त्रप्रणीतेन मार्गेण मित्रकर्यिनः॥ दिवसस्याष्टमं भागं मुक्त्वा

व्य.म. गत्रयं तु यत् । सकालाव्यवहाराणां शास्त्रदृष्टः परः स्मृत इति ॥ छायायामायार्द्धमष्टमो भाग मतउत्तरमावर्त्तना
।।३।। द्वाचीनं भागत्रयं व्युत्पत्ति पं अथाह संवर्त्तः । चतुर्दशी ह्यष्टमा वास्या पौर्णमासी तथाष्टमीमिति पिचास्तु न दृपेत
व्यवहारान्विचक्षण इति । बृहस्पतिः । सर्वाक्षेतामधिष्ठाय द्रामात्यानुजीविभिः । परेषु सुराणां धर्मार्थशा
स्त्राणि शृणुयात्तथा । तासमो । अर्थशास्त्रं नीतिशास्त्रं । धर्मशास्त्रार्थशास्त्रयोर्विप्रतिपत्ताव्याह नारदः । यत्र वि
प्रतिपत्तिः स्यात् धर्मशास्त्रार्थशास्त्रयोः । अर्थशास्त्रोक्तमुत्सृज्य धर्मशास्त्रोक्तमाचरेदिति । धर्मशास्त्रयो
र्विरोधे त्वाह याज्ञवल्क्यः । स्मृत्योर्विरोधे न्यायस्तु बलवान्व्यवहारतः । न्यायमनालोचयतो दोषमाह बृहस्प
तिः । केवलं शास्त्रमाश्रित्य न कर्त्तव्यो हि निर्णयः । युक्तिहीने विचारे तु धर्महानिः प्रजायत इति । देशाचाराद्यप्य
लोचयेदित्याह । बृहस्पतिः । देशजातिकुलानां च ये धर्माः प्राक्प्रवर्त्तिताः । तथैव ते पालनीयाः प्रजाः प्रक्षुभ्य
तेऽन्यथा । जना परक्तिर्भवति बलं कोशश्च नरपतिः ॥ उद्गृह्यते दाक्षिणात्यैर्मातुलस्य सुतो द्विजैः । मध्यदेशे क रामः
र्मकराः शिल्पिनश्च गवाशिनः । मत्स्यादाश्च नराः पूर्वे व्यभिचाररताः स्त्रियः । उत्तरे मद्यपा नार्यः स्पृश्या नृणां ।।४६४।।

ऽरजस्वला । अनेन कर्मणा नैते प्रायश्चित्तदमार्हका इति । पूर्वे प्राच्याः । कचित्सर्वइतिपाठः । सर्वे ब्राह्म
णाद्यः । दमो दंड । यस्य त्वप्रायश्चित्तादिस्मरणं तदेतद्व्यवस्थानुपात देशं परमितिकेचित् । अन्ये तु प्रायश्चि
त्तरूपो यो दम इति व्याचक्षणा दंडाभावमात्रं । अन्ये देशे दंडः प्रायश्चित्तं चेत्याहुः । व्यासः । वणिक्कृषि
शिल्पिषु अन्यतेषु हलभिः गोपजीविषु । अशक्यो निर्णयो ह्यन्यैस्तज्ज्ञैरेव तु कारयेत् । मनुः । आश्रमेषु द्वि
जातीनां कार्ये विवदतां मिथः । न विब्रूयान्नृपो धर्मं चिकीर्षन्हितमात्मन इति । कात्यायनः । काले कार्या
र्थिनं पृच्छेत्प्रणतं पुरतः स्थितं । किं कार्यं का च ते पीडा मा भैषीर्ब्रूहि मानव । केन कस्मिन्कदा कस्मात्पृच्छेदेवं
समागतं । एवं पृष्टः स यद्ब्रूयात्तत्सम्यैर्ब्राह्मणैः सह । विचार्य कार्यं न्याय्यं चेदाह्वानार्थमतः परं । मुद्रां वा
निक्षिपेत्तस्मिन्पुरुषं वा समादिशेत् । नारदः । वक्तव्यार्थे ह्यतिष्ठंतमुत्क्रामंतं च तद्वचः । आसेधयेद्विवा
दार्थी यावदाह्वानदर्शनं । आसेधस्य चातुर्विध्यमाह स एव । स्थानासेधः कालकृतः प्रवासात्कर्मणस्तथा
चतुर्विधः स्यादासेधस्तमासिद्धो न लंघयेत् । आसिद्धस्यासेधातिक्रमे दंडमाह स एव । आसेधयोग्य आसि

स्मृ·म·

॥४॥

दत्तः कामन्नदंडमर्हति क्वचिद्रामेघ्वरेव दंडमाह सएव। यस्त्विंद्रियनिरोधस्य नाशनाद्धिनि। आसेधयेद्विनासेध्योसदं
ड्योनत्वतिक्रमादिति। क्वचिदासेधातिक्रमे दंडाभावमाह नारदः। नदीसंतारदुर्देशोपप्लवादिषु। आसिद्धस्तं परा
सेधमुत्क्रामन्नापराध्नुयादिति। अनासेध्यानासेद्धुर्दंडमाह कात्यायनः। आसेधपस्तनासेधं राज्ञा शास्य
इति स्थितिरिति। अनासेध्यानाह सएव। वृक्षपर्वतवारूढा हस्त्यश्वरथनौस्थिताः। विषमस्थाश्च ते सर्वे
नासेध्याः कार्यसाधकैः। व्याध्यार्ताव्यसनस्थाश्च यजमानास्तथैव च। अकल्पबालस्थविरविषमस्थक्रि
याकुलान्। कार्यातिपातिव्यसनिनृपकार्योद्यताकुलान्। मत्तोन्मत्तप्रमत्तार्त्तभृत्यानासेधयेन्नृपः॥
न हीनपक्षं युवतिं कुले जातां प्रसूतिकां। सर्ववर्णोत्तमां कन्यां ता ज्ञातिप्रभुकाः स्मृता। तदधीनकुटुंबिन्यस्वै
रिण्यो गणिकाश्च याः। निष्कुला याश्च पतितास्तासामासेधनमिष्यते। ज्ञात्वाभियोगं येपि स्युर्वने प्रव्रजिता
दयः। तानप्यासेधयेद्राजा गुरुकार्येष्वकोपयन्। कालं देशं च विज्ञाय कार्याणां च बलाबलं। अकल्या रामः
दीनामपि शनैः शनैरासेधनमप्ययं वार्योरिति क्वचित्। आहूतो नागच्छन्दंड्यः। तथा च बृहस्पतिः। ॥४६५॥

॥ आहूतो यस्तु नागच्छेद्दर्पाद्बंधुबलान्वितः। अभियोगानुरूपेण तस्य दंडं प्रकल्पयेत्। अभियोगमेदेनदं
डमेव्यमाह कात्यायनः। हीनकर्मणि पंचाशन्मध्यमे तु शतावरः। गुरुकार्येषु दंडः स्यान्नित्यं पंचशतावर
इति। आहूतस्यागमे नैयत्कार्यैतदाह पितामहः। सभायाः पुरतः स्थाप्यो निक्षेपो वादिना तथेति। तृतीया
सहार्थे कात्यायनः। ततोभियोक्ताः प्रब्रूयादनियुक्तस्त्वनंतरं। तयोरंते सदस्यास्तु प्राड्विवाकस्ततः प
रं। बृहस्पतिः। अर्हपूर्विकया यावच्छ्रिरप्रस्तपिनीयदा दर्शवर्णानुरूपेण याह्यपीडामवेक्ष्य या। अप्रगल्भजडो
न्मत्तवृद्धस्त्रीबालरोगिणां। पूर्वोत्तरं वदेद्बंधुर्नियुक्तो न्यथवा नरः। नारदः। अर्थिना संनियुक्तो वा प्रत्यर्थिप्रहि
तोपि वा। योपत्यार्थे विवदते तयोर्जयपराजयौ। यत्तु कात्यायनः। यो न भ्राता न च पिता न पुत्रो न नियोगकृत्
परार्थवादी दंड्यः स्याद्व्यवहारेषु विब्रुवन्निति तदनियुक्तपरं। क्वचित्तु निनियनावनेनैवोक्तः। ब्रह्महत्यासु
रापाने स्तेये गुर्वंगनागमे। मनुष्यमारणे स्तेये परदाराभिमर्शने। अभक्ष्यभक्षणे चैव कन्याहरणदूषणे। पा
रुष्ये कूटकरणे नृपद्रोहे तथैव च। प्रतिवादी न दातव्यः कर्ता तु विवदेत्स्वयमिति। अत्र पतिकपति नि

मिनिषेधार्थं तु नक्तेयय हणं । अत्यर्थिनिरुत्थापितेर्थिनः कार्यमाह याज्ञवल्क्यः । प्रत्यर्थिनोग्रतो लेख्यं यथावेदि
तमर्थिना । समामासतदर्द्धाहर्नामजात्यादिचिह्नितं । स्मृत्यंतरे । अर्थवद्धर्मसंयुक्तं परिपूर्णमनाकुलं । सा
ध्यवद्वाचकपदं प्रकृतार्थानुबंधि च । प्रसिद्धमविरुद्धं च निश्चितं साधनक्षमं । संक्षिप्तं लिखितार्थं च देशकाल
विरोधि च । वर्षर्तुमासपक्षाहोवेलादेशप्रदेशवत् । स्थानावसथसाध्यार्थजात्याकारवयोयुतं । साध्यप्रमा
णसंख्यावदात्मप्रत्यर्थिनामवत् । परात्मपूर्वजानेकराजनामभिरंकितं । क्षमालिंगात्मपीडावत्कथितार्
र्त्तदायकं यादावेदपते राज्ञे तन्नाषेत्यभिधीयता इति अत्रोक्तवर्षादीनां आध्यादिरूपयोगो वक्ष्यते । देशादीनां
च क्वचिदुपयोग उक्तः स्मृत्यंतरे । देशश्चैव तथा स्थानं सन्निवेशस्तथैव च । जातिसंज्ञाधिवासश्च प्रमाणं क्षेत्र
नाम च । पितृपैतामहं चैव पूर्वराजानुकीर्तनं । स्थावरेषु विवादेषु दशैतानि प्रवेशयेत् इति कात्यायनः । पूर्वप
क्षं स्वभावोक्तं प्राड्विवाकोथ लेखयेत् । पांडुलेखेन फलके ततः पत्रे विशोधितं । शोधनस्यावधिमाह नारदः । शो
धयेत् पूर्ववादं तु यावन्नोत्तरदर्शनं । अवष्टब्धस्योत्तरेण निवृत्तं शोधनं भवेत् । नापायानुत्तरं यावत्प्रत्यर्थिन

निवेशयेत् । अपरं तु लेखयेत्तावद्यावद्वस्तु विवक्षितमिति । एवं पक्षलक्षणोक्तिस्तेन किरुद्धाः पक्षाभासा अर्थ
सिद्धा अप्युक्ताः स्मृत्यंतरे । अप्रसिद्धं निराबाधं निरर्थं निःप्रयोजनं । असाध्यं वा विरुद्धं वा पक्षाभासं विवर्जये
दिति । अप्रसिद्धं खपुष्पं ममापहृतमिति निराबाधं मदीयप्रकाशेनायं व्यवहरतीति । निरर्थं किंच दट
नपं ममापहृतमिति निःप्रयोजनं मत्समीपे वीणिका सुखस्वरमधीत इति । असाध्यं सत्वनंगं हसितोनेनेत्यादि ।
विरुद्धं मूकेनाहं सप्त इति । पुरराष्ट्रादिविरुद्धं यथा चस्मर्यते । राज्ञा तु वर्जितो यस्तु यश्च पौरविरोधकृत्
राष्ट्रस्य वा समस्तस्य प्रकृतीनां तथैव च । अन्ये वा ये पुरग्राममहाजनविरोधकाः । अनादेयास्तु ते सर्वे व्यव
हाराः प्रकीर्तिताः इति । चानेकप्रतिज्ञत्वमपि पक्षाभासत्वमिति । बहुप्रतिज्ञं यत्कार्यं व्यवहारेषु निश्चितं
कामं तदपि गृह्णीयाद्राजा तत्त्वबुभुत्सयेति कात्यायनीयेन विरोधापत्तेः । यत्त्वनेकपदसंकीर्णः पूर्व
पक्षो न सिध्यतीति तद्युगपन्न सिध्यति क्रमेण तु सिध्यतीति व्याख्येयं । एवं पूर्वपक्षे लिखिते यत्कार्यं तदाह
याज्ञवल्क्यः । श्रुतार्थस्योत्तरं लेख्यं पूर्वावेदकसन्निधाविति । उत्तरं लक्षयति नारदः । पक्षस्य व्यापकं सा

रमसंदिग्धमनाकुलं। व्याख्यागम्यमित्येतदुत्तरं तद्विदो विदुरिति। अस्य चातुर्विध्यमाह कात्यायनः। मिथ्यासं
प्रतिपत्त्या वा प्रत्यवस्कंदनेन वा। प्राङ्न्यायविधिसिद्ध्या वा उत्तरं स्याच्चतुर्विधमिति। मिथ्योत्तरं च लक्षय
ति स एव। अभियुक्तो नियोगस्य यदि कुर्यादपह्नवं मिथ्या तत्तु विजानीयादुत्तरं व्यवहारत इति। तच्च चतु
र्विधमित्याह स एव। मिथ्यैतन्नाभिजानामि तदा मम न संनिधिः। अजातश्चास्मि तत्काल इति मिथ्या चतुर्विधेति
संप्रतिपत्त्युत्तरं तूक्तं स्मृत्यंतरे। साध्यस्य सत्यवचनं प्रतिपत्तिरुदाहृतेति। प्रत्यवस्कंदनोत्तरं लक्षयति ना
रदः। अर्थिना लिखितो योऽर्थः प्रत्यर्थी यदि तं तथा। प्रपद्य कारणं ब्रूयात्प्रत्यवस्कंदनं स्मृतमिति। प्राङ्न्यायो
त्तरं लक्षयति कात्यायनः। आचारेणावसन्नोऽपि पुनर्लेखयते यदि। सोऽभियोयोजितः पूर्वं प्राङ्न्यायस्तु स उ
च्यत इति। एवमुत्तरलक्षणे स्थिते तेनेतद्विहितानामुत्तराभासत्वमर्थसिद्धमपि स्पष्टितं स्मृत्यंतरे। संदिग्धम
न्यत्प्रकृतादत्यल्पमतिभूरि च। पक्षैकदेशव्याप्यन्यत्तथा नैवोत्तरं भवेत्। यद्व्यस्तपदमव्यापि निगूढार्थं
तथाकुलं। व्याख्यागम्यमसारं च नोत्तरं स्वार्थसिद्धये इति कात्यायनोऽपि। पक्षैकदेशे यत्सत्यमेकदेशे च का

रणं। मिथ्या चैवैकदेशे च संकरात्तदनुत्तरमिति। अनुत्तरत्वे च कारणमाह स एव। न चैकस्मिन्विवादे तु
क्रिया स्याद्वादिनोर्द्वयोः। न चार्थसिद्धिरुभयोर्न चैकत्र क्रियाद्वयमिति। अत्रायमर्थः। मिथ्याकारणोत्तरयोः
संकरे द्वयोरपि वादिनोः क्रियाप्राप्तेः। मिथ्या क्रिया पूर्ववादे कारणे प्रतिवादिनीति नारदोक्तेः। तद्द्वय
मेकस्मिन्व्यवहारे विरुद्धं। तथा कारणप्राङ्न्यायसंकरे तु प्रत्यर्थिन एव क्रियाद्वयं प्राङ्न्यायकारणोक्ता
तु प्रत्यर्थी निर्दिशेत्क्रियामिति व्यासोक्तेः। अत्र च प्राङ्न्याये जयपत्रेण प्राड्विवाकादिभिस्तु घेति व्यासोक्तेव
जयपत्रेण प्राङ्न्यायदर्शिभिर्वा भावयितव्यं। कारणोत्तरे तु साक्षिलेख्यादिभिरित्यत्रापि विरोधः। एवं त्रि
चतुःसंकरेऽपि द्रष्टव्यं। एषां चानुत्तरत्वेन यौगपद्येन क्रमेणोत्तरत्वमेव। क्रमश्चार्थिप्रत्यर्थिसंप्रेच्छया भवति
तथा च हारीतः। मिथ्योत्तरं कारणं च स्यातामेकत्र चेदुभे। सत्यं चापि सहान्येन तत्र ग्राह्यं किमुत्तरं। यत्प्रभू
तार्थविषयं यत्र वा स्यात्क्रियाफलं। उत्तरं तत्र तज्ज्ञेयमसंकीर्णमतोऽन्यथा। संकीर्णं न भवतीति शेषः। अस्या
र्थः। सुवर्णवर्णवस्त्राभियोगे सुवर्णं न गृहीतं वस्त्रं तु गृहीतं प्रतिदत्तं चेत्यत्रादौ वस्तुवर्ण्यविषये व्यवहारे

स्य पश्चाद्दत्तविषयेव वक्तव्यं । एवं मिथ्याप्राङ्न्याययोः कारणप्राङ्न्याययोश्च संकरे योज्यं । तथा तत्रैवाभि
योगे सुवर्णं गृहीतं वस्त्रं तु न गृहीतं प्रतिदत्तमिति वा वस्त्रविषये पूर्वं जित इति वाच्ये तत्र वस्त्रविषय एव प्र
वक्तव्यं न तु सुवर्णविषयान्तरविषयत्वे पि क्रियाबाहुल्यापत्तेः । त्वियं गौर्मदीयामुकस्मिन्काले नष्टास्यापि गृहे द
ष्टेत्यभियोगे मिथ्यैतदेतत्प्रदर्शितकालात्पूर्वमेवास्मद्गृहे स्थितेति मिथ्याकारणयोः ॥ हस्तपत्रव्यापि
त्वतत्र गानुत्तरत्वं सकारणमिथ्योत्तरमिदं । अत्र च प्रत्यर्थिन एव क्रिया नार्थिनोऽपि मिथ्याकारणयोर्वापि या
ह्वा करणानुत्तरमिति हारीतोक्तेः । एवं मिथ्याप्राङ्न्याययोः कारणप्राङ्न्याययोश्च हस्तपत्रव्याप्तित्वे सतिना
नुत्तरत्वं । अत्रोभयत्रापि प्रत्यर्थिन एव क्रियेति न क्वाप्येकस्मिन्व्यवहारे द्वयोः क्रियेत्यलं । उत्तरलेखनोत्त
रं साधनोक्तौ क्रममाह याज्ञवल्क्यः । ततोऽर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधनं । तत्सिद्धौ सिद्धिमाप्नो
ति विपरीतमतोऽन्यथेति । इदं च मिथ्योत्तरविषयं । उत्तरांतरे तु प्रत्यर्थिन एव साधनोपन्यासः । तथा च हारी राम:
तः । प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत्क्रियां । मिथ्योक्तौ पूर्ववादी तु प्रतिपत्तौ न सा भवेदिति एवं व्यव ॥५६६॥

हारस्य चातुष्पात्त्वमाह याज्ञवल्क्यः । चतुष्पाद्व्यवहारोयं विवादेषूपदर्शित इति । पादश्चतुर्थ्यंशस्तु यत्नोक्तं
स्मृत्यंतरे । भाषोत्तरक्रियासाध्यसिद्धिभिः क्रमवृत्तिभिः । आक्षिप्तचतुरंशस्तु चतुष्पादभिधीयत इति
इदं च संप्रतिपत्त्यतिरिक्तोत्तरविषयं । संप्रतिपत्तौ द्विपात्त्वात् । यथाह बृहस्पतिः । मिथ्योत्तरे चतुष्पात्स्यात्प्र
त्यवस्कंदने तथा । व्यवहारस्तु विज्ञेयो द्विपात्संप्रतिपत्तितः इति याज्ञवल्क्यः । अभियोगमनिस्तीर्य नैनं प्रत्य
भियोजयेत् । अभियुक्तं च नान्येन नोक्तं विप्रकृतिं नयेत् । कुर्यात्प्रत्यभियोगं च कलहे साहसेषु च । ना
रदः । पूर्ववादं परित्यज्य योऽन्यमालंबते पुनः । वादसंक्रमणात् ज्ञेयो हीनवादी स वै नरः । हीनवादी दंड्यो भवति
न प्रकृतादर्थाद्धीयत इत्यर्थः । एतच्चार्थव्यवहारे ज्ञेयं यथाह स एव । सर्वेष्वर्थविवादेषु वाक्छलेनावसी
दति । परस्त्रीभूम्यृणादाने शास्योऽप्यर्थान्न हीयत इति । याज्ञवल्क्यः । साक्षिषूभयतः सत्सु साक्षिणः पूर्ववा
दिनः । पूर्वपक्षेऽधरीभूते भवंत्युत्तरवादिनः । पूर्ववादिनः प्रतिज्ञायां इति । पूर्वपक्षः प्रतिज्ञा अधरीभूते का
रणोत्तरोपन्यासेन प्रत्यर्थिस्वीकारेण । साक्षिग्रहणं प्रमाणांतरस्याप्युपलक्षणार्थं सम एव उभयोः

व्य.म.
॥९॥

प्रतिभूर्ग्राह्यः समर्थः कार्यनिर्णये निर्णयस्य कार्यं कार्यनिर्णय इति। प्रतिभूत्वेनायोग्यानाह कात्यायनः। न
स्वामी न च वैरी तु स्वामिनाधिकृतस्तथा। निरुद्धो दण्डितश्चैव संशयस्थो न च क्वचित्। नैव रिक्थी न रिक्त
श्च न चैवात्यन्तवासितः। राजकार्यनियुक्तश्च ये च प्रव्रजिता नराः। नाशक्तो धनिने दातुं दण्डं राज्ञे च तत्समम्।
नाविज्ञातो गृहीतव्यः प्रतिभूस्तत्क्रियां प्रति इति। रिक्थी दायादः। याज्ञवल्क्यः। ऋणमप्रदं पत्योः पितुः पुत्र
स्य चैव हि प्रतिभाव्यमृणं साक्ष्यं अविभक्तेः न तु स्मृतं। लब्धकाभावे त्वाह कात्यायनः। अथ चेत्सति भूनां
क्तिकार्ययोपस्तवादिनः सरक्षितो दिनस्यातो दद्यात्स्याप वैतनमिति। स एव द्विजातिः प्रतिभूर्हीनो रक्षः
स्याद्वाह्यचरिमि। स्वसादीन् प्रतिभूर्हीनान्बंधयेन्निगडेन तु इति। हीनवादिनं लक्षणान्याह नारदः। सर्ववा
दं परित्यज्य योन्यामालंबते पुनः। वादसंक्रमणात्ज्ञेयो हीनवादी न संवैनरः। उक्तेऽन्तरस्य प्रतिपात्र वल्काः। दे
शांतं देशान्तरं याति सृक्किणी परिलेढि वा। ललाटं स्विद्यते चास्य मुखं वैवर्ण्यमेति च। परिशुष्यत्स्खलद्व
लक्षाकाविरुद्धं बहु भाषते। वाक्चक्षुः पूजयति नो ओष्ठौ निर्भुजत्यपि स्वभावाद्विकृतिं गच्छेन्मनोवाक्का राम:
॥ [illegible] ॥

यकर्मणि। अनियोगे च सामर्थ्ये च दृष्टः स परिकीर्तितः। स षड्विधः श्रोत्राप्रातौ। अथ प्रमाणनिरूपणं। याज्ञवल्क्य
प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्तितं। एषामन्यतमाभावे दिव्यान्यतममुच्यते। कात्यायनोऽपि। यद्ये
को मानुषीं ब्रूयादन्यो ब्रूयात्तु दैविकीं। मानुषीं तत्र गृह्णीयान्न तु दैवीं क्रियां नृपः। यद्येकदेशव्याप्तापि क्रिया
विद्येत मानुषी। सा ग्राह्या न तु पूर्णापि दैविकी वदतां नृणां। क्रिया न दैविकी प्रोक्ता विद्यमानेषु साक्षिषु। ले
ख्ये वसति वादेषु न स्याद्दिव्यं न साक्षिणः। पूगश्रेणिगणादीनां या स्थितिः परिकीर्तिता। तस्यास्तु साधनं लेख्यं
न दिव्यं न च साक्षिणः। दत्तादत्तेतयादत्ते स्वामिनो निर्णये सति। विक्रयादानसंबन्धे क्रीत्वा धनमनिच्छति। द्यूते स
माह्वये चैव विवादे समुपस्थिते। साक्षिणः साधनं प्रोक्तं न दिव्यं न च लेखकं। द्वारमार्गक्रियाभोगजलवाहा
दिके तथा भुक्तिरेव हि गुर्वी स्यान्न लेख्यं न च साक्षिणः। क्वचिद्दिव्यप्राबल्यमाह बृहस्पतिः। मणिमुक्ताप्रवाला
नां कूटकृन्न्यासहारकः। हिंसकोन्यांगनासेवापारीष्याः स्याः पारुष्ये सदा। महापापाभिशापेषु विद्यमानेषु साक्षि
षु। दिव्यमालंबते वादी न पृच्छेत्तत्र साक्षिण इति व्यासः। न मयैतत्कृतं लेख्यं कूटमेतेन कारितं। अधरीकृत्य तत्पत्रम

र्यं दिव्येन निर्णयः॥ आरण्ये विजने रात्रावंतर्वेश्मनि साहसे॥ न्यासापह्नवने चैव दिव्यासंभवति क्रिया॥ बृहस्प
तिः॥ लिखिते नसाक्षिवादे च संदिग्धं यत्र जायते॥ अनुमाने च संप्राप्ते तत्र दिव्यं विशोधनं॥ क्वचित्साक्षिदिव्ययो
विकल्पमाह स एव॥ पक्षांते साहसे वादे पारुष्ये दंडवाचके॥ बलोद्भूतेषु कार्येषु साक्षिणो दिव्यमेव च॥ ऋ
णे लेख्यं साक्षिणो वा युक्तिलेखवादयोऽपि वा॥ दैविकी वा क्रिया ज्ञेया प्रजानां हितकाम्ययेति युक्तिलेशो युक्तो
कदेशः॥ वाचिके पारुष्ये ब्रह्महासात्येवमाद्याक्रोशात्मके इत्यर्थः॥ यत्तु कात्यायनः॥ वाक्पारुष्ये च न मोच
दिव्यं न परिकल्पयेदिति॥ तद्वाक्पारुष्यपरं॥ न मिथ्य हृपास्थावरमात्रोपलक्षणं॥ यथाह पितामहः॥ स्था
वरेषु विवादेषु दिव्यानि परिवर्जयेदिति साक्ष्यादिसत्वेऽयं दिव्यनिषेधः॥ तथा च स एव॥ साक्षिभिर्लिखितेना
थ भुक्त्या चैतान्न साधयेदिति स एव॥ लेख्यं यत्र न विद्येत न युक्तिर्न च साक्षिणः॥ न च दिव्यावतारोऽस्ति प्रमा
णं तत्र पार्थिवः॥ निश्चेतुं येन शक्ताःस्युर्वादाः संदिग्धरूपिणः॥ तेषां नृपप्रमाणं तत्र पार्थिवः॥ निश्चेतुं येन
शक्ताःस्युर्वादाः संदिग्धरूपिणः॥ तेषां नृपः प्रमाणं स्यात्स सर्वस्य प्रभुर्यतः॥ अथ लेख्यं॥ बृहस्पतिः॥ राज

लेख्यं स्थानकृतं स्वहस्तलिखितं तथा॥ लेख्यं तु त्रिविधं प्रोक्तं भिन्नं तद्बहुधा पुनः॥ इति॥ यत्तु वसिष्ठेन लौकिकं
राजकीयं च लेख्यं विद्याद्विचक्षणमिति द्वैविध्यमुक्तं तत्स्थानकृतस्वहस्तलिखितयोर्भेदमाश्रित्य लौ
किकं जानपदमिति पर्यायौ॥ राजकीयं जानपदं लिखितं द्विविधं स्मृतमिति संग्रहोक्तेः॥ बृहस्पतिः॥ भाग
दानसंविद्दासकरणादिभिः॥ सप्तधा लौकिकं लेख्यं त्रिविधं राजशासनं॥ भ्रातरः संविभक्ता ये स्वरुच्या
तु परस्परं॥ विभागपत्रं कुर्वंति भागलेख्यं तदुच्यते॥ भूमिं दत्वा तु यत्पत्रं कुर्याच्चंद्रार्कसाक्षिकं॥ अनाछेद्य
मनाहार्यं दानलेख्यं तु तद्विदुः॥ गृहक्षेत्रादिकं क्रीत्वा तुल्यमूल्याक्षरान्वितं॥ पत्रं कारयते यत्तु क्रयलेख्यं
तदुच्यते॥ जंगमं स्थावरं बंधं दत्वा लेख्यं करोति यत्॥ गोप्यभोग्यक्रियायुक्तमाधिलेख्यं तदुच्यते॥ ग्रामो देश
श्च यत्कुर्यात्मतं लेख्यं परस्परं॥ राजाविरोधिधर्मार्थं संवित्पत्रं वदंति तत्॥ वस्त्रान्नहीनः कांतारे लिखितं कु
रुते तु यत्॥ कर्माणि ते करिष्यामि दासपत्रं तदुच्यते॥ धनं वृध्या गृहीत्वा तु स्वयं कुर्याच्च कारयेत्॥ उद्धा
रपत्रं तत्प्रोक्तं ऋणलेख्यं मनीषिभिः॥ आदिशब्दाद्विशुद्ध्यादिपत्रसंग्रहणं॥ विशुद्धिपत्रमाह कात्यायनः॥

अभिशापेसमुत्तीर्णेप्रायश्चित्तेकृतेजनैः। विशुद्धिपत्रकंज्ञेयंतेभ्यःसाक्षिसमन्वितं उत्तमेषुसमस्तेष्वभि
शापेसमागते। वृत्तानुवादलेख्यंयत्तज्ज्ञेयंसंधिपत्रकं। सीमाविवादेनिर्णीतेसीमापत्रंविधीयतेइति
अन्वाधिपत्रमाहप्रजापतिः। धनाधनेनतेनैवपरमाधिनयेयदि। कृत्वातदाधिलिखितंपूर्वंचाप्यसम
र्पयेत्। याज्ञवल्क्योपि। दत्वर्णंपाटयेल्लेख्यंशुद्ध्यैवान्यत्तुकारयेत्। पूर्वोक्तयोःस्वहस्तकृतान्यकृतयोर्विशे
षमाहनारदः। लेख्यंतुद्विविधंप्रोक्तंस्वहस्तान्यकृतंतथा। असाक्षिमत्साक्षिमच्चसिद्धिर्देशस्थितेस्तयोरिति
याज्ञवल्क्यः। विनापिसाक्षिभिर्लेख्यंस्वहस्तलिखितंतुयत्। तत्प्रमाणंस्मृतंलेख्यंबलोपधिकृतादृते। ब
लंबलात्कारःउपधिर्लोभादिविशेषमाहसएव। यःकश्चिदर्थोनिमतःस्वरुच्यातुपरस्परं। लेख्यंतुसाक्षिम
त्कार्यंतस्मिन्धनिकपूर्वकं। समामासतदर्धाहर्नामजातिस्वगोत्रकैः। सब्रह्मचारिकात्मीयपितृनामादिचि
ह्नितमिति। सब्रह्मचारिकेबह्वृचादिशाखाप्रयुक्तंगुणनामबह्वृचःकठइत्यादि सएवासमाप्तेर्थेऋणीना
मस्वहस्तेननिवेशयेत्। मतंमेमुकपुत्रस्ययदत्रोपरिलेखितं। साक्षिणश्चस्वहस्तेनपितृनामकपूर्वकं

अत्राहममुकःसाक्षीलिखेयुरितितेसमाः। उभयाभ्यर्थितेनैतन्मयाह्यमुकसूनुना। लिखितंह्यमुकेनेति
लेखकोन्तेततोलिखेत्। समाःसंख्यातोगुणतश्च। कश्चिद्विशेषमाहत्याकारप्रसेषा नारदः। अलिपिज्ञ
ऋणीयःस्यात्स्वमतंतुसलेखयेत्। साक्षीवासाक्षिणान्येनसर्वसाक्षिसमीपतः। त्रिविधंराजशासनमित्यु
क्तंतद्दर्शयतेयाज्ञवल्क्यः। दत्वाभूमिंनिबंधंवाकृत्वालेख्यंतुकारयेत्। आगामिभद्रनृपति
परिज्ञानायपार्थिवः। पटेवाताम्रपट्टेवास्वमुद्रोपरिचिह्नितं। अभिलेख्यात्मनोवंश्यानात्मानंचमहीप
तिः। प्रतिग्रहपरिमाणंदानच्छेदोपवर्णनं। स्वहस्तकालसंपन्नंशासनंकारयेत्स्थिरं। निबंधःआकरादे
राजादिदत्तंनियतंलभ्यं। प्रतिगृह्यतेयत्प्रतिग्रहोभूम्यादितस्यराजालिखितेनप्रयच्छति सेवाशौर्यादि
नातुष्टःप्रसाददलिखितंतुतत्। पूर्वोत्तरक्रियावादनिर्णयांतेयदानृपः। प्रदद्याज्जयिनेलेख्यंजयपत्रंत
दुच्यते इतिराज्ञोनुकल्पमाहव्यासः। राजातुस्वयमादिष्टसंधिष्टसंधिविग्रहलेखकः। ताम्रपट्टेपटेवापि
प्रलिखेद्राजशासनं। अत्रचरात्मस्वयमादिष्टसंधिष्टसंधिविग्रहलेखकः। ताम्रपट्टेपटेवापिप्रलिखेद्राज

व्य.म.
॥१२॥

शासनं॥ अत्र च राज्ञा स्वमतं लेख्यमित्याह स एव। संनिवेशं प्रमाणं च स्वहस्तेन लिखेत्स्वयं। मतं मेऽमुकपुत्र
स्यामुकस्य महीपतेः॥ संनिवेशं प्रमाणं चेति पूर्ववाक्येनान्वयः। वसिष्ठस्तु राजलेख्यं चातुर्विध्यमाह शा
सनं प्रथमं ज्ञेयं जयपत्रं तथापरं। आज्ञाप्रज्ञापनापत्रे राजकीयं चतुर्विधं॥ सामंतेष्वथ भृत्येषु राष्ट्रपाला
दिकेषु च। कार्यमादिश्यते येन तदाज्ञापत्रमुच्यते॥ ऋत्विक्पुरोहिताचार्यमान्येष्वभ्यर्हितेषु तु। कार्यं
निवेद्यते येन पत्रं प्रज्ञापनाय तत्॥ शासनजयपत्रे प्रागुक्ते। याज्ञवल्क्यः। देशांतरस्थे दुर्लेख्ये नष्टोन्मृष्टे
तथा हृते। भिन्ने दग्धे तथा छिन्ने लेख्यमन्यत्तु कारयेत्॥ नारदः। लेख्ये देशांतरे न्यस्ते शीर्णे दुर्लिखिते हृते
सतस्तत्कालकरणमसतो द्रष्टृदर्शनं। द्रष्टारः साक्षिणः। तदभावे दिव्यं। अलेख्यसाक्षिके दैवीं व्यवहारे
विनिर्दिशेदिति। कात्यायनोक्तं याज्ञवल्क्यः। संदिग्धलेख्यशुद्धिः स्यात्स्वहस्तलिखितादिभिः। युक्तिप्राप्ति
क्रियाचिह्नसंबंधागमहेतुभिः॥ युक्तिरर्थोपपत्तिः। प्राप्तिर्द्वयोरेकत्रावस्थानं क्रिया साक्ष्यादि चिह्नं मुद्रा
दि संबंधोऽनागतः। आगमः संभावितः प्राप्त्युपायः हेतुरनुमानं प्रजापते प्रजापतिः। कार्योपलेन रामः
॥४७२॥

महता निरापो राजशासने। राज्ञां स्वहस्ततो मुद्रा लेखकाक्षरदर्शनात्। दुष्टलेख्यान्याह बृहस्पतिः। असम्मु
ग्रान्नुन्मत्तार्तस्त्रीमत्तव्यसनातुरैः। निःशेषप्रविष्टबलात्कारकृतं लेख्यं न सिध्यति। दूषितो गर्हितः साक्षी पत्रे
को विनिवेशितः। कूटलेख्यं तु तत्प्रोक्तं लेखको वापि तद्विध इति। अथ भुक्तिः। नारदः। आगमेन विशु
द्धेन भोगो याति प्रमाणतां। अविशुद्धागमो भोगः प्रामाण्यं नैव गच्छति॥ सागमत्वं विशिष्यैषणान्तरेण॥ त्रिश
मप्याह व्यासः सागमो दीर्घकालश्चाविच्छेदोपरवोज्झितः। प्रत्यर्थिसंनिधानश्च पंचांगो भोग इष्यते॥ भुक्तिमा
त्रेण साध्यामित्याह नारदः। संभोगं केवलं यस्तु कीर्तयेन्नागमं क्वचित्। भोगच्छलापदेशेन विज्ञेयः स
तु तस्कर इति। इदं चागमस्मरणयोग्ये काले ज्ञेयं। तदयोग्ये तु भुक्तिमात्रमपि प्रमाणमित्याह स एव।
स्मार्ते काले क्रिया भूमेः सागमा भुक्तिरिष्यते। अस्मार्तेऽप्यागमाभावस्मरणाच्छ्रुताबाह स एव। अनाग
मं तु यो भुङ्क्ते बहून्यब्दशतान्यपि। चौरदंडेन तं पापं दंडयेत्पृथिवीपतिरिति। मनुः स एव। अन्यायेनापि
यद्भुक्तं पित्रा पूर्वतरैस्त्रिभिः। न तच्छक्यं मया हर्तुं क्रमात्त्रिपुरुषागतमिति तिर्द्दागरदागमं विनाप्यन्यायेनापि

प्रसिद्धास्तत्पूर्वतरैस्त्रिभिर्युक्तं न स्याद्भुक्तं नराकं किंतु नरागमाभावनिश्चयासंभव इति योज्यं। यदपि
हारीतायां। यद्विनागममत्यंतं भुक्तं पूर्वैस्त्रिभिर्भवेत्। नच तच्छक्यमपाकर्तुं क्रमात्त्रिपुरुषागम
मिति इत्यतोपलभ्यमानागमं विनेति व्याख्येयान्त्वागमस्वरूपं विनेति। यत्तु याज्ञवल्क्यीयं। आ
गमस्तु कृतो येन सोभियुक्तस्तमुद्धरेत्। न तत्सुतस्तत्सुतस्तत्सुतो वा भुक्तिस्तत्र गरीयसीति। तदागमक
र्तुरेवागमानुद्धारे दंडो न तत्सुतादीनामपीत्येवंपरं। न त्वर्थासिद्धिरिति यथा हारीतः। आगमस्तु कृता
येन सोदंड्यस्तमनुद्धरन्। न तत्सुतस्तत्सुतो वा भोगहानिस्तयोरपीति। याज्ञवल्क्यः। योभियुक्तः परेत
स्य रिक्थी तमुद्धरेत्। न तत्र कारणं भुक्तिरागमेन विना कृता रिक्थीत्यत्रागमपुत्रादितमागमं। ननु दीर्घ
कालीनो भोगः प्रमाणमिति यदुक्तं तत्कथं। स्वल्पकालोपभोगेमाप्यनियोक्तहानिप्रतीतेः। यथाह स एव। पश्य
तो ब्रुवतो भूमेर्हानिर्विंशतिवार्षिकी। परेण भुज्यमानाया धनस्य दशवार्षिकीति उच्यते। एतत्तत्स्व
रूपतोप्रतिषेधतस्तावत्कालीनभोगेन भूम्यादिजमन्यफलहानिर्भवं तीत्येवं परंपरं। ननु तद्भूम्यादिव

स्तुहानिरपीति। अनागमं तु यावत्तु इत्याद्युक्तवचनविरोधात्। कात्यायनः। नोपभोगे बलं कार्यमाह
र्त्रा तत्सुतेन वा। पशुस्त्रीपुरुषादीनामिति धर्मो व्यवस्थितः। नारदः। आधिः सीमा बालधनं निक्षेपोपनि
धिः स्त्रियः। राजस्वं श्रोत्रियस्वं च नोपभोगेन नश्यति। मनुः। संप्रीत्या भुज्यमानानि न नश्यंति कदाचन। धेनु
रुष्ट्रो वहन्नश्वो यश्च दम्यः प्रयुज्यते। दम्यः प्रयुज्यते दमनार्थं यः समर्प्यते नृपसाक्षिणः। टोडरानंदे ना
रदः। संदिग्धेषु तु कार्येषु द्वयोर्विवदमानयोः। दृष्टश्रुतानुभूतत्वात् साक्षिभ्यो व्यक्तदर्शनं। तद्भेदानाह
स्पतिः। लिखितो लेखितो गूढः स्मारितः कुल्यदूतकौ। यादृच्छिकश्चोत्तरश्च कार्यमध्यगतोपरः। नृपोध्यक्ष
स्तथा ग्रामसाक्षी द्वादशधा यः स्मृतः। यत्र निवेशितो लिखितो नार्थिप्रेरणया निवेशितो लेखितः॥
ड्यादिव्यवधानेन श्रावितो गूढः। पुनःपुनः कार्यं स्मार्यमाणः स्मारितः। यदृच्छयैवागता साक्षिक्रिय
माणो यादृच्छिकः। श्रवणाच्छ्रावणाद्वा साक्षिणामप्युपरिभाषमाण उत्तरः। अध्यक्षः प्राड्विवाकः। इदं
च सभ्यादीनामुपलक्षणं। लेखकः प्राड्विवाकश्च सभ्याश्चैवानुपूर्वशः इति कात्यायनवाक्यात्। स

वजनवसमंपं चवास्युष्मलारत्त्वयएववा। उभौवाश्योत्रियौग्राह्यौ नैकं पृच्छेत्कदाचन। लिखितौ द्वौतथाग्रद्वौ त्रि
चतुःपंचलेखिता। यदृच्छाभ्यागताऽज्ञकुल्यात्तथा चोत्तरसाक्षिणः। इतका। रवटिकायाहा कार्यमध्यम
तत्तथा। एक एव प्रमाणं स्यान्नृपोध्यक्षस्तथैव च। लिखितादीनामुभयानुमतत्वे एकस्यापि ग्रहणमाह
याज्ञवल्क्यः। उभयानुमतः साक्षी भवेदेकोपि धर्मवित्। व्यासः। शुचिक्रियाश्च धर्मज्ञसाक्षियस्त्वनुमतत्वा
कप्रमाणमेकोपि भवेत्साहसेषु विशेषतः। अनुमतत्वाभावे दृष्टस्य वचनः निश्चयादिष्वनापमध्ये
कमाह कात्यायनः। अभ्यंतरस्य निक्षेपे साक्ष्यमेकोपि वाच्यते। अर्थिना प्रहिताः साक्षी भवेदेकोपि याचित या
चितं विवाह्य यथ्येनीतं मानरणादिकं। कुंडलादिप एप विवादेप्येकमाह स एवासंस्कृतं येन यत्प्रण्यंत तेनैं
व विभावयेत्। एक एव प्रमाणमविचार्य तत्र कीर्तितः। तेषां च स्वरूपमाह व्यासः। धर्मज्ञाः पुत्रिणो मौला
त्कीनाः सत्यवादिनः। श्रौतस्मार्तक्रियायुक्ता विगतद्वेषमत्सराः। श्रोत्रिया नपदाधीनास्तरपृष्ठास्तथा
सिनः युवानः साक्षिणः कार्याः ऋणादिषु विजानता। नारदः। स्त्रीणां पुत्रेण पुरुषाः स्वेषु वर्गेषु वर्गिणः

बर्हिर्वासिषु बाह्याः स्युः स्त्रियः स्त्रीषु च साक्षिणः। वर्गिणश्चाह कात्यायनः। लिंगिनः श्रेणिपूगाश्च वणिग्जातास्त
थापरे। समूहस्थाश्च ये चान्ये वर्गास्तानब्रवीद्भृगुः। दासचारणमल्लानां हस्त्यश्वरथजीविनां। प्रत्येकै
कसमूहानां नायका वर्गिणः स्मृताः। विजातीयानप्याह याज्ञवल्क्यः। अवराः साक्षिणो ज्ञेयाः श्रौतस्मार्तक्रिया
पराः। यथाजाति यथावर्णं सर्वे सर्वेषु वा स्मृताः। वर्ज्यानप्याह स एव। स्त्रीबालवृद्धकितवमत्तोन्मत्ताभिशस्तका
रंगावतारिपाखंडिकूटकृद्विकलेन्द्रियाः। पतिताप्तार्थसंबंधिसहायरिपुतस्कराः। साहसी दृष्टदोषश्च नि
र्धूताद्यास्त्वसाक्षिणः। निर्धूतः स्वजनैस्त्यक्तः आदिशब्देन दासाद्याः। बृहस्पतिः। मनुः। पिता पितृव्यश्च भार्या
या श्यालमातुलौ। भ्राता सखा च जामाता सर्ववादेष्वसाक्षिणः। नारदः। अनिर्दिष्टस्तु साक्षित्वे स्वयमेवैत्य
यो वदेत्। स्वयमुक्तिः स शास्त्रेषु न स साक्षित्वमर्हति। कात्यायनः। साक्षिणां लिखितानां च निर्दिष्टानां च वा
दिना। तेषामेकोन्यथावादी भवेत्सर्वेऽसाक्षिणः। एतेषामपि क्वचित्साक्षित्वमाह नारदः। असाक्षिणो
ये निर्दिष्टा दासनैकृतिकादयः। कार्यगौरवमासाद्य भवेयुस्तेपि साक्षिणः। अत्र संभवे मनुः। स्त्रियाप्यसंभ

व्य·म: वेकार्यबालेनस्थविरेणवा। शिष्येणवंधुनावापि दासेनभृतकेनवा।। याज्ञवल्क्यः सर्वसाक्षासंग्रहेषु चौर्यपारुष्य
।२४।। साहसे।। अत्रत्वासंग्रहादीनां साहसत्वेपि पृथगुपादानंगुप्ततयाक्रियमाणत्वासंग्रहपरं। उशनादासोंधो वधी
रःकुष्ठीस्त्रीबालस्थविरादयः। एतेप्यनभिसंबद्धाः साहसेसाक्षिणोमताः। अनभिसंबद्धाः अपक्षपातिन
ः।। बृहस्पतिः।। साक्षिणोर्थसमुद्दिष्टान्दोषैर्दूषयेत्। अदुष्टान्तु यद्वादी तत्समंदंडमर्हतीति। वायत्र प्रमथी
तत्समंविवादविषयानृतद्रव्यसमं। व्यासः साक्षिदोषाः प्रयोक्तव्याः संसदि प्रतिवादिना। पत्रेनिलिखिताः सर्वा
न्वाच्याः प्रत्युत्तरंतुतं। पत्रेलिखितान्साक्षिदोषान्प्रतिवादीकृत्स्नतद्विषयंपरिहरतेसाक्षिणः साक्ष्यैर्वाचनीयाइ
त्यर्थः सएव। प्रतिपन्नोनसाक्षित्वमर्हतीतिकथंचनः। अतोन्यथाभावनायाः क्रिययाप्रतिवादिना।। अभावये
दमंदाप्यस्सत्यथासाक्षिणः स्फुटं। भाविताः साक्षिणोवर्ज्याः साक्षिधर्मनिराकृताः।। अतोन्यथा असंप्रतिपत्तौ
भावनायां। अंगीकारयितव्याः। क्रिययाप्रमाणेन स्फुटंयथास्यात्तथा भावयन्नित्यन्वयः। यत्तु संसदाह राम:
षणंयत्नेकामिन्तु मघापिवा। साक्षिणांदूषणंयाह्यंनसाध्यंदोषवर्जनादिति। तदासत्वेनलोकेवधारितः साक्षि ।४७५।।

विषयंप्रतिपादिनादोषाज्ञानेसएव। प्रमाणस्यहियेदोषावक्तव्यास्तेविवादिना।। गूढाश्चप्रकटाः सम्यैः का
लेशास्त्रप्रदर्शनात्। गूढाः शास्त्रप्रदर्शनेनसाक्षिवादात्पूर्वकालेवक्तव्याइत्यर्थः। अतेनंतरंतुवक्तव्या
इत्याह बृहस्पतिः। लेख्यदोषास्तुयेकेचित्साक्षिणांचैवयेस्मृताः। वदकालेतुवक्तव्यापश्चादुक्तान्नदूषये
त्। अत्रदंडमाह कात्यायनः। उक्तेर्थेसाक्षिणोयस्तु दूषयेत्साक्षदूषितान्। नचतत्कारणंब्रूयात्सप्राप्नुयात्स्व
साहसं। साक्षिणांस्वदूषणपरिहाराक्षावधातकुर्यादित्याह। बृहस्पतिः। लेख्यंवासाक्षिणोवापिविवादे
यस्यदूषिताः। तस्यकार्यंनसिध्येतयावतन्नविशोधयेत्। तल्लेख्यादिकं। कूटसाक्षिककर्तुर्दंडमाह कात्या
यनः। येनकार्यस्यलोभेननिर्दिष्टाः कूटसाक्षिणः। गृहीत्वातस्यसर्वस्वंकुर्यान्निर्विषयंततः। निर्विषयंविषयवाद
विषयीनृतार्थरहितंदुष्टसाक्षिनिश्चयोयाथमहनारदः। नारदः। यस्त्वात्मदोषदुष्टत्वादस्वस्थइवलक्ष्यते। स्था
नात्स्थानांतरंगच्छेदेकैकंचानुधावति। कासत्यकस्माच्चनरामनादेनिश्वसत्यपिविलिखत्यवनिंयत्पाद
द्वावमस्यधूनयेत्। विघतेमुखवर्णोस्यललाटंस्विद्यतेतथा। शोषमागच्छतश्चोष्ठेउर्ध्वंतिर्यक्च वीक्षते। त्वरमा

स.मृ. णइवावदसमक्षे बकुभाषते। कूटसाक्षी स विज्ञेयस्तं तं पापं नयेन्नृपः। साक्षिणां प्रश्नप्रकारमाह कात्यायनः।
॥२५॥ देवब्राह्मणसान्निध्ये साक्ष्यं पृच्छेदृतं द्विजान्। उदङ्मुखान्प्राङ्मुखान्वा पूर्वाह्णे वा शुचिः शुचीन्। समंततः सा
क्षिणः सर्वानर्थिप्रत्यर्थिसन्निधौ। प्राड्विवाकोनुयुञ्जीत विधिनानेन सान्त्वयन्। यद्द्वयोरनयोर्वेत्थ कार्येस्मि
न्चेष्टितं मिथः। तद्ब्रूत सर्वं सत्येन युष्माकं ह्यत्र साक्षिता। गवाद्यादिविवादेषु विप्रतिपन्नार्थसान्निध्यम
प्याह स एव। अर्थिप्रत्यर्थिसान्निध्यसाध्यार्थस्य च सन्निधौ। प्रत्यक्षं चोदयेत्साक्ष्यं कथंचन। अर्थस्योपरि कर्त
व्यं तयोरपि विना क्वचित्। चतुष्पादेषु धर्मोयं द्विपदस्थावरेषु च। तोल्यगणिममेयानां समावेपि हि वादयेत्।
क्रियाकारेषु सर्वेषु साक्षिणस्त्वं न तोन्यथेति तयोर्वादिनोर्विना। पित्रर्थसन्निधाने क्वचित्तु पद्धादिषि
त्यर्थः। तौल्यं तोलनयोग्यं सुवर्णादि। गणिमं गणनीयं नाणकादि। मेयं मानयोग्यं व्रीहिगोधूमादि। अभावे-
पि साध्यार्थसन्निधानाभावेपि क्रियाकारेषु व्यवहारेषु। वधरूपे विवादपदे साक्षिणां श्रावणं शिवसन्निधावित्या रामः
ह स एव। वधे चेत्साक्षिणां साक्ष्यं वादयेच्छिवसन्निधौ। तदभावे तु चिह्नस्य नान्यथैव विवादयेत्। ततः साक्षिणा ॥५७६॥

षणं च चिह्नस्याभावे कार्ये अन्यथा वधाचिह्नसद्भावे स एव। न कालहरणं कार्यं राज्ञा साक्षिप्रभाषणे। महान्दो
षो भवेत्कालाद्धर्मव्यावृत्तिलक्षणः। नारदः। अरूपसाक्षिणा दृष्टेन्नियम्यस्त्वपथे नृणाम्। समस्तान्विदिताचारा
न्विज्ञातार्थान्पृथक्पृथक्। वसिष्ठः। समवेतैस्तु यद्दृष्टं वक्तव्यं तु तथैव तत्। विभिन्नेनैव तत्कार्यं वक्तव्यं तु पृथ
क्पृथक्। भिन्नकालेतु यत्कार्यं विज्ञातेय त्र साक्षिभिः। एकैकं वादयेत्तत्र विधिरेष प्रकीर्तितः। मनुः। सत्येन शा
पयेद्विप्रं क्षत्रियं वाहनायुधैः। गोबीजकांचनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः। गोरक्षकान्वाणिजकांस्तथा कारुकु
शीलवान्। प्रेष्यान्वार्धुषिकांश्चैव विप्राञ्छूद्रवदाचरेत्। ये व्यपेताः स्वकर्मभ्यः परपिण्डोपजीविनः। द्विजत्वमा
भिकांक्षंति तांश्च शूद्रवदाचरेत्। इति अन्यथा ब्रुवन्। सत्यतेनः पतत्येवमादिप्रकारेणेत्यर्थः। साक्षिवचनपरी
क्षोपायमाह हारीतः। देशकालवयोद्रव्यसंज्ञातिप्रमाणतः। अन्यूनं चेति गदितं ग्राह्यं साक्ष्यं विनिर्दिशेत्। साक्षिणो
विप्रतिपत्तौ निर्णयमाह याज्ञवल्क्यः। द्वैधे बहूनां वचनं समेषु गुणिनां तथा। गुणिद्वैधे तु वचनं ग्राह्यं ये गु
णवत्तमाः। साक्ष्यमंगीकृत्यानभिधाने दंडमाह स एव। अब्रुवन्हि ब्रुवन्हि नरः साक्ष्यमृणं सदशबंधकं रा

ज्ञा सर्वस्वदाप्यः स्याद्धत्वा रिक्थके हरेत्। सर्वस्वं द्विगुणसहितं सदशबंधकं दशमांशसहितं। दशमांशसहितं॥ दश
मांराज्ञा ग्राह्यः॥ सवृद्धिकमृणं सुत्तमसेनग्राह्यमिति मिताक्षरायां॥ जानतः साक्ष्यानंगीकारे दंडमाह स एव
यः साक्ष्यं श्रावितोन्येभ्यो निह्नुते तत्तमोवृतः। स दाप्योष्टगुणं दंडं ब्राह्मणं तु विवासयेत्॥ विवादपराजये यो
दंडः स ष्टगुणं दाप्यः। दंडदानासमर्थस्तु ब्राह्मणो निर्वास्यः। क्षत्रियादिः स्वोचितं कर्म कारयितव्य इति मि
ताक्षरायां॥ मनुः॥ यस्य दृश्येत सप्ताहादुक्तवाक्यस्य साक्षिणः। रोगोग्निर्ज्ञातिमरणमृणं दाप्यो दमं च सः॥ या
ज्ञवल्क्यः॥ वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेत्। तत्पावनाय निर्वाप्यश्चरुः सारस्वतो द्विजैः॥ शूद्रस्य प्रा
यश्चित्तमाह विष्णुः॥ उक्तेपि साक्षिभिः साक्ष्ये यद्यन्ये गुणवत्तराः। द्विगुणा वान्यथा ब्रूयुः कूटाः स्युः पूर्वसाक्षिणः
नृतवदनानुज्ञा॥ नारदः। निर्णिक्ते व्यवहारे तु प्रमाणमफलं भवेत्। लिखितं साक्षिणो वापि पूर्वमावे
दितं न चेत्॥ क्वचित्साक्षिणो नृतवदनानुज्ञा प्रायश्चित्तं चाह याज्ञवल्क्यः। वर्णिनां हि वधो यत्र तत्र साक्ष्यनृ राम
तं वदेत्। तत्पावनाय निर्वाप्यश्चरुः सारस्वतो द्विजैः। शूद्रस्य प्रायश्चित्तमाह विष्णुः॥ शूद्रस्यैकाह्निकं गोस्व ॥४७॥

कस्य ग्रासं दद्यादिति एकाह्निकं एकस्मिन्नहनि भक्षयितुं पर्याप्तं। अथ दिव्यं। तच्च मानुषप्रमाणानिर्णी
तार्थनिर्णायकं। तच्च तत्कालकालांतरनिर्णायकतया द्वेधा। तत्राद्यं भेदानाह बृहस्पतिः। घटोग्निरुदकं चै
व विषं कोशश्च पंचमं। षष्ठं च तंडुलाः प्रोक्तं सप्तमं तप्तमाषकं। अष्टमं फालमित्युक्तं नवमं धर्मजं स्मृतं। त
त्राद्यानि पंच महाभियोगएव तानाह याज्ञवल्क्यः। तुलाग्न्यापो विषं कोशो दिव्यानीह विशुद्धये। महाभियो
गेष्वेतानि शीर्षकस्थेभियोक्तरि। शीर्षकस्थेपराजयिकं दंडभाजि पितामहः। सावष्टंभाभियुक्तानां धटादी
नि दिशेत्। तंडुलाश्चैव कोशश्च शंकास्वेतानि योजयेदिति। तेन कोशो वष्टंभे शंकायां च भवति। कालिकापु
राणे। परदाराभिशापे च चौर्यागम्यागमेषु च। महापातकशस्ते च स्याद्दिव्यं नृपसाहसे विप्रतिपत्तौ विवा
दे वर्णस्य स्थापने कृते तत्रैव स्थापयेद्दिव्यं भिरा पूर्वं महापातिः परदाराभिशापे च बहवो यत्र वादिनः॥
स्त्रीरोहीनं भवेद्दिव्यमात्मनः शुद्धिकारणात्। अगम्यारदारनिवासाधारणाकेशपाद्याः शक्ते भिशस्ते सा
हसं बलादन्यायः। अवर्णो नि दापदारस्त्वं विशेषणमविवक्षितमभिशापस्यानुवाद्यत्वात्। एवं बहव इ

ध.म.

॥१७॥ त्या द्यपि तेन वा द्यभावे पि सर्वान्दिव्यापे पि दिव्यं। न वर्तिष्यं शुद्धिकारणादिति हेतुनिर्देशोप्येवं संगच्छतु। विना
दिव्यशीर्षकं कुर्यान्न पश्चाद्धेपपातक इति सामान्योक्तिः। अनारदः। राजभिः शंकितानां च निर्दिष्टानां च द
स्युभिः। आत्मशुद्धिपराणां च दद्यं दिव्यं शिरो विनेति। कालांतरे निर्णयके दिव्यं शापतद्वेहाना हनारदः। स
त्यवाहनशस्त्राणि गोबीजकनकानि च॥ देवतापितृपादांश्च दत्तानि सुकृतानि च स्पृशेच्छिरांसि पुत्रा
णां दाराणां सुहृदां तथा। अभियोगेषु सर्वेषु कोशपानमथापि वा॥ इमे तत्र शपथा प्रोक्ता मनुना स्वल्प
कारणात्। कोशस्य कालांतरनिर्णायकत्वेपि महाभियोगविचयतयाप्युयात्। याज्ञवल्क्यः। रुच्या वा
न्यतरः कुर्यादितरो वर्जयेत् छिरः। अयं च विकल्पो नियोजेच्छायामेव तदा निश्शाघातन्नियोज्यस्यैव दिव्यं
न कश्चिदभियोक्तादिदं व्येषु विनियोजयेजयेत्। अभियुक्ताय दातव्यं दिव्यं दिव्यविशारदैरिति दिव्यत
त्वे कात्यायनोक्तः॥ अथाधिकारिव्यवस्था याज्ञवल्क्यः। तुलास्त्रीबालवृद्धांधपंगुब्राह्मणरोगिणां। अग्निर्जलं रामः
वा शूद्रस्यात्विषवा सप्तविषस्य वा। आजातिवयोवस्थाविशेषान्नारदेन षोडशाष्टावधिको बलः। सर्व ॥ध७६॥

जातीयोपि। अशीतिवर्षाधिको वृद्धः। अत्र ब्राह्मणस्य वृद्धमाणसाधारणकाणे तुल्यैव नियता॥
अन्यादिकाले तज्जान्यपि भवंति। अत एव पितामहः। सर्वेषामेव वर्णानां कोशशुद्धिर्विधीयते। सर्वाण्ये
तानि सर्वेषां कालस्य विशेषे विना। कालिकापुराणे। वर्ण्ण्त्यस्य सदा देयेमाषकं तप्तहेमजं। नारदः। क्ली
बान्नरान्सत्वहीनान्परितप्तान्दितातरान्। बालवृद्धांतुरां स्त्रीश्च परीक्षेत घटे सदा। स्त्रीतुणां न विशे
षोक्तं न चापि सलिलं स्मृतं घटकोशादिभिस्तासामं तस्तत्वं विचारयेत्। सद्योग्नियंते मज्जतः स्वल्पपाना
र्त्तानां ते यशुद्धिः स्यान्न विषपित्तरोगिणां। श्वित्रं धकुनरवादीनां नाग्निकर्म विधीयते। मम्नजनायाः स्त्रीबा
लधर्मशास्त्रविदां तैा रोगिणो ये च वृद्धाः स्युः पुमांसो ये च दुर्बलाः। निसत्वा हान्व्याधिक्लिष्टान्यात्तेस्तोपे नि
मज्जयेत्। सद्यो म्रियंते मज्जेतः स्वल्पप्राणा हि ते स्मृताः। साहसेष्यागता नेतानैव तोये निमज्जयेत्। न चैपि हार
ये दग्निम विषेणा विशोधयेत्। विष्णुः। न स्त्रेष्मिकानां नालुणां श्वासकामिनां कातमानः न लोहशिल्पिनमग्निः
सलिलं नाबुसेविना मंत्रयोगविदां चैव विषं दद्यात्तु न क्वचित्। तंडुलैर्न नियुंजीत व्रतिनं मुखरोगिणां। व्र

व्य.म. तपयोव्रतोऽग्निमान्। पितामहः॥ मद्यपस्त्रीव्यसनिनां कितवानां तथैव च। कोशः प्राज्ञैर्न दातव्यो ये च नास्ति
॥२८॥ कवृत्तयः। नारदः। महापराधे निर्धर्मे कृतघ्ने क्लीबकुत्सिते। नास्तिके दृष्टदोषे च कोशदानं विवर्जयेत्॥
कात्यायनः। अस्पृश्याधमदासानां म्लेच्छानां पापकारिणां। प्रातिलोम्यप्रसूतानां निश्चयो न तु राजनि। त
त्प्रसिद्धानि दिव्यानि संशये तेषु निर्दिशेत्। तत्प्रसिद्धानि घटसर्पादीनि दिव्यकारिणां शक्तो प्रतिनिधिमा
ह दिव्यतत्त्वे स एव। देशकालविरोधे तु यथायुक्तं प्रकल्पयेत्। अन्येन हारयेद्दिव्यं विधिरेष विपर्यये। अन्ते
न हारयेत्प्रतिनिधिना कारयेत् विपर्ययेत् विपर्यये दिव्येकारिणां सामर्थ्ये पूर्वपित्रादितं माह याह ज्ञव
ल्क्यः पापं वा कृतमिति निश्चये कालांतरे वा पर्यन्तिस्संदेहे विप्रतिनिधिं हारे एव दिव्यमाह स एव दिव्यप्रकर
णे कात्यायनः। मातापितृद्विजगुरुवृद्धस्त्रीबालघातिनां। महापातकयुक्तानां नास्तिकानां विशेषतः
लिंगिनां प्रमदानां च मन्त्रयोगक्रियावदां। वर्णसंकरजातानां पापाभ्यासप्रवर्तिनां। एतेष्वेवाभियोगेषु
निघ्नेष्वेव प्रयत्नतः। दिव्यं प्रकल्पयेन्नैव राजा धर्मपरायणः। एतैरेव नियुक्तानां साधूनां दिव्यमर्हति॥ राम: ॥४७॥

नसंनिधानसाधवो यत्र तत्रसो ध्याः स्वकैर्नरैः॥ स्वकैरासैः। अथ कालः पितामहः। चैत्रो मार्गशिरः श्चैव वैशा
खश्च तथैव च। एते साधारणा मासा दिव्यानामविरोधिनः। घटः सर्वर्तुकः प्रोक्तो वातिवाते विवर्जये
त्। अग्निः शिशिरहेमंतवर्षासु परिकीर्तितः। शरद्ग्रीष्मे तु सलिलं हेमन्ते शिशिरे विषं॥ विशेषहेमंतशिशि
रयोः रेवोपादानं कालांतरस्याप्युपलक्षणं। वर्षे चतुर्थवामात्रेत्याद्यग्रे वक्ष्यमाणत्वात्। नारदः। कोशस्तु
सर्वदा देयं तु त्वास्या सार्वकालिकी॥ पितामहः॥ पूर्वाह्णे ग्निपरीक्षा स्यात् पूर्वाह्णे च घटो भवेत्। मध्याह्ने
तु जलं देयं धर्मतत्त्वमभीप्सता। दिवसस्य तु पूर्वाह्णे कोशशुद्धिर्विधीयते। रात्रौ तु पश्चिमे यामे विषं देयं सुशी
तलमिति एतानि च दिव्यान्यादित्यवारे कार्याणि तिथिष्टान्यूर्ध्वदेशः पितामहः। प्राङ्मुखो निश्चलः का
र्यः शुचौ देशे घटः सदा। इंद्रस्थाने सभायां वा राजद्वारे चतुष्पथे। नारदः। सभाराजकुलद्वारदेवायतनचत्वर
इति। कात्यायनः। अस्पृश्यानभिशस्तानां महापातकिनां नृणां। नृपद्रोहप्रवृत्तानां राजद्वारे प्रयोजयेत्। प्राति
लोम्यप्रसूतानां दिव्यं देयं चतुष्पथे। अतोऽन्येषु तु कार्येषु सभामध्ये विदुर्बुधाः इति। नारदः। अन्त्यदेशका

न्दनानि वह्निर्वादिकानि च । विनाचारं सदा येऽपि कुर्वन्ति हनसंशय इति । अथ सर्वदेवो साधारणो विधिः पि
तामहः । ततश्चावाहयेद्देवान् विधिनानेन धर्मवित् । प्राङ्मुखं प्राञ्जलिं कृत्वा प्राड्विवाकस्ततो वदेत् । ए
ह्येहि भगवान् धर्म अस्मिन् दिव्ये समाविश । सहितो लोकपालैश्च वस्वादित्यमरुद्गणैः । आवाह्य तु घ
टे धर्मं पश्चादंगानि विन्यसेत् । सएव । इंद्रं पूर्वे तु संस्थाप्य प्रेतेशं दक्षिणे तथा वरुणं पश्चिमे भागे कुबेरं चो
त्तरे तथा । अग्न्यादिलोकपालांश्च कोणभागेषु विन्यसेत् । इंद्रः पीतो यमश्श्यामो वरुणः स्फटिकप्रभः ॥
कुबेरस्तु सुवर्णाभः अग्निश्चापि सुवर्णभा । तथैव नैऋतिश्श्यामो वायुर्धूम्रः प्रशस्यते । ईशानस्तु भवेद्रक्तः एवं ध्या
येत्क्रमादिमान् । इंद्रस्य दक्षिणे पार्श्वे वसूनावाहयेद्बुधः धरो ध्रुवस्तथा सोमश्चापश्चैवानलः । प्रत्यूषश्च प्र
भासश्च वसवोऽष्टौ प्रकीर्तिताः देवेशेशानयोर्मध्ये आदित्यानां तथायनं । धातार्यमा च मित्रश्च वरुणोंऽशो
भगस्तथा । इंद्रो विवस्वान् पूषा च पर्जन्यो दशमः स्मृतः । ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः इत्येते द्वा रामः
दशादित्या मनिःप्रकीर्तिताः । अग्नेः पश्चिमभागे तु रुद्राणामयनं विदुः । वीरभद्रश्च शंभुश्च गिरिशश्च ॥४८०॥

रिशश्च महायशाः । अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः । भुवनाधीश्वरश्चैव कपाली च विशांपतिः । स्था
णुर्भवश्च भगवान् रुद्रास्त्वेकादश स्मृताः । प्रेतेशरक्षोमध्ये च मातॄणां प्रकल्पयेत् । ब्राह्मी माहेश्वरी चै
व कौमारी वैष्णवी तथा । वाराही चैव माहेन्द्री चामुंडा गणसंयुता । निर्ऋतेरुत्तरे भागे गणेशायतनं विदुः । वरुण
स्योत्तरे भागे मरुतां स्थानमुच्यते । गगनः स्पर्शनो वायुरनिलो मारुतस्तथा । प्राणः प्राणेशजीवौ च मरुत
स्सप्त कीर्तिताः । घटस्योत्तरभागे तु दुर्गामावाहयेद्बुधः । एतासां देवतानां तु स्वनाम्ना पूजनं विदुः । भावसमा
ने धर्माय दत्वा चार्घ्यादिकं क्रमात् । अर्घ्यादि पश्चादंगानां प्रषांतरमुपकल्पयेत् । गंधादिकं निवेद्यांतं
परिचर्याप्रकल्पयेत् । चतुर्दिक्षु तथा होमः कर्तव्यो वेदपारगैः । आज्येन हविषा चैव समिद्भिर्होमसा
धनैः । सावित्र्या प्रणवेनापि स्वाहांतैर्वैनैर्होमयेत् । हविश्चरुः आज्यं हविः समिधां संप्रतिपन्नदेवताक
र्त्वन्निलितानामेव होमः सन्नाप्ययोरिवेति दिव्यतत्त्वे गौडमीमांसकः तन्न । आज्येस्रुवेणावघेतीति स्रुव
स्य चरौ मक्षडुपस्तरणातिमध्यात्पूर्वार्धाच्च द्विर्हविषोवद्यति । अभिधारयति । हविश्चतस्रैवदानं धर्म

प्र.म.
॥२०॥

ह् इत्याश्वलायनादिसूत्रात्तत्र च। समित्तु सामर्थ्याद्धस्तस्येति भिन्नसाधनकत्वान्नं त्रतानुपपत्ते। सान्नाय्यहो
मयोस्तु तुल्ला न तत्र वसाधनत्वाद्युक्तातं त्रतेति। सर्पवायमर्थमनियुक्त। साहिविवितातं तु पत्रके मंत्रेणानेन
सहितं तत्र कार्यं च शिरोगतं। मंत्रः। आदित्यचंद्रावनिलोनलश्च द्यौर्भूमिरापो हृदयं यमश्च। अहश्च रात्रि
श्च उभे च संध्ये धर्मश्च जानाति नरस्य वृत्तमिति। नारदः। प्राड्विवाकस्ततो विप्रो वेदवेदांगपारगः। श्रुतवृत्तोपसं
पन्नः शांतिचित्तो विमत्सरः। सत्यसंधः शुचिर्दक्षः सर्वप्राणिहितेरतः। उपोषितस्त्वार्द्रवासा हृतदंतधावनः।
सर्वासां देवतानां च पूजां कृत्वा यथाविधीति। याज्ञवल्क्यः। सचैलं स्नातमाहूय सूर्योदय उपोषितं। कार
येत् सर्वदिव्यानि नृप ब्राह्मणसन्निधौ। पितामहोपि। एकरात्रोषिता यत्रिरात्रोप्युपोषिताय। नित्यं देया।
नि दिव्यानि शुचये चार्द्रवाससे इति सर्ववासस्थिः परिवृतो राजामात्यद्भिमतां प्रयोजयेत्। ऋत्विक्पुरोहिताचार्या
न्दक्षिणाभिस्तु तोषयेत्। एवं कारयिता राजा तु स्वानोगान्मनोरमान्। महतीं कीर्तिमाप्नोति ब्रह्मलो
याय कल्पते। अथ घटविधिः। पितामहः। विशालपुष्टितां सूत्राघटशालां तु कारयेत्। पत्रस्थानो

रामः
॥घट१॥

पक्षस्तंते श्वनिश्चांडालवायसैः। कपाटबीजसंयुक्तं पचारकरक्षितां। पानीयादिसमायुक्तां मध्ये स्तंभं कार
येत् नृप। नारदः। एवादिरं कारयेत्तत्र निर्व्रणं शुक्लवर्जितं शुक्लारवादिरवर्जितमित्यर्थः। शोरायं तदभावे वा वृ
क्षो वा कोटरैर्विना। अर्जुनं तिडकासारति निश्शोरस्त्र चंदनः माघवस्तु अर्जुनस्तिलको शोकतिनिशो
रक्तचंदन इति पपाव। एवं विधानि काष्ठानि घटार्थं परिकल्पयेत्। एवं विधानि इत्यादौ नुश्चन्यान्यपि य
ज्ञियान्योदुंबरादीनि मदन। अतएव पितामहः छित्वा तु याज्ञियं वृक्षं वन्मंत्रपूर्वकं। यथाम्यलोकपालेभ्यस्तु
रला कायाम नीषिणि। मंत्रः सोमेयो वानस्पतश्चंद्रनेजप्य एव च। द्वापदोषत्रे धापस्वै नमित्यादिमंत्रपूर्वकसे
भ्वानस्पत्योर्जपंपत्रत्वेनादृष्टार्थतात्स्मुत्स्य। सौम्याः प्रसिद्धा। वानस्पत्यो वनस्पते त्रातवत्। विरोदे
ति। अस्य दृपव हितदेशादेव सिद्धस्येवानुवादः। पितामहः चतुर्हस्ता तुला कार्या पादौ कार्यौ तिथा
विधौ। अंतरं तु तयोर्हस्तौ भवेदध्यर्धमेव च। व्यासः। हस्तद्वयं निखेयं तु पादयोरुभयोरपीति पिताम
हः। चतुरस्रा तु रस्रा तुला कार्या दृढा ऋज्वी तथैव च। कटकानि च देयानि त्रिषु स्थानेषु यत्नतः

व्य·म·

॥२१॥ तरणाशिक्यद्वयं समासमासज्य पार्श्वयोरपि। नागया न्वकल्पयेद्दर्भौ छिक्ययोरुभयोरपि। पश्चिमे तोलयेत्तत्र
र्हे नून्यस्मिन्मृत्तिकाम्शुभं॥ इष्टकानस्मपाषाणकपालास्थि विवर्जितो। नारदः। शिक्यद्वयं समासज्य घटक
र्कयोर्दृढं। एकत्र शिक्ये पुरुषमन्यत्र तुलयेच्छिलां। धारयेदुत्तरे पार्श्वे पुरुषं दक्षिणे शिलां। पिटकं पूरयेत्त
स्मिन्निष्टकं पांसुलोष्टकैः। परिक्षाप्रकारमाह स एव कार्यपरिक्षकैर्नित्यमवलंबसमो घटः। उदकं च
प्रदातव्यं घटस्योपरि पंडितैः। यस्मिन्नचलवते तोयं स विज्ञेयः समो घटः। साम्यार्थमवलंबावाह पिताम
हः तारणे च तथा कार्ये पार्श्वयोरुभयोरपि। घटायदुत्तरं स्यात्तं नित्यं दत्वा निरंगुलैः। स्वविलंबो वक
र्तव्यौ तोरणस्यामघोमुखौ। मृन्मयौ सूत्रसंबद्धौ घटमस्तकचुंबिनौ॥ पितामहतौ लयित्वा रंपूर्वं तं
स्मात्तमवतीर्य तु। धटं तु कारयेन्नित्यं पताकाध्वजशोभितं। ततस्त्वावाहयेद्देवान्विधिनानेन मंत्रवि रामः
त्। वदित्रतूर्य निर्घोषैर्गंधमाल्यानुलेपनैः। नारदः रक्तैर्गंधैश्च माल्यैश्च दध्यपूपाक्षतादिभिः। अर्चयेत्तु ॥४६२
घटं पूर्वं ततः शिष्टांस्तु पूजयेत्। याज्ञवल्क्यः तुलाधारणविद्वद्भिरभियुक्तस्तुलाश्रितः। प्रतिमानस

मीकृतो रेखां कृत्वावतारितः। त्वं तुले सत्यधामासि पुरा देवैर्विनिर्मिता। तत्सत्यं वद कल्याणि संशयान्मां
विमोचय। यद्यस्मि पापकृन्मातस्ततो मां त्वमधो नय। शुद्धश्चेद्गमयोर्ध्वं तु तुलामित्यभिमंत्रयेत्।
नारदः समये। परिकल्प्याय पुनरारोहयेत्तरं। निर्वाते च स्थिरहिते शिरस्यारोप्य पत्रकं समयैः परिकल्प्य
समयैर्नियम्यतानाह विष्णुः। ब्रह्मघ्नो ये स्मृता लोकाः कूटसाक्षिणः। तुलाधारस्य ते लोकास्तुलां धा
रयतो मृषेति। पुनरारोहणकाले निमंत्रणमाह नारदः। त्वं वेत्सि सर्वभूतानां पापानि सुकृतानि च। त्वमे
व देव जानासे न विदुर्यानि मानवाः। व्यवहाराभिशस्तोयं मानुषः शुध्यते त्वया। तदेनं संशयादस्माद्धर्मत
स्त्रातुमर्हसि देवासुरमनुष्याणां सत्ये त्वमतिरिच्यते। सायसंधौ तु भगवन् शुभाशुभविभावने। आदि
त्यचंद्रावनिलोनलश्च द्यौर्भूमिरापो हृदयं यमश्च। अहश्च रात्रिश्च उभे च संध्ये धर्मश्च जानाति नरस्य
वृत्तमिति। पितामहः ज्योतिर्विदाः ब्राह्मणाः श्रेष्ठाः कुर्यात्कालपरीक्षणं। विनाड्यः पंच विज्ञेयाः परीक्षाकाल
को विदैः। साक्षिणो ब्राह्मणाः श्रेष्ठा यथादृष्टार्थवादिनः। ज्ञानिनः शुचयो लुब्धा नियोक्तव्याः नृपेण तु। यां संतिमा शिण

ग्र.म.

॥२२॥

सर्वेषुसत्सुहीनोऽपेतद्दा। विनाप्रः प ज्ञानिः दृशागुर्वञ्जरा घाणा॥षट्‌पाणस्पाद्दिनाउक्तेतिस्मृतौ। नारदः॥तुलितो
यदिवर्द्धितेविशुद्धःस्यान्नसंशयः समोपाहीयमानोवानविशुद्धोभवेन्नरः॥हृद्धिरूर्ध्वगतिः॥हानिरधोगतिः॥पि
तामहः॥अल्पपापसमोज्ञेयोबहुपापस्तुहीयते। अल्पत्वंसद्दृ॥इमतिहतत्वेन। यत्रतुशिष्टावचनेनैव
महदिमिहतत्वनिश्चयपापमात्रेचविप्रतिपत्त्यादिव्यहतेसमतातत्वदोषास्पन्वासंभवात्तुन। करणं अ
तएवबृहस्पतिः। तत्समंतुपुनस्तोल्योवर्द्धितोविजयीभवेदिति। पुनःकरणेकारणांतरमाहकात्यायनः॥
शिक्याच्छेदेतुलाभंगेतथाचापिगुणस्यच॥शुद्धेस्यसंशयंचैनपरिशुद्धेस्तुपुनर्नरः। व्यासः॥कक्षच्छेदेतुलाभंगे
धरककर्कटयोस्तथा॥रज्जुच्छेदेऽक्षभंगेवादृषाछद्रिपुनर्नृपाः॥इदंतुहष्टकारणाकभंगपरंत्वाकस्मिकभंगा
दौतुशुद्धएवकक्षच्छेदेतुलाभंगेघटकर्कटयोस्तथा॥रज्जच्छेदेक्षयोमागस्त्यपेवाशुद्धिमादिशेदितिस्मृत्यं
तरात्। कर्कशिक्यतस्तु। अत्रअस्तंमोपरिस्थापितस्त्वस्यधारः॥अत्राहविस्तोव्याननमंत्रिस्पनसोगप्रयोग
स्येतिव्याख्याः॥एवंतुवैगुण्यपापरिहारात्मोगः॥प्रयोगस्त्वावर्ज्जनीयइतिमदनः॥पितामहः॥अथप्रयोगः

रामः

॥४८श्री॥

॥कर्त्ताशुभेह्निपूर्वाह्णेपूर्वोक्तास्पनपद्दक्षमोपेगत्वानंषघेनायस्त्वेनमितिमंत्रेण वृक्षंछित्वासोमोधेनुंगो
तमस्त्रिष्टुपूजयेविनियोगःसोमोधेनुं वनस्पतेगाधिनोविश्वामित्रोवनस्पतिस्त्रिष्टुपूजपेविनियोगः॥वन॥
स्पतेशतवल्शोइतिजप्त्वाऽरद्दिलोकपालात्मृत्वेकनत्वाचतुर्दस्तदीर्घंचतुरंगुलंचतुरस्त्रंमध्येतत
योश्चचतुरंगुलवृत्तंमध्यउपरिनागेनयोर्ध्वयोनोगघत्रिभिककंटोकटकेवर्द्धितेतथुलांकुर्यात्सप्तहस्तावाच
तुरंगुलोन्नतोवेदिंकुर्यादितिकेचित्ततस्तत्परिहस्तस्यांशुचिदेशांतरेवाचतुरस्रंषट्‌हस्तंषटस्तादिधिकाः
द्वाहतचतुरस्तंवातचतुरंयोर्मध्येधोनागेस्त्रोहकर्कटिककटकचतुरिशाघाकारतुलावर्ज्जंवनपुनकाष्ठंनिवे
दंपतस्मिंस्तुलास्तोमरितनकटवउइशादिनावलंदक्षिणोत्तरयोस्तंभद्वयेनिरवायतेवेतुपर्युत्तरंगकाष्ठद्द्या
त्। तदेनतोरणंतच्चघटाद्दशांगलेद्वंएतादृशंचपश्चिमायामपिकोतोरणा। न्यामध्येवृषलंमानोन्नमयो
स्तत्संबधौगोलकरूपावकलेवोतुलाप्रांतस्कंशैकार्येसाम्यज्ञानाय। फलकपोश्चप्रागयाकुर्यात्तस्त्वणायाव
ततःकृतोकोपवासेवद्धोगोलकरूपावचलेवोतुलाप्रयोगोवाकृतोपवासत्रयंरविवारेसूर्योदयात्तरंसचैल

व्र·म:
॥२३॥

स्नानं शौचं कृतं कोपवासः प्राड्विवाकः पश्चिमविकल्पश्चारोप्य पूर्वदिग्विदे पाषेणेष्टकाम्लद्दृढारोप्य समंतोद्वयेत्
तत्परीक्षाथुदकप्रक्षेपादिना सत्यवादिनो विद्धेमकं राध्नकुर्युः ततस्तोल्लनकालेयेन संनिवेशेनोपपविष्टं
स्तन्निवेशज्ञानायतादृशं रेखां कृत्वां तमतारयेत् ततः शौचो धौदेशकाजैसकीर्त्यात्मष्ट द्विजापनायधुक
द्दिव्यं करिष्य इति संकल्प्य प्राड्विवाकमेकं चतुरो ऋत्विजश्च वस्त्रादिना वृणुयात् स्वास्तिवानाद्यपि कार्यमि।
ति स्मार्त्तं जरावार्या॥ प्राड्विवाकश्च प्रांजलिः सत्यं नारदछगएहेदि नगवान्धर्मश्चास्मिन्दिव्ये समाविशस्विति
लोकपालैश्च वस्वादित्यमरुद्गणेरिति॥ एवं धटे धर्ममावाह्य पश्चादंगदेवता आवाहयेत्॥ इंद्रं विघ्नमथक्षेद
सइं सेनु हृष्टपूईं आवाहने विनियोगः एवं सर्वत्र विनियो॥ ओं इंद्रविघ्ना स्तं इहागछ इह तिष्ठेति दक्षिणेय
ममावाह्य रणसं ध्यायेत्॥ त्वंनो वामदेवो वरुणस्त्रिष्टुप् त्वंतोऽग्नेवरुणस्य वरुणेहागछेह तिष्ठेति पश्चिमे
वरुणमावाह्य स्फटिकाभं ध्यायेत्॥ राजाधिराजायेति यंतयजुया कुवेर इहागछ इह तिष्ठेति उत्तरे कुवेरमा राम:
वाह्य स्वर्णाभं ध्यायेत्॥ अग्निमेधातिथिरग्निर्गायत्री ॐ अग्निं दूतं अग्ने इहागछेत इह तिष्ठेति॥ इति अग्ने॰ ॥४८॥

येऽग्निमावाह्य सुवर्णं ध्यायेत्॥ मोषुणोयोरा॥ कएवो निऋतिर्गायत्री ॐ मोषुणइहेत्यादि वाके ह्रस्वमं ध्यायेत्
तववायो व्यश्वो वायुर्गायत्री॥ अतववाय॥ इह तिष्ठ पूर्ववत्॥ धूम्रं ध्यायेत्॥ तमीशानं गौतमीशानो जगती
॥ ॐ तमीशानइहेत्य ष्टौ वसून्॥ धरो ध्रुवस्तथा सोमश्चापश्चैवानिलोनलः॥ प्रत्यूषश्च वसवोष्टे प्रकीर्तिता
॥ शावास्यका इंद्रावमध्येत्वा तु सामदोमत्स्याद्वादशा गायत्री॥ ॐ त्सान्नद्ध नियात हे इत्यादि द्वादशादित्या
नावाह्य धातार्यमा च मित्रमित्रश्च वरुणोंशो भगस्तथा॥ इंद्रो विवस्वान् पूषा च पर्जन्यो दशमः स्मृता॥ ततस्त्व
ष्टा ततो विरजघन्योज घन्यजः॥ इत्येते द्वादशादित्या नामभिः परिकीर्तिता॥ अग्ने ऽपश्चिमेोच्चारुद्रासः॥ शा
वाश्चका दशरुद्रा जगत॥ ॐ अश्चारुद्रासः॥ इह तिष्ठ नावाह्य वीरभद्रश्च शंभुश्च गिरिशमहायशाः॥ अजैक
कापाद्दहिर्बुध्न्यः पिनाकी चापराजित॥ भुवनाधीश्वरश्चैव कपाली च विशांपति॥ स्थाणुर्भगश्च भगवान्
रुद्राएकादशस्मृता॥ यमनिकृतिमध्ये गौरी र्मिमाच्चदी घतमा उ माजगती गौरीर्मिमाय इहोत्यामातृ शमावा
ह्य॥ ब्राह्मीमाहेश्वरी चैव कौमारी वैष्णवीतथा॥ वाराही च तथेंद्राणी चामुंडा सप्तमातरः॥ निकते॰ रुद्रस्तः ग॰

ग्गानां गच्छन्समदो गणाधिपतिर्जगतां ॐ गणानां त्वा ॥ इहेत्यादि गणेशं ॥ वरुणाद्युत्तरे मरुतो यस्यराजत्म गणो मरुतो ग
पत्नी ॐ मरुतो यस्य हि क्षये ॥ इहेत्यादि मरुत ॥ गगनस्पर्शनो वायुरनिलो मारुतस्तथा ॥ प्राणः प्राणेशजीवौ
च मरुतोऽष्टौ प्रकीर्तिता ॥ घटादुत्तरे जातवेदसे कश्यपगोत्र त्रिष्टुप् ॐ जातवेदसे ॥ इहेति दुर्गाए वसेतादे
वतान्यावाह्य पूजयेत् तत्र ॐ धर्माया ध्यं प्रकल्पयामी यम ॥ इत्यादि प्रयोगगणार्घ्यपाद्याचमनीयंस्नप
र्घ्याचमनीयस्नान वस्त्रयज्ञोपवीताचमनीय मुकुटकटकादिनपां ते धर्मादयदत्वा इन्द्रादीनां प्रणवा
द्यैः स्वस्वनाम निम्रतुर्थ्यंतेन मोते रघ्यादिषांतं पराथ्यर्तु समयेन दत्वा धर्माय गंधपुष्पधूपदीपनैवेद्या
नि दद्यात् पाद्यतानि च दत्वा इंद्रादीनां गंधादीनि मधुपूर्वं वद्द्यात् ॥ ततस्तु निर्ऋति दिशि स्वतस्तु दक्षि
णे किं कापिस्थापनादि पूर्व होमः कार्यः ॥ तत्र प्रणवं गायत्री मुच्चार्य पुनः स्वाहाकारांतः प्रणवस्तु च्चार्यन्त्या
ज्यचरुसमिधः ॥ प्रत्येकमष्टोत्तरशतं सवित्रे जुहुयु ॥ ततो नियुक्तमर्पयित्वे लिखेदनियुक्त ॥ त्वादित्यचंद्र रामः
वनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च अहश्च रात्रिश्च उभे च संध्ये धर्मश्च जानाति नातिनरस्य सत्व ॥ ५६५ ॥

मिति मंत्रं च लिखेत् ॥ तत्र पत्रं मस्तो ध्या नियुक्त शिरोगतं कुर्यात् ॥ इदं च धर्मावाहनादि शिरः पत्रदानांतं मे वेदि
कुम्भाधारणं तत्र न शाद्विवाको घटमभिमंत्रयेत् ॥ त्वं घट ब्रह्मणा सृष्ट परीक्षार्थं दुरात्मना ॥ धकारो धर्ममूर्ति
स्त्वं टकारो कुटिलेन रधृतो नावयसे यस्मान् घटस्तेनाभिधीयसे ॥ त्वं वेत्सि सर्वभूतानां पापानि सुकृतानि च
त्वमेव सर्वं जानीषेन विदुर्यानि मानवाः व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति ॥ तदेवं संशयादस्मा
त् धर्मतस्त्रातुमर्हसि ॥ इति मंत्रेण ततो नियुक्तः ॥ त्वं तुले सत्यधामासि पुरा देवैर्विनिर्मिता ॥ तत्सत्यं वद कल्याणि
संशयान्मां विमोचय ॥ यद्यहं पापकृन्मातः ततो मां त्वमधो नय ॥ शुद्धश्चेद्गमयोर्ध्वं मां इति तुलामभिमंत्रयेत् ॥
ततः प्राड्विवाक शिरोगतपत्रकं नियुक्तं यथास्थानं कंपयामास न्निवेशं च घटमारोप्य च पलकेत पेवतत्रा
स्थापयेत् ॥ यत्नं च पंचविंशुर्वर्णरोचार मितकालं ॥ तुच्छ पात्मकां तेपक्षस्पातेपर्यो का ज्ञेस्या प्सी ॥ कांतं वक्रेव
त्तं पूर्ण चिंह मत्वा शौत्रोचेत ॥ तुल्यामप्राटश्चेव रवेटो राङ्गः प्राघात्कूरत्तस्मा ध्याते हर्म्यस्यांतेरायै कांतकर्त
व्या ॥ तस्मिश्च काले शुद्धापरादं समुचिनि र्बलगौराजमग्नेन्यश्च नावेदनायो तत्र ब्राह्मणांश्च पितामहा मा॰

ङ्गिणो ब्रह्मणा। अभीष्टायपादर्घार्थवादिता। ज्ञानिनः अवयोः तुष्णीं नियोक्तव्यान्वपेणानु। ग्रांसंतुसाङ्गिणमर्वेशु
द्धान्वपेतदेति शुद्धमुद्धीनिर्गमहेतुश्च तुलितोपदिवडेत। समुद्रस्यान्तसंशय। सयोवाद्योपमानोवानवि
शुद्धोन्नवेन्तरः वर्द्धतउघस्मात्। हीयमानः अधोगामी इत्यर्थः। तेन मंत्रलिंगाविरोधः। तत्र समत्वेसदृदम्
तिपूर्वत्वे तात्मदोषता। हीनत्वे प्रशुन्नम् ति पूर्वत्वेन वकुदोषेतेतिविवेकः। पदात्वस तिदृष्टकरणेशीघ्रतरं शुछे
दोतुल्याककर्दपार्घेतेनोनरंगांदीनां नंगश्चतदाप्यशुद्धता। यदातुदृष्टकारणाकोष्टयोनगछेदेतिदः। पुनरा
रोपयेत्। ततस्ततोवतार्य प्राङ्गिधाकत्रस्ताद्विजोयपाविनवंद्हिणादिभिस्तोषयेत्। ततोदेवताउद्विष्टाब्रह्म
णस्यते यंतुदेवगणाः सर्वे इति विसर्ज्यसर्वं पाद्विवाकायसमर्प्ययेत्। अथाग्निविधिः पितामहः अथाग्नेर्विधं
प्रवक्ष्यामि यथावृद्धास्त्रवोदितं। कारयेन्मंडलान्यष्टौ पुरस्तान्नवसंमतं। अग्नेयं मंडलं वा द्वितीयवारुणं
तथान्ततीयंवासुदेवत्यं चतुर्थं यमदैवतं पंचमं त्विंद्रदेवत्यं षष्ठं कौबेरमुच्यते सप्तमं सोमदेवत्यं सावित्रं
त्वष्टमं तथा नवमं सर्वदेवत्यमिति वेदविदो विदुः। मदनरत्ने अष्टमंसर्वदैवतं पुरस्तान्नवमं यत्तु तन्म

हत्यार्घिचंद्रिः। गोमयेनकृतानि स्युरद्भिः पर्युक्षितानि चेति पपाव। मंडलानां परिमाणमरणौ। द्वात्रिंशदंगु
लं प्राक्मंडलान्मंडलांतरं। अष्टमिमंडलेरेवमंडलानां शतद्वयं। षट्पंचाशत्तमधिकं स्वमेकपरिकल्प
ना। मंडलान्मंडलांतरे मंडलानुवोः तरालतुवोश्चमिलित्वा द्वात्रिंशदंगुलानीत्यर्थः। तत्र षोडशांगुलं मंडलं मंड
लयोरंतराले च तावदेव। षोडशांगुलकं ज्ञेयं मंडलं तावदेरमिति याज्ञवल्क्योक्तः। पद्दिशोध्यपदं षोडशांगु
लाधिकं तदंतराले षोडशांगुलकं ज्ञेयं न्यूनमेव भवति। यद्दिशोध्यपदं षोडशांगुलादल्पं तदा षोडशांगु
लमंडलमध्येयदपस्मिण्णं वांतरमंडलं कार्यं मनुनारदः। शतद्वयमित्यस्याग्रेवारिंशाल्लमधिकं स्वमेरंगु
लमानतः इति पपाव। तदंष्टमनवमंडलांतरालं त्यागं विहाय योज्यं। तस्यगमनानर्हत्वात्। एवं चतुर्भिर्विंश
तिरारव्याता स्वमेस्तु परिकल्प्यतेति कल्पतरुक्तेपावेष्याधमवस्थितिमंडलं विहाया गुलपरिमाणं योज्यं
मंडलेमंडले दद्या... क्रमशः शास्त्रनचोदिता। विन्यसेचपदंतेषु कर्त्तानित्यमितिस्थितिः। मिताक्षरायां मदन
रत्ने च। चांसर्पेऽस्तु ऊर्ध्याद्यो घृतमधोत्तरं त्राते। अर्थवदोमपाव कायस्वाहेतिमंत्रेणार्कर्यइति विज्ञानेश्वर

व्र॰म॰ ॥२६॥

॥ नारदः॥ जात्येच लोह वरीयः कुशास्त्र श्चाग्निकर्मणि॥ इदं प्रयोगश्चान्य च्छातनायो ग्नौ प्रतीपयेत्॥ अग्निवर्णमय
पिंडंस स्फुलिंगं सु रक्षितं॥ पितामहः॥ अस्ति हीनं समंकृत्वाम्लष्टांगुल पयोमयं॥ पिंडं तु तापयेत्तच ग्नौ पं
चदूरा स्फुलिकापुराणो॥ पितातार्क पत्रिकं हत्ने वादयां गुलमापतोलो हमग्निमयं ध्यातं दयरा ज्ञाति शा
श्रिने॥ शास्त्र लिखितानु॥ पिंडस्य षोडशा पत्रत्वमाह॥ अथ वाससाश्वत्य पत्रांतरितं षोडशांपत्रमग्निमयं पिंड
मंजलिना धायेत्याहिणतच्छाशास्त्रो॥ तनायता पेतय्यनमितिनारदेनोक्तं त्रिवारं पिंडं संतप्येतत्र संताप्य जले
क्षिप्वा पुनः संताप्य जले क्षिप्वा तु पुनस्ताप्यमाने प्राड्विवाको धर्मो वाहनादि शिरः पत्रारोपणं तं कुर्यात्॥ तत्र
धर्मपूजायां विशेषमाह॥ पितामहः॥ तत्र पूजा ह ताशस्य कारयेन्मनुजाधिपः॥ रक्तचंदन धूपाद्यै रक्तपुष्पै
स्तथैव च॥ हारीतः॥ प्राङ्मुखस्तु ततस्तिष्ठेत्स सारिकं तं करांगुलि॥ आर्द्रवासास्तु विश्वे वधिरस्यारोप्य पत्रकं राम:
त्राध्य इति शेषः॥ पितामहः॥ प्रथमे मंडले तिष्ठेत्प्राङ्मुखः प्रांजलिः शुचिः॥ नारदः॥ हस्त क्षतेषु सर्वेषु कुर्या ॥४८७॥
इं स पदानि तु तान्येव पुनरालक्ष्ये हस्तौ विडुविक्षिप्रतो॥ याज्ञवल्क्यः॥ स्वः प्रांजलिः शुचिः नारदः॥ हस्तस

तेषु सर्वेषु कुर्याद्दं सपदानि तु॥ तान्येव पुनरालक्ष्ये हस्तौ विंडुविचित्रतो॥ याज्ञवल्क्यः॥ कारौ विमृदित ब्रीहे
रं कपित्वात ततोन्यसेत्॥ सप्ताश्वत्थस्य पत्राणि तावत्सूत्रेण वेष्टयेत्॥ तावदिति॥ क्रियाविशेषणं तेन सप्तवारं
वेष्टयेदिति विज्ञानेश्वरः॥ तावन्मात्राणि समाहारस्तावत्संतं तेन तावत्सूत्रेण सप्तसूत्रासह वेष्टयेदित्य
र्थ इति मदनः॥ पितामहः॥ सप्त पिप्पल पत्राणि न्यूतानसुमनोदधि हस्तयोर्निक्षिपेत्तत्र सूत्रेण वेष्टनं तथा
श्वत्रे प्राड्विवाकस्य पिंडस्त्वग्निमंत्रेणमंत्राप्रयोगवदर्पते॥ याज्ञवल्क्यः॥ त्वमग्ने सर्वभूतानामंतश्चरसि
पावक॥ साक्षिवत्पुण्यपापेभ्यो ब्रूहि सत्यं कवे मम॥ तस्येत्युक्तवतो लोहं पंचाशत्पलिकं समं॥ अग्निवर्णं
न्यसेत्पिंडं हस्तयोरुभयोरपि॥ पितामहः॥ ततस्तत्त्वमुदायाद्धा पराजा धर्मपरायणः॥ संदंशेन नियुक्तो वाह
स्ते योस्तस्य निक्षिपेत्॥ नारदः॥ हस्ताभ्यां तं समादाय प्राड्विवाक समीरितः॥ स्थित्वैकस्मिंस्ततोन्यानि व्रजेन्सप्त
त्व जिस्त तगः॥ पितामहः॥ त्वरमाणोनं छेत्तुस्वस्थो गच्छेच्छनैः शनैः॥ न मंडलमतिक्रामेन्नांतरा स्थापयेत्पदं॥ अ
ष्टमं मंडलं गत्वा नवमे निक्षिपेद्बुधः॥ पिंडस्तु सहितेन नवम मंडले शनैः शनैः॥ न मंडलमतिक्रामेन्नांतरास्थापयेत्

पदं॥ अष्टमं मंडलं गत्वा नवमे निक्षिपेद्बुधः॥ पिंडस्तु न्यस्य तेनैव नवमं मंडले निक्षेप्यः॥ मंडलानि तथा समषोडशां-
गुलमानत॥ तावदंतरतो गच्छेदुत्थान वत्सरो क्षिपेदिति कालिकापुराणात्॥ पितामहः॥ तत्रस्तद्विनिर्दिष्टो त-
कात्यायनः॥ प्रस्खलत्यभियुक्तश्चेत्स्थानादन्यत्र दह्यते। न तदग्धं विदुर्देवास्तस्य भूयोपि दापयेत्॥ याज्ञ-
वल्क्यः॥ अंतरा पतिते पिंडे संदेहे वा पुनर्हरेत्॥ अथ प्रयोगः॥ पूर्वेद्युः शुद्धिं विधाय परेद्युर्नव मंडला-
नि कार्याणि तत्राद्यं षोडशांगुलं विधाय यावत्षोडशांगुलं ऽन्तरां भागो द्विभावि तत्र द्वितीयभागे गत्पदप्रमाणं
द्वितीये मंडलं कार्यं। अवशिष्टमंतरालं भवति। एवमेव तृतीयाद्यष्टमं पर्यंतमंतरालसहितानि तान्यपि षोडशां-
गांगुलमंतरालं मुक्त्वा नवमम् परिमितांगुलप्रमाणं कार्यं। तथा चाष्टानां मंडलानां अंतरालानां च मिलि-
तांगुलानां षट्पंचाशदधिकं शतद्वयं संपद्यते। तिर्यग्यवोदराण्यष्टौ ऊर्ध्वा व्रीहय एवं प्रमाणा-
मंडलस्योक्ते वितस्ति द्वादशांगुलं। हस्तो वितस्ति द्वितयं दंडो हस्तचतुष्टयं। तत्र हस्तद्वय कोशो योज-
नं तच्चतुष्टयं। वितस्त्याद्यंतरत्रयोदश योज्यते। ततः प्रथमादिषु नवसु मंडलेष्वधिदेवताः क्रमेणाग्निव-

रुणौ वायुयमाविंद्रकुबेरसोमं सवितारं सर्वदेवतांश्च संपूज्य मंडलं न्नागादक्षिणप्रदेशे लौकिकमग्निमु-
पसमाधायाग्नये पावकाय स्वाहेत्याज्येनाष्टोत्तरशतं जुहुयात्॥ द्विवोका ज्ञात सर्पीत तस्मिन्नेवाग्नौ त्रिरादि-
तं द्वत्तं सह्त्राम षोडशांगुलायामं पंचाशत्पलसंमितमयः पिंडं प्रक्षिप्य तस्मिंस्ताप्यमाने धर्मावाहनादि
हवनांतं घटविध्युक्तमनुष्ठानकांडं कृत्वा तायतापि वर्त्तमानेऽयःपिंडमग्निमभिमंत्रयेदभिमंत्रः प्रा-
द्विवाक॥ त्वमग्ने वेदाश्चत्वारस्त्वं च यज्ञेषु हूयसे॥ त्वं मुखं सर्वदेवानां त्वं मुखं ब्रह्मवादिनां॥ जठरस्थो हि भू-
तानां ततो वेत्सि शुभाशुभं॥ पापं पुनासि वै यस्मात्तस्मात्पावक उच्यते॥ पापेषु दर्शयात्मानं अर्चि-
ष्मान् भव पावक॥ अथवा शुद्धभावेषु शीतो भव हुताशन॥ त्वमग्ने सर्वभूतानामंतश्चरसि साक्षिवत्॥
त्वमेव देव जानीषे न विदुर्यानि मानवाः॥ व्यवहाराभिशस्तोयं मानुषः शुद्धिमिच्छति॥ तदेनं संशयादस्मा-
द्धर्मतस्त्रातुमर्हसीति॥ लोहस्तु धर्मपिंडं तु तप्तलोहपिंडमुदके निक्षिप्य पुनः संताप्योदके निक्षिप्य पुनः संता-
प्योदके निक्षिप्य पुनः संतापनं तृतीयस्तापः। एवमभिमंत्रितं तु तप्तमग्निवर्णमयःपिंडं संदंशेन गृहीत्वा

व्य.म.

॥२८॥ प्राड्विवाकउपोषितस्नातस्त्वार्द्रवासाः॥ त्रिविधप्रतिज्ञापत्रस्योपरिष्टान्मे मंडलेति प्रतं दिव्यकर्तुः पुरतस्थानीय
त्वमग्ने सर्वभूतानां मंतश्चरसि पावक। साक्षिवत्पुण्यपापेभ्यो ब्रूहि सत्यं कवे मम॥ इति दिव्यकर्तारं मंत्रि
तं तस्य कृतसंस्कारयोर्हस्तयोर्निक्षिपेत्। कृतसंस्कारयोर्व्रीहीन्मर्दयित्वा जनितयोस्तिलकालव्रणकि
णादिस्थाने घलक्तकरसादिनांकयित्वा समानप्रमाणस्य पत्राणि अजानेर्कपत्राणि सप्तसमीपत्राणि सप्त
दूर्वापत्राणि॥ अक्षतान्दध्यक्तान्धुतान्पुष्पाणि च विन्यस्य सप्तभिः सूत्रतंतुभिः सहहस्तौ वेष्टितयोः ततो दि
व्यकर्तारं द्वितीयादीन्यष्टमांतानि मंडलेष्वपदं निक्षिपन्सप्तपदानि शनैर्गत्वाजलिस्थमयःपिंडं नवमे
निक्षिपेत्। ततः पुनः कराभ्यां व्रीहीन्मर्दयित्वा अदग्धहस्तश्चेत्शुद्धो भवति॥ इत्यग्निदिव्यविधिः॥ अथ जल
विधिः॥ पितामहः॥ तोयस्याथ प्रवक्ष्यामि विधिं धर्म्यं सनातनं। मंडलं धूपदीपाभ्यां कारयेत्तु विचक्षणः॥
॥ शरान्संपूजयेत्तत्र वेणुं धनुश्च तत्परं॥ मंगलैः पुष्पधूपैश्च ततः कर्म समाचरेत्॥ धूपदीपाभ्यां शरा रामः
न्संपूजयेदित्यन्वयः॥ प्रमाणं च मंडलं कार्यं धनुःपरिमाणाद्याह नारदः॥ क्रूरं धनुः सप्तशतं मध्यमं ष ॥४६९॥

ट्शतं स्मृतं। मंदं पंचशतं ज्ञेयमेष ज्ञेयो धनुर्विधिः॥ मध्यमेन तु चापेन प्रक्षिपेच्च शरत्रयं। हस्तानां तु शते
सार्धे लक्ष्यं कृत्वा विचक्षणः॥ सप्तशतं सप्ताधिकशतांगुलं। एवं षट्शतं पंचशतं च कात्यायनः॥ शरीरश्चानायसां
स्याश्च प्रकुर्वीत विशुद्धये। वेणुकांडमयाश्चैव क्षेप्ता तु सुदृढं क्षिपेत्॥ नारदः। गत्वा तु तज्जलस्थानं तटे तोरण
मंडिते। कुर्वीत कर्ममात्रं तु भूमिभागे समे शुचौ। गंधमाल्यैः सुरभिभिर्मधुक्षीरघृतादिभिः॥ वरुणाय प्रकु
र्वीत पूजामादौ समाहितः॥ ब्राह्मणः क्षत्रियो वापि रागद्वेषविवर्जितः। नाभिमात्रे जले स्थाप्यः पुरुषः स्थाणु
वद्दृढः॥ पितामहः॥ स्थापयेत्प्रथमं तोये सत्येन ऋजुरूपं नृपः॥ आगातं प्राङ्मुखं कृत्वा तोयमध्येऽनुकारिणं॥
ततस्त्वावाहयेद्देवं वा सलिलं चानुमंत्रयेत्। देवा धर्मावाहनादि भिन्नाभिरोपणानां कुर्यात् इत्यादि अनु
मंत्रणमंत्राः प्रयोगे द्रष्टव्याः॥ व्यासः॥ सत्येन माभिरक्ष त्वं वरुणेत्यभिशाप्य कं। नाभिदघ्नोदकस्थस्य गृहीत्वो
रू जलं विशेत्॥ कमुदकमभिशाप्याभिमंत्र्येत्यर्थः। बृहस्पतिः॥ अथ प्रवेशपुरुषं प्रक्षिपेत्साप कर्त्रयं।
पितामहः॥ द्वे शते तु क्षत्रियः कार्यं तत्र तिर्ब्रात्मणो पिवा ... ततः सोपवासस्तथा शुचिः॥ कात्या

यत॥ क्षिप्तेषु मज्जनं कार्यं गमनं समकालिकं॥ मज्जनसमकालिकमित्यर्थः॥ नारदपितामहौ॥ शरप्रक्षेप
णस्थानाद्धि वाजववसमन्वितः॥ गच्छेत्परमया शक्त्या यत्रासौ मध्यमः शरः॥ मध्यमशरमादाय पुरुषान्यु
स्तथाविधि॥ अस्मागच्छेत्पुरवेगेन पतःसपुरुषोगतः॥ आगतस्तु शरग्राही न पश्यति निमज्जले॥ अंतर्ज
लगतं सम्यक् तदाशुद्धं विनिर्दिशेत्॥ अन्यथान विशुद्धः स्यादेकांगस्यापि दर्शनात्॥ स्थानाद्वान्यत्र गम
नाद्यस्मिन्पूर्वं निवेशितः॥ एकांगस्येति कर्णपरं तथा च कात्यायनः॥ शिरोमात्रं तु दृश्येत न कर्णौ नापि नासि
का॥ अप्सु प्रवेशने यस्य शुद्धं तमपि निर्दिशेत्॥ पितामहः॥ शरस्य पतनं ग्राह्यं सर्पणं परिवर्जयन्॥ नारदः॥ पं
चाशतं धावकानां योऽस्याताम धिकौ यवौ॥ तौ च तत्र नियोक्तव्यौ शरानयनकारणात्॥ अथ प्रयोगः॥ जलस्था
नं नदीसागरह्रदे देवखातसरस्तडागादि स्थिरतोयं योज्यं अल्पमाहार्यंतृणशैवालोर्मिपंकग्राहज
न्तुकमत्स्यादियुक्तं शीघ्रवेगमित्यादि वर्ज्यं॥ तत्र नाभिदघ्ने जले यज्ञियवृक्षोद्भवा धर्मस्तूणाकार्या॥ तत्सन्नि
धौ पश्चिमतीरदेशे शोध्यकर्णाच्छ्रि ततोरणं कार्यं॥ तत्समीपे षडुत्तरतां गुल्लवेणवे धनुरानीय साग्रवे

णवास्त्रयः शराश्च स्थाप्याः॥ तोरणात्सर्द्दशतहस्तमिते तु देशे लक्ष्यस्थाप्यं ततः सशरं धनुः श्वेतगंधमाल्या
दिभिः संपूज्य जनाशयवरुणसावाह्य पूजयित्वा तत्रेति धर्मावाहनादि पूर्वनं तं पूर्वोक्तिं निर्वर्त्य शोध्यशिर
सि प्रतिज्ञापत्रमाबध्य प्राड्विवाको जलमभिमंत्रयेत्॥ तोयत्वं प्राणिनां प्राणः सृष्टेराद्यं तु निर्मितं॥ शुद्धेश्च
कारणं प्रोक्तं द्रव्याणां देहिनां तथा॥ अतस्त्वं दर्शयात्मानं शुभाशुभपरीक्षणे इति॥ ततः शोध्योपि सत्येन
मा निरूस्त्वं वरुणेत्यभिमंत्रयेत्॥ क्षत्रियस्तु द्विजास्तणेधानायसमात्रान् त्रीन् शरान् लक्षं प्रति सु
हृढं क्षिपेत्॥ ततः एकस्मिन्नविनि पुरुषे मध्यमं शरं गृहीत्वा तस्य प्रसर्पणस्थानं विहाय पतनस्थाने स्थितेऽन्ये
नजविना शरमोक्षस्थाने तोरणमूले स्थातव्यं॥ जवी च यं चाशतीधावकानां मध्ये जवाधिका॥ ततस्तोरणमूले
स्थितेन प्राड्विवाकेन करतालिकात्रये दत्ते तृतीयकरतालसमकालमेव शोध्यतोरणमूलस्थजविन्योम
ज्जनं तदुत्तरगमने कार्यौ॥ मज्जनं चावष्टभ्य धर्मस्तूणस्योरू गृहीत्वा कार्यं॥ ततस्तस्मिन्मध्यमशरपात
स्थानं गते तत्रस्थितशरग्राहकेऽनु ततस्तोरणं गत्वा जलांतर्गतं शोध्यं यदा पश्यति तदासौ शुद्धः॥ शिरोमात्र

दर्शने पिशुद्धो न कर्णो घ्यं गांतरदर्शने निमज्जनस्थानादन्यत्र गते वा॥ इत्युदकविधिः॥ अथ विषदिव्यविधि
॥ तत्र नारदः॥ दद्याद्विषं सोपवासो देवब्राह्मणसन्निधौ॥ धूपोपहारमंत्रैश्च पूजयित्वा महेश्वरं॥ द्विजा
नां सन्निधावेव दक्षिणाभिमुखे स्थिते॥ उदङ्मुखः प्राङ्मुखो वा दद्याद्विप्रः समाहितः॥ वर्षे चतुर्यवा मात्रा यो
ग्ये पंच यवाः स्मृताः॥ हेमंते सप्तयवा नारदस्यात्ततो पि हि॥ अल्पात्त्रिपवा हेमंतशिशिरस्याप्युपलद्रोकः
तयोः समाख्याते॥ वसंते तस्क सर्वदिव्यसारणे पंच ग्राणाव॥ तत्रापि सप्तयवा मात्रेयि विज्ञानेश्वरः॥ विषं त्रि
शाङ्गुलाष्टनपुं देयं पूर्वाह्णे शीतले देशे विषं देयं तु देहिनां॥ घृतेन योजितं सम्यक् पिष्टं त्रिंशद्गुणान्वितः मि
ति कात्यायनोक्तः॥ विषाभिमंत्रणमाह याज्ञवल्क्यः॥ विष त्वं ब्रह्मणः पुत्रः सत्यधर्मे व्यवस्थिता॥ त्रायस्वा
स्मादभिशापात्सत्येन भव मेऽमृतं॥ नारदः॥ छायाविनिर्मितोरक्षेदिनशेषमभोजनः पिविषवेगक्लमा राम:
तीत शुद्धो सौ मनुरब्रवीत्॥ विषपरिमाणबाहुल्ये त्वव धतरमाहस्म एव॥ पंचताल्लशत कालं निर्विका
रो न वेध्यदा तदा भवति संशुद्धस्ततः कुर्याच्चिकित्सतमिति विषवेगाश्च विषतंत्रे॥ वेगो रोगो घोरश्चवति ॥४८५॥

विषजः स्वेदवक्रोपशोषौ तस्मो धर्मस्ततपरो दौर्बल्यु पिजनयते वर्णांभिदे च वेयो॥ यो वेगः पंचमो सो नयनविव
र्णतां कंठभंगं च हिक्का षष्ठो निःश्वासमो हो द्विज इति च सप्तमो मृत्यु तिस्र सप्तमो नष्टाकस्य अत्र सोपवासेन प्राड्वि
वाकेन महादेवाये विषं संस्थापितं भक्षयेदिति॥ अथ कोशविधिः॥ पितामहः॥ भक्तो यो यस्य देवस्य पा
पयेत्तस्य तज्जलं॥ समभावे तु देवानां आदित्यं तु पापयेत्॥ दुर्गायाः पाययेच्चौरान्ये च शस्त्रोपजीविनः॥ भास्क
रस्य तु यत्तोयं ब्राह्मणं तन्न पाययेत्॥ वृहस्पतिः॥ यदुक्तः सो नियुक्तं स्यात् देवायुधमंडलं॥ प्रक्षाल्य पाययेत्तस्मा
ज्जलात्तु प्रसृतित्रयं॥ नारदः॥ तमाहूय तु निराहारं तु मंडलाभ्यंतरे स्थितं॥ आदित्याभिमुखं कृत्वा पाययेत्प्र
सृतित्रयं पूर्वोक्तेन विधानेन स्नातं नमार्द्रवाससं शुचिं॥ नारदः॥ अर्चयित्वा तु तं देवं प्रक्षाल्य सलिलेन
तु॥ एनं च श्रावयित्वा तु पाययेत्प्रसृतित्रयं॥ अत्र सोपवासः प्राड्विवाकः॥ सर्वाण्येव देवमभ्यर्च्य तत्स्नानो
दकं गृहीत्वा धर्मावाहनादि शिरः पत्रारोपणांतं कृत्वा जलं दिव्योक्तमंत्रेणाभिमंत्र्य तत् ज्ञोध्यो
पितउक्तेनैव निमंत्र्य भक्षयेदिति॥ वृहस्पतिः॥ सप्ताहाद्वा द्विसप्ताहाद्वा यस्यार्तिर्न न प्रदृश्यते पुत्रदारधना

व्या मः

॥३२॥

नोचेत्स शुद्धः स्यान्नसंशयः ॥ अथ तंडुलविधिः ॥ पितामहः ॥ तंडुलानां प्रवक्ष्यामि विधिं भक्षणयोधितं चौर्ये ति
तंडुला देया नान्यत्रेति विनिश्चयः ॥ तंडुलान्कारयेच्छुक्लान् शालेर्नान्यस्य कस्यचित् ॥ मृन्मये भाजने कृत्वा
आदित्यस्याग्रतः शुचिः ॥ स्नानोदकेन संमिश्रान् रात्रौ तत्रैव वासयेत् ॥ आवाहनादि पूर्ववत्तु कृत्वा रात्रौ विधा
नतः ॥ कात्यायनोपि ॥ देवतास्नानपानीयदिग्धतंडुलभक्षणे ॥ शुद्धनिष्ठीवनाछद्वोनियमोशुचिरन्यथा
पितामहः ॥ शोणितं दृश्यते यस्य हनुस्तालु च शीर्यति ॥ गात्रं च कंपते यस्य तमशुद्धं विनिर्दिशेत् ॥ अथ तप्त
माषविधिः ॥ पि तप्तमाषस्य प्रवक्ष्यामि विधिमुद्धरणे शुभे ॥ कारयेदायसं पात्रं ताम्रं वा षोडशांगुलं ॥ चतुरंगु
लखातं तु मृन्मयं वापि मंडलं ॥ पूरयेद्घृततैलाभ्यां विंशत्यापि पलैस्तु तत् ॥ सुवर्णमाषकं तस्मिन्सुतप्ते
निक्षिपेत्ततः ॥ अंगुष्ठांगुलियोगेन तप्तमाषकमुद्धरेत् ॥ कराग्रं यो न धुनुयाद्विस्फोटो वा न जायते शु रामः
द्धो भवति धर्मेण निर्विकार करांतरमाहस्मरण वा सौवर्णे राजते ताम्रे आयसे मृन्मयेपि वा ॥ गव्यं घृतमु
पादाय तदग्नौ तापयेच्छुचिः ॥ सौवर्णीं राजतीं ताम्रीमायसीं वा सुशोधितां ॥ सलिलेन सकृद्धौतां प्रक्षिपे ॥४८२॥

त्तत्र मुद्रिकां ॥ अमदीप्तितरं गाये अनखस्पृष्टं गोचरो पराज्ञेनाङ्गपर्णेन चुरुकारं सुघोषकं ॥ ततस्थानेनमं
त्रेण समृद्धाभिमंत्रयेत् ॥ परं पवित्रममृतं घृतत्वं यज्ञकर्मणि ॥ दह पावक पापं त्वं हिमशीतं शुचौ भव ॥ उपो
षितं ततो स्नातमार्द्रवाससमागतं ॥ ग्राहयेन्मुद्रिकां तां तु घृतमध्यगतां तथा ॥ प्रदेशिनी चनस्याथ परीक्षेयु
:परीक्षेयुः परीक्षकाः ॥ यस्य विस्फोटकानस्युः शुद्धोसावन्यथाशुचिः ॥ अथ फालविधिः ॥ बृहस्पतिः ॥ आयसं द्वादश
पलं घटितं फालमुच्यते ॥ अष्टांगुलं भवेद्दीर्घं चतुरंगुलविस्तृतं ॥ अग्निवर्णं तु तच्चौरो जिह्वया लेलिहेत्सकृ
त् ॥ न दग्धश्चेच्छुद्धिमियादन्यथा तु स हीयते ॥ अथ धर्मजविधिः ॥ पितामहः ॥ अधुनासंप्रवक्ष्यामि धर्मपरीक्षणा
हेतृणां पावमानानां प्रायश्चित्तार्थिनान्नृणां ॥ राजतं कारयेद्धर्ममधर्मं सीसकायसं ॥ लिखेद्भूर्जपटे वापि धं
धर्माधर्मौ सितासितौ ॥ अभ्युक्ष्य पंचगव्येन गंधमाल्यैः समर्चयेत् ॥ सितपुष्पास्तु धर्मः स्यादधर्मोसितपुष्पधृक् ॥
एवं विधायोपलिप्य पिंडयोस्तौ निधापयेत् ॥ गोमयेन मृदा वापि पिंडौ कार्यौ समंततः ॥ मृद्भांडके उपहृतेस्थाप्यौ च
नुपलक्षितौ ॥ उपलिप्ते शुचौ देशे देवब्राह्मणसन्निधौ ॥ आवाहयेत्ततो देवान्लोकपालांश्च पूर्ववत् ॥ धर्मोवा

ध॰म॰
॥३२॥

हनपूर्वंतु प्रतिज्ञापत्रकं लिखेत् । यदि पापविमुक्तोहं धर्मस्त्वायातु मे करे । अभियुक्तस्ततश्चैकं पत्रं गृह्णीता
वि॰लंबितं । धर्मे गृहीते शुद्धः स्यादधर्मे तु स हीयते । एवं समासतः प्रोक्तं धर्माधर्मपरीक्षणं । बृहस्पतिः । प
त्रद्वयलेखनीयौ धर्माधर्मौ सितासितौ । जीवदानादिकैर्मंत्रैर्गायत्र्याद्यैश्च सामभिः । आमंत्र्य पूजयेद्गंधैः कुसु
मैश्च सितासितौ । अभ्युक्ष्य पंचगव्येन मृत्पिंडांतरितौ ततः । समौ कृत्वा कुंभे निक्षिप्यौ चानुपलक्षितौ । ततः कुं
भात्पिंडमेकं प्रगृह्णीताविलंबितं । धर्मे गृहीते शुद्धः स्यात्स पूज्यश्च परीक्षकैः । अथ प्रयोगः । पत्रद्वये शुक्लं
धर्मं कृष्णमधर्मं पुत्तलकरूपं विधाय आं ह्रीं क्रों यं रं लं वं शं षं सं हों सो धर्मस्य प्राणाः पुनरपामंत्र पवि
त्वा धर्मस्याऽवाहयेत् । पुनरपि तमेव पवित्वाधर्मस्य चेड्या । शिवाशुनो नेत्रश्रोत्रघ्राणप्राणा इहा
गत्य सुखं चिरं तिष्ठंतु स्वाहा । अनेन जीवदानं धर्मप्रतिमायाः कृत्वा गायत्र्यादिसामध्वनिना तेनैव नो चेत्तत्सव्याहृ
ति प्रणवगायत्र्या पवित्वा आवाहनादि कृत्वा यथाक्रमं शुक्लकृष्णपुष्पाभ्यां धर्माधर्मौ संपूज्य प्रणवेन पंच राम:
गव्यमादाय अभ्युक्ष्य शुक्लपक्षे प्रयुक्तं धर्मम् स्पिंडद्वये कृत्वा नवे कुंभे स्थापयेत् प्राड्विवाकः । ततो धर्मावा ॥ ४८३ ॥

हनादि हवनांतं कर्म कृत्वा समंत्रकं प्रतिज्ञापत्रं संशोध्य शिरसि निबध्नीयात् । शोध्यः कृत यदि पापविशुद्धोहं धर्मस्त्वा
यातु मे करम् इत्युच्चार्य कुंभात्तयोरेकं गृह्णीयात् । धर्मे गृहीते शुद्ध इति ततो दक्षिणां दद्यात् । अथ शपथाः ॥
मनुः । सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः । गोबीजकांचनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः । बृहस्पतिः । सत्यं वा
हनशस्त्राणि गोबीजकनकानि च । देवब्राह्मणपादांश्च पुत्रदारशिरांसि वा । एते च शपथाः प्रोक्ताः स्वल्पेर्थे तु
कराः । महासाहसे च निक्षेपेषु दिव्यान्याह विशोधनं । याज्ञवल्क्यः । अर्वाक् चतुर्दशादह्नो यस्य नो राज
दैविकं । व्यसनं जायते घोरं स शुद्धः स्यादसंशयः । घोरं महत् स्वस्य देहिनापरिहार्यत्वादिति मिताक्षरायां । कात्याय
नोपि । अर्वाक् चतुर्दशादह्नो यस्य नो राजदैविकं । व्यसनं जायते घोरं स ज्ञेयः शपथैः शुचिः । व्यसनमापत् । घोरम
तिपीडाकरं स्वल्पस्य शारीरधर्मत्वादिति वाचस्पतिमिश्रस्मार्त्तमहाचार्यौ पुनः कात्यायनः । अपदैव विसं
वदेद्विसप्ताहं तु दापयेत् । अभियुक्तं प्रयत्नेन तमर्थं दंडमेव च । तस्यैकस्य न सर्वस्य जनस्य यदि तद्भवेत् । रोगो
ज्ञातिमरणीदात्राणां दाप्यो दममेव च । ज्वरातीसारविस्फोटगंडास्थिपरिपीडनं । नेत्ररुगलरोगश्च तथोन्मा

दः प्रजायते॥ शिरोरुग्गजनंगश्चैदैविका व्याधयो न्दणां॥ दैवविसंवादे ज्ञातिमरणादौ तस्यैकस्यापि। तेन देशव्या
पकमर्यादिव्यापकमर्यादिव्यावृत्तिः। अत्र तस्यैतस्य नेन पूर्वोक्तानियुक्तपरामर्षादनियुक्तस्यैव रोमादिर्भि
गलिंगं। ननु तत्पुत्रादेः सोपि च महान्नश्वस्य इति प्रागेवोक्तं॥ एतदभिप्रायेणैव। अभिप्रायेणैव नियुक्तस्य सा
धारणैरेगादिन गलिंगमित्यर्थ इति वाचस्पतिमिश्राः॥ अत एव ज्ञातिमरणमित्येवोक्तं न तु ज्ञातिरोगादिरिति
अपदायादिनिर्णयो गिस्वस्यां। तच्च क्रयप्रतिग्रहादिजन्यः शक्तिविशेषः तत्कारणतानुक्रयादीनां लोकव्यवहा
रादेव गम्यते। न शास्त्रात्। तदनभिज्ञानामपि तद्दर्शनात्। शास्त्रकल्पनायो गौरवाच्च। न च विवेके भवनाथोप्ये
वं। यत्तु गौतमः। स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेषु ब्राह्मणस्याधिकं लब्धं। विजितं क्षत्रियस्य नि
र्विष्टं वैश्यशूद्रयोरिति तल्लोकसिद्धकारणानुवादकं। स्वामित्वमर्थं स्वमान्येण पतत्वं भवति तस्मिन् रिक्थ
मिति प्रसुज्जलोका। क्रयप्रतिग्रहादिवारपिंतु मात्रपदं। अत्र तादृश्यमेव रिक्थपदे शक्यं। कार्यादिस्वत्वो
पापतमभिव्याहारात्। नागृहीतविशेषणान्यायाच्च। पितरि जीवति तद्द्रव्ये पुत्रादीनां पूर्वमनुत्पन्नमेव स्व रामः
।५९८।

त्वं स्वं तत इत्येवमादिवचनेन पुत्रसंविभागेन जन्यते इति धारेश्वराचार्यः स्मृतिसंग्रहकारश्च तन्न। उत्पत्त्यैवार्थ
स्वामित्वं लभेत इत्येवमादिवचनेन पुत्रोत्पत्तेरेव पितृधने पुत्रनिरूपितस्वत्वोत्पादकत्वावबोधनात्। अन्यथापि
तामहोपात्तानि बन्धोऽयमेव च। तत्र स्यात्सदृशं स्वाम्यं पितुः पुत्रस्य चोभयोरिति याज्ञवल्क्यवचनं च। न चेदं पिता
महमरणस्यैव स्वत्वोत्पत्तिहेतुत्वं गमयति न पुत्रोत्पत्तेः। मरणकालेऽनुत्पन्ने पौत्रे तदभावप्रसंगात्। वस्तुतस्तु
पितामहद्रव्ये समपि वक्तितं अन्यथा प्रपितामहाद्युपात्ते सदृशं स्वाम्याभावप्रसक्तेः। अनुवादविशेषणत्वाच्च।
यत्तु देवलः। पितर्युपरते पुत्रा विभजेयुर्धनं पितुः। अस्वाम्यं हि भवेदेषां निर्दोषे पितरि स्थिते इति तत्र पूर्वार्द्धं
तावद्विभागकालविधायविधिप्रत्ययश्रवणात्। उत्तरार्द्धं तु तस्यैव वक्तव्यर्थतया ऽस्वातंत्र्यपरं न तु सत्त्वाभा
वपरं। एतेन न जीवति पितरि पुत्रा रिक्थं भजेरन् यद्यपि स्यात् पश्चादधिगतं तैरनर्हा एव हि पुत्रा अपि धर्म
परस्वातंत्र्यादिति शंखवचोपि व्याख्यातं पूर्वार्द्धे निषेधार्थवादार्थे नंतरास्वातंत्र्ये अक्तिरिति प्रथपितौ पश्चादधि
गतं न्वयः ते पुत्रैः। पश्चादुत्पन्नैः। अधिगतं प्रतिग्रहादिनाप्रत्तां पुत्राद्भिः। प्रतिगृह्यते स्वत्वाविवादः

त्रत्राप्यस्वातंत्र्यं किमुत पित्रर्जित इति प्राप्तं तात्पर्यार्थः॥ इदं चास्वातंत्र्यं विभागकाम्यधर्मव्यवसायादिविषयं। अ
त एव हारीतः। जीवति पितरि पुत्राणामर्थादानविसर्गविभागाक्षेपेष्वस्वातंत्र्यमिति। अर्थादानविसर्गपदेन व्य
वसायो लक्षते। आक्षेपो दास्यादिनिर्भर्त्सनमिति मदनः। यत्तु मणिमुक्ताप्रवालानां सर्वस्यैव पिता प्रभुः। स्थाव
रस्य तु सर्वस्य न पिता न पितामहः। इति तत्कुटुंबोपजीव्यकधारणादावेव पितुः स्वातंत्र्यमात्रार्थं न तु दाना
दौ न वा पुत्रोत्पत्तेः स्वत्वकारणत्वनिह्नवार्थं। भोगानां रूपमणिप्रभृतिषु पादानादप्येष एवार्थो प्रतीयते। अत
एव स्थावरं द्विपदं चैव यद्यपि स्वयमर्जितं। असंभूय सुतान्सर्वान् दानं न च विक्रय इति दानविक्रयादीनामे
व विषेधो न भोगस्य। अतः पूर्वमपरिच्छिन्नं संविभागेन व्यवस्थाप्यते। तत्र समुदितद्रव्यगतपूर्वस्वनाशेन
न देशविभक्षणं तदुत्पद्यत इति केचित्। युक्तं तु पूर्वनाशस्य त्वांतरोत्पत्तिकल्पने गौरवात् वैमिकदेशाश्रि
मेवोत्पन्नं विभागेन विपदार्थविशेषनिष्ठतया ज्ञाप्यते॥ प्रकृतमुच्यते। ब्राह्मणस्याधिकं लक्षमिति। क्षत्रिय
हलक्ष्यविप्रस्याधिकं फलजनकमिति केचित्। रिक्थार्धापेक्षया विप्रस्यैवायमधिकउपायः। एवं क्षत्रिया

देर्जयादिरिति तु युक्तं जयेपि जितस्य पत्रग्रहे दोतु नसादौ स्वत्वमासीत् तत्रैव जेतुरप्युत्पद्यते जितस्य करं यावद्धि
तायां तु जेतुरपि नैव न स्वत्वं। अत एव सार्वभौमेन संपूर्णपृथ्वीमंडलजिकं न वसुमंडलं न देयमित्युक्तं षष्ठे। सं
पूर्णपृथिवीमंडलस्य ततन्नामसेवादौ स्वत्वं तु तत्तद्भौमिकादीनामेव। राज्ञां तु करग्रहमात्रं। अत एव स्था
नांतनपारिभाषिकस्वत्वदानादौन नदानासिद्धि॥ किंतु वृत्तिकल्पनमात्रमेव। भौमिकेभ्यः क्रीते तु गृहक्षेत्रादौ
स्वत्वमप्यस्त्येव। तेन तत्र भूदानस्यापि फलं भवति। निर्विष्टं कुसीदकृषिवाणिज्यपशुपालनलक्षणं सेवालब्धं
च। निर्वेशो भृतिर्भोग इत्यभिधानात्। भृतिसेवाभोगकुसीदादि। तत्राद्यं वैश्यस्य॥ द्वितीयं शूद्रस्य। अतो लौ
किकैव क्रयादीनां कारणत्वं वस्त्रायुगवाद्विजातत्वादौ स्वव्यवहारासंगच्छतेऽपायानां शास्त्रगम्यत्वे तु न
स्यात्। स्वायुगवाद्विजननरूपोपायस्य शास्त्रेणाबोधनात्। न तु स्वायुगवद्विजनने वस्त्वनार्यायामुत्पन्नं ताकन्या
पुत्रादावपि स्वत्वं स्यात्। इष्टापत्तौ विश्वजिति सर्वस्वं ददातीति विहिते सर्वस्वदाने कन्यापुत्रादिदानापत्त्या क
न्यापुत्रादिन देयमिति षष्ठसिद्धांतविरोध इति चेन्न गवादावि वभार्यायां स्वत्वाभावेन तस्यां सुतेन्ने पत्येऽपि

द्भावात्॥ लोके च स्वस्य त्वादौ ऽप्रतीतोत्पन्नेरेव स्वत्वकरणत्वेऽस्तु मं॰ भार्यायामपि प्रतिग्रहेण स्वत्वस्यादेवेति चेन्न
क्षत्रियादीनां प्रतिग्रहाभावेन तज्जायासु स्वत्वाभावात् तदपत्ये च पितृत्वाभाव॰। तेन सजातीयेष्वयं प्रोक्तस्तनयेषु
मुमया विधिरिति सजातीयस्यैव दत्तकस्य ग्राह्यत्वात्। क्षत्रियादेर्न प्रतिताबद्दत्तकप्रतिग्रहो गौणएव च न।
विप्रान्यतिसमुख्यः संभवतीति तद्विधौ युगपद्वृत्तिद्वयविरोधात्॥ न च पुत्रप्रतिग्रहविधिर्विप्राधिकारिक एव
नक्षत्रिया॥ द्यधिकारिक इति वाच्यं दौहित्रो भागिनेयश्च शूद्रस्यापि च दीपत इत्यादिशौनकादिवचोभिस्तद
धिकारिकत्वस्यापि स्वगमात्॥ एवं ब्राह्मणविधिना क्षत्रियादिकन्यया सह विप्रस्योद्वाहे दान प्रति प्रयोगेण
त्वमंगीकार्यं अन्यत्र मुख्यत्वमिति वृत्तिद्वयविरोधः। क्षत्रियान्यतिब्राह्मणादि विवाहप्रवृत्तिक्तः सर्वेषामति प्र
तिपत्तै वा अतएव पुत्रादीनां दानं गौणमिति तंत्ररत्ने भिन्नो॥ न च स्यु भार्यापुत्रकन्याइति शास्त्र क व्यवहा रामः
रात्स्वत्वकल्पना। तस्य रवः पितास्वामातोत्पादाविवज्ञातिवा च कत्वं नाप्युपपन्नं। अस्ति च ज्ञातावपि स्वश
ब्दस्य शक्तिः। स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धन इति कोशात्। पंचषष्टे गर्भदानमुक्तं न च त्वं॥ ॥धर्प६॥

॥ तस्मात् रिमुख्यदानप्रतिग्रहक्रयविक्रयाद्यभावेन स्वत्वाभावे तद्दत्तस्य गर्भदासेभ्युतरां तद्योगात्॥ इत्यलमप्र
संगिकं अपत्यय॥ असंसृष्टविभजनीयं धनं दायः॥ तथा च पूर्वसंसृष्टधनव्यावृत्तये ऽसंसृष्टमिति वृणितिष्टिरे
कीकृत्य विभज्यमाने दायभागशब्दप्रयोगात्। एवं च प्रमाणपरिभाषिकं संसरवितोऽपि निवृत्तिः। अत
एव स्मृतिसंग्रहे। पितृद्वारागतं द्रव्यं मातृद्वारागतं च यत्। कथितं दायशब्देन तद्विभागोऽधु
नोच्यत इति॥ निघंटौ वा। विभक्तव्यं पितृद्रव्यं दायमाहुर्मनीषिण इति। पितृपदं संबंधिमात्रोपलक्षणं। स्वयं
दायो द्विधा सप्रतिबंधो ऽप्रतिबंधश्चापन्नधनस्वामिनस्तत्पुत्रादेश्च जीवनं प्रतिबंधकं समसप्रतिबंधा। यथा
पितृव्यादिधनं। स्वतुस्वामिसंबंधादेव पुत्रादेर्धनार्जनोपायांतरनिरपेक्षात्स्वत्वं भवति सो ऽप्रतिबंधो यथा पितृ
धनं इति दायस्वरूपं। अथ तद्विभागः तमाह नारदः। विभागोऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते। दायभाग
इति प्रोक्तं तद्विवादपदं बुधैः। पुत्रैरिति पुत्रादीनामप्युपलक्षणं। पित्र्यस्येति पितामहादीनां। मत्स्तत्का पित्र्या
देरित्येव पपा॰। इदं च दायभागस्वरूपमुक्तं द्रव्यसाम्याभावे पित्वत्तोऽहं विभक्त इतिबुद्धिमात्रेणापि भव

व्य.म.
॥ ३६ ॥

त्येव विभाग॥ बुद्धिविशेषमात्रमेव हि विभाग। तस्यैवाभिव्यंजिकेयं व्यवस्था॥ अथ विभागकाल॥ मनु॥ ऊर्ध्वं पितु
श्च मातुश्च समेत्य भ्रातरः समं। भजेरन्पैतृकं रिक्थमनीशास्ते हि जीवतो॥ वराहेयादानेपिमरणमसुह्वयो
न विद्यते। अत एव मदनरत्ने स्मृतिसंग्रहे॥ पितृद्रव्यविभागः स्याज्जीवत्यामपि मातरि न स्वतंत्रतपास्वा
म्यं यस्मान्मातुः पतिं विना॥ मातृद्रव्यविभागो पितर्जीवति। पुत्त्रपत्नेषु यस्मान्न स्त्री धनस्य पतिः पतिः॥ ए
तदपवदति बृहस्पतिः॥ पितुरभावे भ्रातॄणां विभागः संप्रदर्शितः॥ मातुर्निवृत्ते रजसि जीवतोरपि शस्यते॥ नार
दः॥ अत ऊर्ध्वं पितुः पुत्रा विभजेयुर्धनं समं॥ मातुर्निवृत्ते रजसि प्रत्तासु भगिनीषु च॥ निवृत्ते वापि रमणे पितर्युप
रतस्पृहे॥ रमणः कामः। उपरतस्पृहो विरक्तः। प्रत्तासु भगिनीषु चेति काकाक्षिवद्रजोरमणनिवृत्त्योर्विशेषणं॥ गौ
तमः॥ ऊर्ध्वं पितुः पुत्रा रिक्थं विभजेरन्निवृत्ते रजसि मातुर्जीवति चेच्छतीति॥ इच्छतीत्यनेन रजोनिवृत्तिं विना
पि पितुरिच्छया विभाग उक्तः॥ क्वचित्तदिच्छां विनापि विभागमाह बृहस्पतिः॥ क्रमागते गृहक्षेत्रे पिता पुत्राः समांशि
नः॥ पैतृके न विभागार्हाः सुताः पितुरनिच्छया॥ अथ पैतामहद्रव्ये तदनिच्छयापि विभागार्हा इत्यर्थः॥ पैतामहे पि

राम:
।धर्ष्ठ॥

॥ क्वचित्पितुरिच्छयैव विभागमाह मनुर्विष्णू॥ पैतृकं तु पिता द्रव्यमनवाप्यं यदाप्नुयात्॥ न तत्पुत्रैर्भजेत्सार्द्धमका
मः स्वयमर्जितं॥ बृहस्पतिः॥ पैतामहं हृतं पित्रा स्वशक्त्या यदुपार्जितं॥ विद्याशौर्यादिनावाप्तं तत्र स्वाम्यं पितुः स्मृ
तं॥ प्रदानं स्वेच्छया कुर्याद्भोगं चैव ततो धनात्॥ नारदः॥ व्याधितः कुपितश्चैव विषयासक्तमानसः॥ अन्यथाशा
स्त्रकारी च न विभागे पिता प्रभुः॥ हारीतः॥ अकामं पितरि रिक्थविभागो वृद्धे विपरीतचेतसि दीर्घरोगिणि चेति॥ अ
कामे विभागेच्छारहित इति मदनरत्ने॥ विपरीतचेतास्त्वधर्मवर्ती॥ पितुरिच्छायामपि विभागो भवतीतिमा
व॥ पितर्यप्रसमर्थे ज्येष्ठपुत्रानुमत्या विभागमाह हारीतः॥ कामं दीने प्रोषिते आर्त्ते गते ज्येष्ठो वा पोषयितेति
शंखलिखितौ॥ पितर्यशक्ते कुटुंबस्य व्यवहारं ज्येष्ठः कुर्यादनंतरो वा कार्यज्ञस्तदनुमतेनेति॥ अनंतरो ऽनु
जः॥ कुटुंबभरणादिसमर्थेष्वयं विभागः॥ सर्वेषां तयोत्वेत्व नियम इति निष्कर्षः॥ याज्ञवल्क्यः॥ विभागं चेत्पिता कु
र्यादिच्छया विभजेत्सुतान्॥ ज्येष्ठं वा श्रेष्ठभागेन सर्वे वा स्युः समांशिनः॥ ऐच्छिकविभाग एव वृत्त उत्तरार्द्धेनाइच्छा
या संभवति उक्तपक्षद्वयानंतनजत्वेस्थानंत्र्यायोगात्॥ वा वचनेदा पक्षे॥ एकस्मै न्यूनं कस्मैचित्कापईकमन्यस्मै

नद्विमपीतास्य व्यवस्थापते श्चान्ये ह्वविनापेविशेषमाहमनुः॥ ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरं॥ ततोर्द्धं मध्यम
स्यस्यात्तदर्द्धं तु कनीयसः॥ उद्धारेनुद्धृते त्वेषामियं स्यादंशकल्पना॥ एकाधिकं हरेज्ज्येष्ठः पुत्रोध्यर्द्धं ततोपरः॥ अंश
मंशं यवीयांस इति धर्मो व्यवस्थितः॥ यमलयोर्मध्ये प्रथमप्रसूतस्य ज्यैष्ठ्यमनुराह॥ जन्मज्येष्ठेन चाव्हानं सुब्र
ह्मण्यास्वपि स्मृतं॥ यमयोश्चैव संज्ञासु जन्मतो ज्येष्ठता मता॥ यस्य जातस्य यमयोः पश्यंति प्रथमं मुखं॥ संतानः पित
रश्चैव तस्मिन्ज्येष्ठ्यं प्रतिष्ठितमिति॥ यत्तु पिंडसिद्धांतादिवैदिकग्रंथेष्वनंतरप्रसूतस्य ज्यैष्ठ्यमुक्तं तदनेककार्या
शेवाध्यते तस्यश्रुतिमूलत्वात्॥ मासेनस्तुद्वीनवनाति वत्सा यत्तु॥ डौतदा भवतो गर्भौ स्मृतिर्वैशा विपर्ययादित्यादि
ना॥ भागवते पश्चाज्जातस्य ज्यैष्ठ्यमुक्तं तदप्यनेन बाध्यते॥ पुराणेषु स्मृतिविरुद्धाचाराणां बहुशो दर्शनात्
देशाचारतो व्यवस्था ज्ञेयेति केचित्॥ युक्तं तु पूर्वोक्तमेवा अयं चोद्धारविभागः कलौ निषिद्धः कलिवर्ज्येषु
पाठात्॥ निर्गुणं चेदं समयमपूर्वेस्मानि॥ पितुरंशाद्यमाह नारदः॥ द्वावंशौ प्रतिपद्येत विभजन्नात्मनः
पिता॥ इदं त्वेकपुत्रपरं॥ सपद्येकपुत्रः स्याद्द्वौ भागावात्मनः कुर्यादिति शंखलिखितोक्तेरिति मदनरत्ने॥ ए

रामः
॥धर्म६॥

कपदं श्रेष्ठपरं॥ एकमुख्यान्यकेवलाइत्यमरोक्तेः॥ गुणवत्पुत्र इतिपापदितिपारिजाते पितामहार्जिते त्वेक
पुत्रेणापि सहसमं॥ शित्वमाह बृहस्पतिः॥ द्रव्ये पितामहोपात्ते स्थावरे जंगमे तथा॥ सममंशित्वमाख्यातं
पितुः पुत्रस्य चैव हि॥ याज्ञवल्क्यः॥ भूर्या पितामहोपात्ता निबंधो द्रव्यमेव वा॥ तत्रस्यात्सदृशं स्वाम्यं पितुःपु
त्रस्य चोभयोः॥ कात्यायनः॥ सकलद्रव्यजातं पद्मागमैर्हृतं तिनत्समैः॥ पितरोत्राममरश्चैव विनागोधमउ
च्यते॥ यत्तु याज्ञवल्क्यः॥ न्यूनाधिकविभक्तानां धर्म्यः पितृकृतः स्मृतइति॥ तत्रापि पितृकृतो धर्म्यश्रुत्यमतोन
परत्ववर्तनीय इति मदनविज्ञानेश्वरादयः॥ यदपि नारदः॥ पितृवत्तु विभक्ता ये समन्यूनाधिकैर्धनैः॥ तेषां स
एवधर्मस्यात्सर्वस्य हि पिता प्रभुरिति तद्गुणांतरपरं॥ स्वस्य पुत्राणां च समांशपक्षे पत्न्यश्च प्यंशमाहया
ज्ञवल्क्यः॥ यदि कुर्यात्समानंशान्पत्न्यः कार्याः समांशिकाः॥ न दत्तं स्त्रीधनं यासां भर्त्रा वा श्वशुरेण वेति
दत्ते त्वर्द्धं देयं॥ दत्ते त्वर्द्धं प्रकल्पयेदिति वचनात्॥ अर्द्धं पूर्वदत्तं स्त्रीधनं यावता पुत्रांशसमं भवति तावद्दि
त्यर्थः॥ अंशाधिकधनायात्तु नांशः॥ अर्जनसमर्थस्य पुत्रस्यदापनिच्छा॥ नावेश्याहमनुरेवाशक्तस्यानीह

मानस्यकिंचिद्दत्वापृथक्क्रियाकिंचिद्दानंचतत्पुत्राणांदायजिघृक्षार्थमितिमिताक्षरायां॥ पितृमरणानंत
रसमविभागउक्तः स्तैनैव। विभजेरन्सुताः पित्रोरूर्ध्वंरिक्थसमंमृणं॥ हारीतः समानोम्रतेपितरिरिक्थ
विभागइतियाज्ञवल्क्यः॥ पितुरूर्ध्वंविभजतांमाताप्यंशंसमंहरेत्॥ विष्णुः॥ मातरःपुत्रभागानुसारिभागहारि
ण्यः स्मृत्यंतरे। जननीत्वधनापुत्रैर्विभागेंशंसमंहरेत्॥ सधनानुयावतास्वधनस्यपुत्रांशसमंभाग
तान्नवतितावृतितावद्देवहरेदित्यर्थः॥ स्वंशाधिकधनायास्तुनांशः सपत्नमातुः। पितामह्यस्यांशमाह
व्यासः। असुताश्चपितुःपत्न्यःसमानांशाःप्रकीर्तिताः। पितामह्यश्चताः॥ सर्वाःमातृतुल्याःप्रकीर्तिताः॥ मु
र्वाइत्यनेनपितामहीसपत्नीपिगृह्यते। अनेकपत्नीपुत्राणांविभागप्रकारमाहयाज्ञवल्क्यः। अनेकपि
तृकाणांतुपितृतोभागकल्पना॥ एकस्यैकपुत्रोपरस्यद्वावन्यस्यत्रयस्तेषांपितृसंख्ययैवविभागोनवि
भाजकसंख्ययेत्यर्थः॥ कात्यायनः॥ अविभक्तेतुजेप्रेतेतत्सुतंरिक्थभागिनं येनलब्धंनवपितामहान्नु
लभेतांशंसपित्र्यातुपितृव्यात्तस्यवासुतात्॥ सएवांशस्तुसर्वेषांभ्रातॄणांन्यायतोभवेत्॥ लभेतत्सुतो

वापिनिवृत्तिपरतोभवेत्॥ अनुजपदंज्यायसोप्युपलक्षणं परंतु। प्रपौत्रात्प्रपौत्रपुत्रादिःपितृपितामहप्र
पितामहेषुमृतेषुअनंतरंवृद्धप्रपितामहेमृते ऽन्यास्मिंश्चैतत्पुत्रादिकेजीवतितद्धनंनलभते। पुत्रपौत्रसा
मान्याभावेसोपिलभेतएवेत्यर्थः। इदंचनाविभक्तपरंकिंतुसंसृष्टपरं। अविभक्तविभक्तानांकुल्यानांवसतांस
हा भूयोदायविभागःस्यात्आचतुर्थादितिस्थितिरितिदेवलोक्तेः। अविभक्तविभक्तानांवृद्धप्रपितामहतत्पुत्रा
णांचसंसृष्टिनामित्यर्थः। इदंचसमदेशस्थितपरंदेशांतरस्थस्तुपंचमादिरपिलभेतएववृद्धाणांलेख्यंगृहेहे
त्रेयस्यपैतामहंभवेत्। चिरकालप्रोषितोपिविभागभागागतस्तु। गोत्रसाधारणंत्यक्त्वायोन्यंदेशंसमाश्रितः
तद्वंशस्यागतस्यांशःप्रदातव्योनसंशयः। तृतीयःपंचमश्चैवसप्तमश्चापियोभवेत्। जन्मनामापरिज्ञानेलभेतां
शंक्रमागतमितिदेशांतरप्रक्रमेपीणबृहस्पतिःस्मृतेः। कश्चिन्मातृतोविभागमाहबृहस्पतिः॥ यद्येकजाता
:बहवःसमानाजातिसंख्यया। सापत्न्यास्तैर्विकिर्यंमातृभागेनधर्मतः। व्यासः। समानजातिसंख्यायोजाताः
स्वेकेनसूनव। विभिन्नमातृकास्तेषांमातृभागःप्रशस्यते। एतस्मात्सुदाहरणमाहबृहस्पतिः। सवर्णाभिन्नसं

व·म·

१३९॥

रव्याये पुं भागस्ते पुत्राश्च न ते॥ विजातीयविभागमाह याज्ञवल्क्यः॥ चतुस्त्रिद्व्येकभागाः स्युः क्रमशो ब्राह्मणात्मजा
ः क्षत्रजास्त्रिद्व्येकभागा विट्जास्त्वेकभागिनः॥ ब्राह्मणात्मजा ब्राह्मणीक्षत्रियावैश्याशूद्रासुताः। क्षत्र
जाः क्षत्रियावैश्याशूद्रासुताः विड्जा विट्शूद्रयोः॥ बृहस्पतिः॥ न प्रतिग्रहभूर्देया क्षत्रियादिसुताय वै। यद्यप्येषां
पिता दद्यान्मृते विप्रासुतो हरेत्॥ देवलः॥ शूद्र्यां द्विजातिभिर्जातो न भूमेर्भागमर्हति॥ सजातावाप्तं यत्स्या
र्वमिति धर्मो व्यवस्थितः॥ मनुः॥ मेकयादि प्राप्ता यावत्यपि स्यस्य तुल्यं न तत एव स्वपरिणीता शूद्रापुत्रस्तु द्व्यं
शमपि न लभते। तथा च मनुः। ब्राह्मणक्षत्रियविशां शूद्रापुत्रो न रिक्थभाक्। यदेवास्य पिता दद्यात्तदेवास्य
धनं भवेत्॥ पितृमरणोत्तरं विशेषमाह बृहस्पतिः॥ अनपत्यस्य शुश्रूषागुणवान्शूद्रयोनिजः॥ लभेताजीवनं
शेषं सपिंडाः समवाप्नुयुः॥ गौतमः। शूद्रापुत्रोऽप्यनपत्यस्य शुश्रूषुश्चेल्लभते वृत्तिमूलं। वृत्तिमूलं जीवनकारणं
स एव। शूद्रापुत्रवत्प्रतिलोमास्विति। प्रतिलोमास्तत्स्यादकापेक्षयोत्कृष्टवर्णस्त्रीप्रसन्नेष्वित्यर्थः॥ शूद्रेण
परिणीतायां समुत्पन्ने विशेषमाह॥ याज्ञवल्क्यः। जातोऽपि दास्यां शूद्रेण कामतोंऽशहरो भवेत्। मृते पितरि राम:

॥५००॥

कुर्युस्तं भ्रातरार्द्धभागिकं काम॥ पितुरिच्छा शूद्रेणेति पदं द्विजातिनिर्देशस्य समुत्पन्नपितृच्छया पितृत्राभा
क्। नापि पितृमरणोत्तरं अर्द्धं नापि पुत्राभावे सर्वमिति मदनरत्नादिषु। विभागानंतरोत्पन्नपुत्रे विशेषमा
ह। बृहस्पतिः। पुत्रैः सह विभक्तेन पित्रा यत्स्वयमर्जितं॥ विभक्तजस्य तत्सर्वमनीशाः पूर्वजाः स्मृताः॥ यथा धने
तथर्णे च दानाधानक्रयेषु च॥ परस्परमनीशास्ते मुक्त्वाशौचोदकक्रियां॥ कारणमत्र सत्वे तु पूर्वविभक्तेभ्यो
विभागग्रहणं विना तेन ऋणं नैव देयं रिक्थग्राहः ऋणं दाप्य इति वक्ष्यमाणत्वात्। कस्यचित्संसृष्टत्वे तु तेन सह
विभागः॥ ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्धनं॥ संसृष्टास्तेन वा ये स्युर्विभजेत स तैः सह इति मनूक्तेः॥ पितृमरणो
त्तरविभागकालेऽस्पष्टगर्भायां मातरि तत्पत्न्यां चाप्रत्यक्षानंतरमुत्पन्ने विशेषमाह याज्ञवल्क्यः॥ विभ
क्तेषु सुतो जातः सवर्णायां विभागभाक्॥ विभागश्चास्य वै भ्रात्रादिभिः स्वस्वांशात् किंचित्किंचिदुद्धृत्य
स्यांशः समो भवति यथा कार्यः॥ विष्णुः॥ पितृविभागानंतरोत्पन्नस्य विभागं दद्यात्॥ इदं च तदंशेषु रकसेवक
सहितेषु ज्ञेयं। तदसत्वे तु स एवाह॥ दृश्याद्वा तद्विभागः स्यादायव्ययविशोधितात्॥ दृश्यो विद्यमानत

व्य.म.
॥५०॥

तु । भ्रातॄणां विभागकाले विशेषमाह वसिष्ठः । अथ भ्रातॄणां दायविभागो याश्चानपत्याः स्त्रियस्तासमापुत्रला-
भादिति । एतज्ज्ञाकार्येतिशेषमाह वसिष्ठः । अथ भ्रातॄणां दायविभागो याश्चानपत्याः स्त्रियस्तासमापुत्र-
लाभादिति । एतज्ज्ञाकार्ये तिशेष । पितृमरणोत्तरविभागे विशेषमाह व्यासः । असंस्कृता भ्रातरस्तु ये स्युस्त-
त्र पैतामहात् संस्कार्याः पूर्वजैर्वैपैतृकान्मध्यकाद्धनात् । यवीयं इति तु मद्दीर्घाभावश्छांदसः । भ्रातॄ-
णां भगिनीनामप्युपलक्षणं तथा च नारदः । असंस्कृतास्तु ये तत्र पैतृकादेव तद्धनात् । संस्कार्या भ्रातृ-
भिर्ज्येष्ठैः कन्यकाश्च यथाविधि । भगिनीसंस्कारे विशेषमाह याज्ञवल्क्यः । असंस्कृतास्तु संस्कार्या भ्रा-
तृभिः पूर्वसंस्कृतैः । भगिन्यश्च निजादंशाद्दत्वांशं तु तुरीयकं । स्वजातीया कन्या तज्जातीयपुत्रस्य यावानंशभाग
तस्य चतुर्थं चतुर्थमंशं प्रति भगिनिं दत्वा ताः संस्कर्तव्या इत्यर्थः । दायग्रहणे च तु स्वेययोगितया मुख्य
गौणपुत्रव्यवस्थामाह याज्ञवल्क्यः । औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः । क्षेत्रजातस्तु सगोत्रेणेतरे- राम:
ण वा । गृहे प्रछन्न उत्पन्नो गूढजस्तु सुतः स्मृतः । कानीनः कन्यकाजातो मातामहसुतो मतः । अक्षतायां क्षतायां ॥५०॥

वा जातः पौनर्भवः स्मृतः । दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत् । क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात्स्व-
यं कृतः । दत्तात्मा तु स्वयं दत्तो गर्भे विन्नः सहोढजः । उत्सृष्टो गृह्यते यस्तु सोपविद्धो भवेत्सुतः । सवर्णायां धर्मप-
त्न्यामुत्पन्न औरसः पुत्रो मुख्यः । पुत्रिकासुतो द्वेधा । तत्राद्यमाह वसिष्ठः । अभ्रातृकां प्रदास्यामि तुभ्यं क-
न्यामलंकृतां । अस्यां यो जायते पुत्रः स मे पुत्रो भविष्यतीति । अन्यमाह स एव । तृतीयः पुत्रिकैवेति । अस्मि-
न्पक्षे कन्यैव पितुरौर्ध्वदेहिकं कार्यं क्षेत्रजः अपुत्रपत्न्यां गुर्वाज्ञया देवरादेः सगोत्रेणोत्पन्नः । अक्षतायां पू-
र्वं वोढ्रा तु कायां क्षतायां तेन तु कायां वा वोढ्रंतरेणोत्पन्नः पौनर्भवः । अन्ये दत्तकभिन्ना गौणाः पुत्राः । कन्योवर्जा
: ह्यौरसेतरेषां तु पुत्रत्वेन परिग्रह इति तन्निषेधेऽपवादः । अथ दत्तकविधिः । मनुः । माता पिता वा दद्यातां य-
मद्भिः पुत्रमापदि । सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्त्रिमः सुतः । वसिष्ठः मातापितावेपितैव दद्यात् । पित्रभावे मा-
तैव नयसत्येत् नावपातिमदनः । आपदुहणाद्दनापदि न देयः । अयं निषेधो दातुरेव गुरुपापो न कर्तृषं इति
ज्ञानेश्वरः । तन्न । अस्मिन्वाक्ये दृष्टार्थतया क्लृप्तत्वावगमात् कर्ता चिद्दृष्टार्थत्वेन पि वा नियमादृष्टस्य

द्या.मः
॥५१॥

वरूपकत्वान्नदत्तिकमेकार्यविशेषप्रयोजकत्वमिति॥ केचित्तुपंचवर्षस्यस्त्वापर्यंतंगौणपक्षेरनापत्तूरिसिंरख्या
यकत्वाभावेननिषेधार्थकत्वं॥ किंत्वापद्दोनिमित्तमात्रबोधकत्वमेव॥ नचानिमित्तकत्वेप्यापद्दिपुत्राद
नेप्रत्यवायापत्तिः। एतद्वाक्यस्यसंज्ञासंज्ञिसंबंधनमात्रबोधकत्वात्। आपद्दिनिमित्तेदानविधायकत्वाभा
वात्। यदपि विवाहप्रकरणेतेनैवोक्तं। रोगिण्यादिनिषेधातिक्रमेदृष्टविरोधवाभार्यात्वंतत्पदेतरण्वेति
तदप्यनेनैवायास्तं। सहतेंऊसग्गुणादिभिर्नजात्या अत ऋत्वियादिषिविप्रादेर्दत्तकोभवतीतिमेधातिथि
महश्रीजातेतितिऊक्त्वेनरः पुक्तंचेदंयाज्ञवल्क्येन। औरसोधर्मपत्नीजइतिद्वादशापिपुत्राननुक्रम्यसजा
तीयेष्वयंप्रोक्तास्तनयेषुमयाविधिरित्युपसंहारत। स्पष्टीकरिष्यतेचेदंवक्ष्यमाणग्रंथे। नकलचोम्ये। विज्ञा
नेश्वराप्येवं। ज्येष्ठेनजातमात्रेणपुत्रीभवतिमानवइतिज्येष्ठस्यैवपुत्रकार्यकरणेमुख्यत्वात्सनदेयइत्यपम
पिनिषेधोदातुरेवनप्रतिग्रहीतुरित्यपिसमस्या। स्यादेयंप्रतिषेधोदातुरेवपद्येतत्पज्येष्ठदाननिषेधकतास्या रामः
न्नतुमास्तिमानाभावात्। पुत्रीभवतीत्यनेनपुत्रित्वमात्रेणकाकरणायकरणेत्तिमात्रपरत्वाच्च। अतएवपि ॥५१॥

त्वणामनृणश्चैवसतस्मात्सर्वमर्हतीत्युत्तरार्धंसंगच्छते॥ सर्वद्रव्यंदत्तकस्यसुमानेवभवतिकन्यासजे
योदत्रिमः सुतइतिसंज्ञासंबंधकवाक्यगतेनसइतिसर्वनाम्नामातापितृकर्तृकप्रीतिजलपूर्वकापन्निमित्तक
दानकर्मान्वितसजातीयपुंसएवाष्टवर्षंब्राह्मणमुपनीयततमध्यापयीतेतिततछ्येनाष्टवर्षब्राह्मणस्यपुंसो
पनादिसंस्कृतस्यैवपरामर्शात्। एतेनकन्यामन्नमितिसमंतोदत्तेमतराष्ट्रेदाननिर्हत्तकमूर्त्याविशेषाद
रायान्वस्मैवादत्तांकन्यामप्यभिधत्तइतिकेषांचिदुक्तिः परास्ता॥ पुत्रप्रतिग्रहप्रतिग्रहमाशौनकः॥ शौन
कोहंप्रवक्ष्यामिपुत्रसंग्रहमुत्तमं अपुत्रोमृतपुत्रोवापुत्रार्थंसमुपोष्यवाससीकुंडलेदत्वाउष्णीषंचांगुली
यकं। आचार्यधर्मसंयुक्तंवेदवेदपारगं बाह्वृचंशासमंचैवपात्रांचेधर्मेवचा। एतानाहूयवंधूश्च
ज्ञातीनात्पसत्तमः। बंधूनन्नेसंभोज्यब्राह्मणांविशेषतः। अन्वाधानादिकंतंत्रंकृत्वाज्योतसवनादिकं दातु
समक्षंगत्वाज्ञंपुत्रंदेहीतियाचयेत्। दानेसमर्थोदाताचैमयेपज्ञेनेतिपंचभिः। देवस्यत्वेतिमंत्रेणहस्ताभ्यांप्र
तिगृह्यच अंगादंगेपचंजप्त्वाचाघ्रायशिशुमूर्द्धनिवत्सादिभिरहतपुत्रच्छायावहां अन्नतगीतेश्वनादैश्वस्वस्त

ब.म.
॥५२॥

स्तिशांदे स्वसंयुते। गृहीत्वा गृह्ममध्येन मा दाय चरुं कृत्वा विधानतः। यत्त्वा हृदेत्स्य चाचैव तु स्याम प्रकृचैकया। सौ
मोदद्दिस्येता नि ग्रन्थ्चेयं चगित्तया। स्विष्टकृदादि होमं च कृत्वा शेषं समापयेत्। ब्राह्मणानां सपिण्डेषु क
र्तव्यः पुत्रसंग्रहः। तदभावे सपिण्डो वा अन्यत्र तु न कारयेत्। क्षत्रियाणां स्वजातौ वा गुरुगोत्रसमोऽपि वा। वैश्यानां
वैश्यजातेषु शूद्राणां शूद्रजातिषु। सर्वेषां चैव वर्णानां जातिष्वेव न चान्यतः। दौहित्रो भागिनेयश्च शूद्रस्यापि वि
दीयते। नैकपुत्रेण कर्तव्यं पुत्रदानं कदाचन। बहुपुत्रेण कर्तव्यं पुत्रदानं प्रयत्नतः। दक्षिणां गुरवे दत्वा यथाश
क्ति द्विजोत्तमान्‌ पोराद्धाह्नमेवापि वैश्यो वित्तशातनयं शूद्रः। सर्वस्वमेवापि स्वरातुरौ श्रैव यथाबलं। छायाबद्ध
सदृशं। दौहित्रो भागिनेयश्चेति यथाश्रुतमात्रोपयोगित्वेन उक्तस्मैत्रा बृहणाय दत्तकप्रयुक्तमंत्रसंभवत्वमपि
ना यत्ते च तु र्प्पाद् द्वौ शेषानन्वाह्निवानुवचनकर्तृत्वेन भाव्युपयोगिनो मैत्रावरुणस्येव नाव्युत्पन्नमुक्तं तय
द्वाप्यनया स्तरणत्वं न च शुतुर्थ्ये चापि द्वा शूद्रस्यैव दौहित्र भागिनेयावपि प्रतिषेधितया भाव्यत्वं। अतस्त
योरेव विधेयत्वेन दौहित्र भागिनेयावेव शूद्रस्येति नियमविधिविषयता युक्ता। शूद्रस्य तु विधेयत्वे राम:

॥५०२॥

न तद्विषयत्वायोगात्। शूद्रस्यैव तिक्ति च न यक्तौ विप्रादिशेषांतरपरिसंख्यापत्तेः। तस्माद्दौहित्र भागिनेया
वेव शूद्रस्य मुख्यौ। तदभावे त्वन्योपि सजातीयः शूद्राणां शूद्रजातिष्वेवोक्तः। न चेदं जातिपदं दौहित्र भागिनेय
योरेव पर्यवसितं क्रियते दौहित्रत्व भागिनेयत्वयोः सजातीयस्वस्यैव परस्परव्यभिचारित्वात् एकस्मात्तौ सा
मान्यवाक्यवैयर्थ्यापत्तेश्च। विवृत्तेवैत द्वैतनिर्णये तत्तातचरणैः शिष्टाचारोप्येवं। एवं च निषादस्थपतिवत्त
स्याधिकारेसिद्धे विवेक उक्तं। वैदिकमंत्रसाध्यहोमवति उत्र प्रतिग्रहे शूद्रस्यानधिकार इति तदयुक्तं। समं
महोमस्तु तेन विप्रद्वारा कार्यः। अथवा सोव्रतं होमं स्त्री पर्यन्ता न जपादिकं। विप्रैः संपादितं यस्मात् यत्तत्फलमिति
पराशरोक्तेः। स्मार्ते हरिनाथा वप्येवमेव। अपरार्के एवं दक्षिणापर्यंतं यो विप्रा शूद्रस्य तु ऊह्नुवे याह वि। ब्राह्म
णस्य भवेद् शूद्रस्य शूद्रस्य ब्राह्मणो भवेदिति नतु शूद्रस्य कर्म साद्गुण्यं विप्रस्य च दोषं प्रतिपादयंतं तिमाधवः।
स्त्रियाश्चापि शूद्रवद्देवाधिकारः स्त्री शूद्राश्च सधर्मण इति वाक्यात् वसिष्ठ। शुक्लशोणितसंभवः पुरुषो मा
तापितृनिमित्तकस्तस्य प्रदानविक्रयपरित्यागेषु मातापितरौ प्रभवतो न त्वेकं पुत्रं दद्यात्प्रतिगृह्णीया

द्रा सहितायते पुरुषं न तु स्त्री पुत्रं दद्यात्प्रतिगृह्णीयाद्वान्यत्रानुज्ञानाद्भर्तुः। पुत्रं प्रतिग्रहीष्यन्बंधूनाहूय
राजनि च वेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वादूरेबांधवं संनिकृष्टमेव प्रतिगृह्णीयात्। संदेहे चोत्पन्ने
दूरेबांधवं शूद्रमिव स्थापयेत् विज्ञायते ह्येकेन बहूंस्त्रातारयेदिति तस्मिंश्चेत्प्रतिगृहीते औरस उत्पद्येत च
तुर्थभागभागी स्याद्दत्तक इति। भर्त्रनुज्ञा तु सधवाया एव दृष्टार्थत्वात्। विधवायास्तु तां विना पितुस्तदभावे ज्ञाती
नां मातथा भवति। अत एव रक्षेत्कन्यां पिता विन्नां पतिः पुत्रास्तु वार्द्धके। अभावे ज्ञातयस्तेषां न स्वातंत्र्यं क्व
चित्स्त्रिया इति याज्ञवल्क्येनावस्थाविशेषवद्भर्तुः पारतंत्र्यमुक्तं। तदभावे वार्द्धकादिना तस्या स्वतंत्रतायां वा पु
त्रादीनामपि। कात्यायनेनापि नारी स्वल्पमननुज्ञाता पितृभर्तृसुतेन वा। विकल्प्यं तद्भवेत्तस्या यत्करोत्यौर्ध्व
देहिकमिति अवस्थाविशेष एव पितृभ्रात्राद्यनुज्ञोक्ता। और्ध्वदेहिकं पारलौकिकं। अतो यस्यामवस्था
यां भर्तुरनुज्ञार्थं प्रसेवान्नान्वेषते। न त्वपूर्वा विधीयते। अतो विधवाया भर्तुराज्ञां विनाप्यधिकारः। अदूरेबां
धवोपयाप्यर्थसहितस्त्रिः सपिंडः। सन्निहिते ह्यपि भ्रातृपुत्रो मुख्यः। भ्रातृणामेकजातानामेकश्चेत्पुत्रवान्

भवेत्। सर्वे तेन पुत्रेण पुत्रिणो मनुरब्रवीदिति मन्वुक्तेरिति मिताक्षरायां। इदमेव चैतद्वचसः प्रयोजनं पुत्रकम
न्यासंभवात्। दूरेबांधवं विजातीयं दत्तकस्तु पराणी तत्तस्य अपुत्रो पि च भवतीति तातचरणाः। युक्तं चैतद्बा
धकाभावात्। यत्तु कालिकापुराणे। पितुर्गोत्रेण यः पुत्रः संस्कृतः पृथिवीपते। आचूडांतं न पुत्रः स पुत्रतां याति
चान्यतः। चूडोपनयसंस्कारान्निजगोत्रेण वै कृत। दत्ताद्यास्तनयास्ते स्युरन्यथा दास उच्यते। ऊर्ध्वं तु पंच
माद्वर्षान्न दत्ताद्याः सुता नृप। गृहीत्वा पंचवर्षीयं पुत्रेष्टिं प्रथमं चरेदिति। तदसंगतं परं आचूडांतमित्या
द्युक्त्या भयोर्मिथोदार्थत्वे चूडोपनयसंस्कार इत्यनेन विरोधापत्तेः। इदं तु वचो न तथा विस्तरेणायं द्वि
कापुराणपुस्तकेष्वदर्शनात्। अयं च दत्तको द्विविधः। केवलो द्व्यामुष्यायणश्च। संविदं विना दत्तश्चाद्यः। आवयो
रयमिति संविदा दत्तस्त्वंत्यः। तत्राद्यः प्रतिग्रहीतुरेवौर्ध्वदेहिकश्राद्धादि कुर्यात्। तथा हि पुत्रप्रतिग्रहस्य भावा
कांक्षायां पुत्रं प्रतिगृह्णीयादित्यादिकं तद्विधौ पुत्रमिति द्वितीयांतेन पुत्रस्य भाव्यत्वमुक्तं। न च तस्य पुत्रत्वार्थं पु
त्रत्वं भावयितुं शक्यं तेन पुत्रराद्धेन सर्वपुत्रकार्यं लक्षयित्वा तत्र योजकमदृष्टं भाव्यं अंगीकर्तव्यं। अतः प्र

तिगृहीतकृत्रेपुत्रपित्रादिसंबंधविशेषप्रयुक्तानि कार्याणि प्रवर्त्तंते। अत एवाह मनुः। गोत्ररिक्थे जनयितुर्न
नवेद्दत्त्रिमः सुतः गोत्ररिक्थानुगः पिंडो व्यपैति ददतः स्वधा। गोत्ररिक्थे अनुगच्छतीति गोत्ररिक्थानुगः प्रायत्त
त्समनियत इति यावत्। दत्त्रिमः केवलः। द्व्यामुष्यायणे गोत्राद्यनुवृत्तेर्वक्ष्यमाणत्वात्। पिंडः श्राद्धमौर्ध्वदैहि
कादीति मेधातिथिकुल्लूकभट्टादयः। पिंडः सापिंड्यं। स्वधौर्ध्वदैहिकश्राद्धादीत्यपरे। वस्तुतस्तु यथाजातपु
त्रः कुलके शौचिमादधीतेत्पन्नवयोविस्थाविशेषो यथा वार्द्धमंतर्वेदिमिनोत्यर्द्धं बहिर्वेदीत्यनेन देशविशेषा
स्पतेतथात्रगोत्ररिक्थानि पिंडस्तथा पदैर्जनकादीनां संबंधप्रयुक्तकार्यमात्रं लक्षयित्वा तन्निवृत्तिरुच्यते
तेन तसोदरपितृव्यादिसंबंधनिवृत्तिरपि सिद्धा भवति। अत एव केवलदत्तकजन्यपुत्रोऽपि पितुः सपिंडीकरणं पा
र्वणश्राद्धादि प्रतिग्रहीत्रैव सह कुर्यात्। एवं तत्पुत्रोऽपि यथा च प्रपौत्रवदेव दत्तकक्रीतपुत्रिवत्पुत्राः परपरिग्रहेण
नार्षेयास्ते द्व्यामुष्यायणा भवंतीत्यादिना द्व्यामुष्यायणानुपक्रम्य कात्यायनः। अथ यद्येषां स्वामुत्राभ्यां सुत्र
पत्यं न स्याद्दिवस्य हरेयुः पिंडं वै भवितृपुरुषं द्वधुरयपञ्च नयोर्नस्याद्भात्मांसोद्वधुरे कस्मिन् श्राद्धे द्व यप्रद्विस

वाऽनुकीर्त्तयेत्। प्रतिग्रहीतारं चोत्पादयितारं चांततीयात्पुरुषादिति। तत् द्व्यामुष्यायणेण परं द्व्यामुष्यायणा
भवंतीत्युपक्रमात्। तेन द्व्यामुष्यायणो जनकस्य प्रतिग्रहीतुर्वा पुत्रांतराभावे तस्मै पिंडं दद्यात् रिक्थं चाहरी
यात्। न तत्सत्त्वे। यदा तु तयोरप्यौरसाः पुत्राः संति तदा कस्मात्वापि न दद्यात् प्रतिग्रहीत्रौरसांशस्य चतुर्थं भागं
च हरेत्। तस्मिंश्चेत्प्रतिगृहीते औरस उत्पद्येत चतुर्थभागभागी स्यादिति वसिष्ठोक्तेः। उत्पन्ने त्वौरसे पुत्रे चतुर्था
शहराः सुताः। सवर्णा असवर्णास्तु ग्रासाच्छादनभाजना इति कात्यायनोक्तेश्च। तृतीयांशहरा इति तु कल्पत
रौ पाठः। सवर्णाश्चात्र जदत्तकादयः इति विज्ञानेश्वरः। यदा तु तयोः पुत्राभावस्तदा कस्मिन् श्राद्धे इत्यपेक्षायां
कारेणोभयोरप्येकमेव श्राद्धं कुर्यात्। न तु पिंडे मासैकालोजिनि। यावंतः पितृवर्गाः स्युः तावद्भिर्दत्तकादयः
प्रेतानां योजनं कुर्युः स्वकीयैः पितृभिः सह। ब्राह्मणास्तु हांच्यतपुत्राः पुत्रात्त्वे के न तत्समां चतुर्थपुरुषे छेदस्त
स्मादेषां वियोजनं साधारणेषु कालेषु विशेषो नास्ति वर्गेण मृतादेत्वेकस्तु द्विरपकुर्युः श्राद्धयथाविधाति
तदपि कात्यायनीयसमानार्थसंमेव। अयमर्थः। द्व्यामुष्यायणो दत्तकादयो जनकप्रतिग्रहीत्रोः कुले मृता

व्य.म.
॥४५॥

नांस्यवर्गैस्त्रिस्त्रिभिरादिभिः सहसपिंडीकरणं कुर्युः दत्तकादिपुत्रास्तु तेषांजनकप्रतिग्रहीतृन्यासं कुर्युः॥ तस्मै
त्वान्यपि स्वपितरं दत्तकेन पितामहेन तज्जनकेन प्रपितामहेन च तुर्थे पुरुषे तस्मै त्रैछं दद्यात्॥ प्रतिग्रही
तारंस्तु द्वारपेन्नवेति॥ जनकंतु द्वारये द्वितसाधारणे ममावास्यादिकानेपुजनकप्रतिग्रहित्र वर्गिणां श्रा
द्धं कार्यं॥ न्नताहेत्वेकमेवोद्दिष्टपेकोद्दिष्टं श्राद्धं कुर्यादिति केचित्॥ केवलदत्तकस्याभिधानासनास्तेव॥
त्र्यावयोरसावितिसंविदश्चविधानाभावात्॥ विनाग्रहीतोपि द्व्यामुष्यायणएव॥ तेनैव जानकप्रतिग्रहीत्रो
रुद्देशेनामावास्यादिषु श्राद्धद्वयमेकं वा श्राद्धं कार्यं॥ तस्तु त्रेधा तु दत्तकस्य तज्जनकप्रतिग्रहीतृभ्यां द्वाभ्यां
भ्यामपि सहपिंडीकरणं पार्वणश्राद्धादिकार्यं॥ एवं तस्तुत्रादिभिस्त्रिभिरपि त्याज्ञत्वं च तं॥ यद्यपि केवलदत्तका
का पित्रादितोनोक्तस्तथापि पूर्वोक्तमनुवचनेन जनकादीनां संबंधभावन्निवृत्तिरुक्तत्वात्॥ द्व्यामुष्यायणेत
दभावोदयासिद्ध्येस्तेव॥ किंचाइ द्विसप्तमात्पितृबंधुभ्योजाविनश्चमातृबंधुभ्यः पंचमादिति गौतमायेनबी रामः
जिकुलेसप्तपुरुषं यावद्विवाहो निषिद्धः स्याद्व्यामुष्यायणोव्यर्थः स्यात्॥ तस्मिन्सापिंड्यसत्वात्॥ अतोवद्रूपमेत ॥५०६॥

त्वार्थव्यार्थ केवलदत्तको वाच्यः॥ न च सापिंड्यनिवृत्तेरुक्तत्वात्॥ अपि चात्र वराध्याये द्व्यामुष्यायणकार्ये
सुर्दत्तकक्रीतकादयः॥ गोत्रद्वयेप्यनुद्वाह शौंगशैशिरयोर्यथेति सत्वेन गोत्रद्वयमपि द्व्यामुष्यायणस्योक्तं
मातृपार्थेन च जनकगोत्रनिवृत्तिरुक्तेति निरोधः केवलद्व्यामुष्यायणनेदैनैव परिहरणाय त्तेन मिथ्यत्वे
वकेवलोपि दत्तकः॥ अत एव सुरेणकृति नोजयदत्तिमत्वेनदत्ताय कृत्या सुतस्यार्जुनस्य — रघुत्रवसुदेवदु
हितुसुनंदायाः सापिंड्यनिवृत्तिमनुवचनेनोक्तास्य गोतयायेस्य बीजसंतानजायाः॥ अपि निषेधमात्रपरत्व
मेव चोक्तार्जुनेनतु न प्रापरिणये सांशकवार्त्तिकोक्तं संबंधवधानकल्पनारंच समाधानमाहुर्नंदसोमे
श्वर॥ यत्तु कश्चिन्सोमेश्वरेणगौतमवचनात्कृतः शूरकुरकुलेपि सप्तपौरुषं सापिंड्यमुक्तमित्याह तद्ग्रंथा
न ध्ययननिबंधनं तेनहिसापिंड्यनिवृत्तिपूर्वमुक्त्वा गौतमापस्य जनककुले निषेधपरत्वमुक्तं न तु सापिंड्यबो
धकत्वं॥ एवं सिद्धे केवलद्व्यामुष्यायणे॥ च त्र्यावयेरसावितिसंवितिसंविदपि सिद्ध्यतीति प्रतिग्रहीतु द्व्यामुष्यायणा
ज्ञानार्थत्वेन॥ दृष्टार्थत्वात्॥ अत्र केवलदत्तकस्य पालकपितृकुले सप्तपौरुषमातृकुले च पांचपौरुषं सापि

व्य.म.

॥५६॥

ध्यं मनुवृहद्गौतमः। स्वगोत्रेण कृता येऽपि दत्तक्रीतादयः सुताः। विधिना गोत्रमायांति तेन सापिंड्यं विधीयते। बृ
हन्मनुः। दत्तक्रीतादिपुत्राणां बीजवप्तुः सपिंडता। पंचमी सप्तमी चैव गोत्रित्वं पालकस्य वै। यदपि नारदः। धर्मा
र्थं विक्रिताः पुत्रास्तेन ते जनकेन पुत्रवत्। सपिंडा विभागित्वं तेषु केवलमिष्यते। इति तान्यनाकराणि। साक
रत्वे पितुरामुष्यायणस्य प्रतिग्रहीतृकुले सप्तपौरुषेण सापिंड्याभावप्रतिपादनार्थं। केवलदत्तके त्वेकगोत्र
मायेन पालककुले सप्तपौरुषस्य सापिंड्यस्योक्तत्वात्। सामान्यविषये न च जनककुले सापिंड्यनिवृत्तेरनुक्तत्वात्। य
त्तु सापिंड्यनिर्णये केषांचिन्मान्यानां लेखः। जनकगोत्रेणोपनयनादिसंस्कृतस्य जनककुले पितृतो मातृतश्च
पांचपौरुषं सप्तपौरुषं च सापिंड्यं प्रतिगृहीतुः। कुले तु त्रिपुरुषं प्रतिगृहीतु। कुले तु त्रिपुरुषं प्रतिगृहीतुः
कुले तु त्रिपुरुषं प्रतिगृहीतरि गोत्रपितृत्वप्रयोजकस्योत्पादकत्वस्योपनेतृत्वस्य चाभावात्। जनकगोत्रेण राम:
संस्कृतस्य तु प्रतिग्रहीत्रादिभिरेव सप्तपौरुषं पांचपौरुषं चेति तत्र मूलं न विद्मः। किंच यदि प्रतिग्रहीतु
र्गोत्रापादकत्वापनेतृत्वयोरभावात् न पितृत्वं कथं तर्हि त्रिपुरुषं सापिंड्यं प्रतिग्रहीत्रादिभिः। श्राद्धादिकर्तृत्वबोधकस्या ॥५७॥

न च पितृत्वाद्यंसापिंड्यं पूर्वमुक्तमेवेति दिक्। प्रकृतमनुसरामः। ऋणं। विभागे विशेषमाह कात्यायनः।
पितृव्यं पितृव्यर्णमेव द्रव्यं त्वात्मापंचात्मना कृतं। ऋणमेव हृतं शोध्यं विभागे बंधुभिः। सहैव पितृव्यर्णसंबद्धं पितृ
कृणपाकरणार्थं कृतं। आत्मीयं स्वकुटुंबभरणाद्यर्थमन्येन कृतं स एव। आत्मा पितृव्यमातृभ्यां कुटुंबा
र्थमृणं कृतं। विभागकाले देयं तद्रिक्थिभिः सर्वमेव तु। रिक्थाद्दत्तमृणे विषयेऽपि स एव। ऋणं प्रीतिप्रदत्तं तु
दत्वा शेषं विभाजयेत्। प्रदत्तं प्रतिश्रुतं। नारदः। यच्छिष्टं पितृदायेभ्यो दत्वर्णं पैतृकं च यत्। भ्रातृभिस्तद्वि
भक्तव्यमृणी स्यान्नान्यथा पिता। पितृदायः पित्रा प्रतिश्रुतं स एव धर्मार्थं प्रीतिदत्तं च प्रदत्तत्वेन योजितं
तद्दृश्यमानं विभजेन्नादृश्यमानं पैतृकादृणात्। धर्मार्थं प्रीत्या च प्रदत्तं तु प्रतिश्रुतं पित्रा। स्वेन योजितं स्वयंकृ
तं। तदृणं दृश्यमानं च द्रव्यं विभजेत्। एतदृणातिरिक्तस्य पैतृकादृणादानं नास्तीत्यर्थः। अदृश्यमानं द्रव्यं का
यामपि स एव। दृश्यमानं विभज्येत गृहक्षेत्रं चतुष्पदं। गूढद्रव्याभिशंकायां प्रत्ययस्तत्र कीर्तितः। गृहोपस्का
रवाह्यदोह्याभरणकर्मिणः। दृश्यमाना विभज्यंते कोशं गूढेऽब्रवीन्मनुः। कर्मिणो दासादयः। अत एव दि

व्य.म.

॥४७॥

अप्रकरणेऽस्मिन्विषये कोऽयमपूर्वनियमस्तत्रैवैवाशंका॥ विश्वासमसंधाने विभागे रिक्थिनां सदा क्रियासमूह
कर्तृत्वे कोऽशमेव प्रदापयेदिति॥ अथ विभाज्यं मनुः॥ विद्याधनं तु यद्यस्य तत्तस्यैव धनं भवेत्॥ मैत्रमौद्वा-
हिकं चैव माधुपर्किकमेव च॥ व्यासः॥ विद्याप्राप्तं शौर्यधनं यच्च सौदायिकं भवेत्॥ विभागकाले तत्तस्य
नान्वेष्टव्यं स्वरिक्थिभिः॥ सौदायिकं वक्ष्यते॥ एषां तच्च पितृद्रव्याविरोधेनार्जितं ज्ञेयं तथा च॥ याज्ञवल्क्यः॥
पितृद्रव्याविरोधेन यदन्यत्स्वयमर्जितं॥ मैत्रमौद्वाहिकं चैव दायादानां न तद्भवेत्॥ क्रमादभ्यागतं द्रव्यं हृत
मप्युद्धरेत्तु यः॥ दायादेभ्यो न तद्द्याद्विद्यया लब्धमेव च॥ क्रमागतायां भुवि विशेषमाह शंखः॥
पूर्वनष्टां तु यो भूमिमेकश्चेदुद्धरेत्क्रमात्॥ यथाभागं लभंतेऽन्ये दत्वांशं तु तुरीयकं॥ उद्धृतायाश्चतुर्थमंशं तु
दत्वा वाशिष्टमुद्धृत्य सह वा विभजेयुः॥ मनुः॥ अनुपघ्नन्पितृद्रव्यं श्रमेण यदुपार्जयेत्॥ दायादेभ्यो न तद्द- राम.
द्यात्सख्यं च कृतं॥ विद्यालब्धं विधिनिष्टिः॥ कात्यायनः॥ परभक्तोपयोगेन विद्या प्राप्तान्यतस्तु या॥ तया लब्धं
धनं यत्तु विद्याप्राप्तं तदुच्यते॥ एतदेव विशदयति स एव॥ उपन्यस्ते तु यल्लब्धं विद्यया पणपूर्वकं॥ विद्याधनं ॥५०८॥

तु तद्विद्याद्विभागेन विभज्यते॥ शिष्यादार्त्विज्यतः प्रश्नात्संदिग्धप्रश्ननिर्णयात्॥ स्वज्ञानशंसनाद्वादाल्लब्धं
प्राध्ययनाच्च यत्॥ विद्याधनं तु तत्प्राहुर्विभागेन विभज्यते॥ शिल्पिष्वपि हि धर्मोऽयं मूल्याद्यच्चाधिकं भवे-
त्॥ विद्यालब्धं कृतं चैव याज्यतः शिष्यतस्तथा॥ एतद्विधनं प्राहुः सामान्यं यदतोऽन्यथा॥ परं निरस्य यल्लब्धं वि-
द्यया पणपूर्वकं॥ विद्याधनं तु तद्विद्यान्न विभाज्यं बृहस्पतिः॥ विद्याप्रतिज्ञया लब्धं शिष्यादाप्तं च यद्भवे-
त्॥ ऋत्विज्यायेन यल्लब्धं एतद्विद्याधनं भृगुः॥ उपन्यासः क्रमजटादीनां संकलितानां पाठ इति मदनरत्ने
सभायां गृहस्थमेये विवृत्तिरिति केचित्॥ पणपूर्वकमुपन्यस्तमित्यन्वयः॥ शंसनं व्याख्यानं॥ प्राध्यायः प्रकृष्टा-
ध्ययनं॥ शिल्पिष्वपीति॥ अयं विद्याधर्मः शिल्पिष्वपि ज्ञेय इत्यर्थः॥ मूल्याधिकं पारितोषिकं॥ ऋत्विज्यायत-
पदर्शनं॥ अत्र सर्वत्रापि विद्याधिगमे तयाऽर्जने च पितृद्रव्याविरोधिसत्त्वे वा विभाज्यत्वं विरोधे तु विभा-
ज्यमेव॥ अत एव कात्यायनः॥ कुलेविनीतविद्यानां भ्रातॄणां पितृतोऽपि वा॥ शौर्यप्राप्तं तु यद्वित्तं विभाज्यं तद्बृहस्पतिः॥ पि-
तृद्रव्याविरोधेऽप्यर्जकस्यांशद्वयमस्त्येव॥ येन चैषां स्वयमुपार्जितं स्यात्स द्व्यंशमेव हरेदिति वसिष्ठोक्तेः॥ का-

स्मिन्विद्याधने विशेषमाह नारदः। कुटुंबं बिभृयाद्भ्रातुर्यो विद्यामधिगच्छतः। भागं विद्याधनात्तस्मात्स लभे
ताश्रुतोपि सन्। अश्रुतोऽविध इति मदनरत्ने। भागं द्वास्यामीत्यप्रतिश्रुत इति। तदुक्तं पितृद्रव्याविरो
धार्जितपि विशेषमाह। गौतमः। स्वमर्जितं चेद्येभ्यः कामं दद्यादिति। विद्यावेत्तेति वैद्य इच्छयाविद्वद्भ्यो
धातृभ्यो दद्यादित्यर्थः। कात्यायनः। नावैद्यानां तु वैद्येन देयं विद्याधनं क्वचित्। समविद्याधिकानां तु देयं वै
द्येन तद्भवेत्। वैद्यो वैद्योदंशं स्वतो धनात्॥ पितृद्रव्यं समाश्रित्य न चेत्तेन तदाहृते। अयं च निषेधो विषया
हरणं धनांतरसत्त्वे। धनांतराभावे तु तेभ्योपि देयमेवेति मदनः। पित्रादिदत्तस्याविभाज्यत्वमाह बृहस्पतिः।
पितामहपितृभ्यां च दत्तं मात्रापि यद्भवेत्। तस्य तन्न प्रहर्तव्यं शौर्यभार्याधने तथा। नारदः। शौर्यभार्याध
ने चोभे यच्च विद्याधनं भवेत्। त्रीण्येतान्यविभाज्यानि प्रसादो यश्च वै पितुः। कात्यायनः। ध्वजाहृतं भवेद्य
त्तु विभाज्यं नैव तत्स्मृतं। संग्रामादाहृतं यच्च विद्राव्य द्विषतां बलं। स्वाम्यर्थं जीवितं त्यक्त्वा तद्ध्वजाहृतमुच्य रामः
ते॥ मरणं॥ आरुह्य संशयं यत्र प्रसभं कर्म कुर्वते कस्मिन्कर्मणि तुष्टेन प्रसादः स्वामिना कृतः। तत्र ल ॥५०॥

ब्धं तु यत्किंचिद्धनं शौर्येण तद्भवेत्। अत्र विशेषमाह व्यासः। साधारणं समाश्रित्य यत्किंचिद्वाहनादिकं। शौ
र्यादिना प्राप्नोति धनं भ्रातरस्तत्र भागिनः। तस्य भागद्वयं शेषास्तत्समभागिनः। सौदायिकस्वरूपमाह व्यासः।
ऊढया कन्यया वापि पत्युः पितृगृहाद्वापि। भ्रातुः सकाशात्पित्रोर्वा लब्धं सौदायिकं स्मृतं। कात्यायनः। यत्तु
प्रस्थान काले तु स्वजात्या कन्यया सह। कन्यागतं तु तद्वित्तं शुद्धं वृत्तिकरं स्मृतं। वैवाहिकं तु तद्विद्या
द्भार्यया यत्सहागतं। धनमेवंविधं सर्वं विज्ञेयं धर्मसाधनं। आदायार्षस्तु गोद्वयमिति विकारेणाल्पकं
न्यागतं अत्रापि विद्याधनवदेव पितृद्रव्याविरोधश्चेदपि भाज्यत्वं विद्यादिव्यतिरिक्तप्रकारेणातुल्पं वि
भाज्यमेव। तथा च मनुः। अविद्यानां तु सर्वेषामीहातश्चेद्धनं भवेत्। समस्तत्र विभागः स्यादपित्र्य इति धा
रणा इहातः स्याद्दिचेष्टा अपित्र्ये पितृद्रव्यानाश्रयणे। अन्यदप्यविभाज्यमाह मनुः। वस्त्रं पत्रमलंका
रं कृतान्नमुदकं स्त्रियः। योगक्षेमं प्रचारं च न विभाज्यं प्रचक्षते। पत्रं वाहनं वस्त्रपत्रालंकारा ये येन धृ
तास्ते तस्यैव सममूल्याश्चेत्। न्यूनाधिकमूल्यत्वे तु विभाज्या एव। पितृधृतं तु वस्त्रादि तच्छ्राद्धभो

क्षेदयं॥ वस्त्रालंकारशय्यादि पितुर्यद्वाहनादिकं। गंधमाल्यैः समभ्यर्च्य श्राद्धभोक्त्रे तदर्पयेदिति बृहस्पत्यु
क्तेः॥ विषमेषु जादिषु विशेषमाह मनुः॥ अजाविकं सैकशफं न जातु विषमं भजेत्॥ अजाविकं सैकशफं ज्ये
ष्ठस्यैव विधीयते॥ कृतान्नोदके यथासंभवमुपयोज्ये॥ स्त्रियो दास्यो विषमाय यथासंभवकर्मकारिण्या
॥ समास्तु विभाज्याः॥ पित्रवरुद्धास्तु समा अपि न विभाज्याः॥ स्त्रीषु च संसक्तास्वविभाग इति गौतमो
क्तेः॥ योगक्षेमवशाद्येन मंत्रिपुरोहितादयुज्यंत इति कल्पतरौ॥ योगादित्त क्षेमं पूर्वयोगमिष्टमि
त्याद्युक्तत्वदर्शिनः॥ अविभाज्येषु तत्प्रोक्तं शयनासनमेव च। तेषां तत्र पूर्वं जडागारामादि इष्टं याग
विप्रभोजनादि। तद्धर्ममविभागदर्शायां संवर्तुमत्या पद्व्यंयेनोत्तरज्येष्ठ इण्यकृत्स्नापितं तेनद्रव्ये
ण स धर्मस्तेनैव कार्यो नान्येन न वा संप्रपसवैरित्यर्थः॥ प्रचारो गृहादिमार्गः॥ गवादिप्रचारार्थः॥ अ
यन्तु शंखलिखितौ॥ न वास्तुविभागो नोदपात्रालंकारा प्रयुक्तं वा सप्तामिति॥ यच्च वासो शनं सौ॥ अवि
भाज्यं सगोत्राणामासहस्रकुलादपि॥ याज्यक्षेत्रं च पत्रं च कृतान्नमुदकं स्त्रियः इति वाक्ये दोत्रयोरवि ॥५२०॥

भाज्यत्वमाहतुः॥ तद्धर्मवास्तु गोप्रचाराद्येकमादि परं॥ प्रतियत्तो याज्ययोस्तयोः क्षत्रियादि विभाग निषेधप
रां पूर्वोक्त निषेधात्॥ अल्पमूल्यपात्रत्वेन विभागोनर्ह इत्येवं परं वा॥ वस्त्रादिषु विशेषमाह बृह
स्पतिः॥ वस्त्रादयो विभाज्या यैरुक्तं तैर्न विचारितं॥ धनं भवेत्समृद्धानां वस्त्रालंकारसंश्रितं॥ मध्यस्थितम
नाजीव्यं दातुं न शक्यं राकपते॥ युक्त्या विभजनीयं तदन्यथानर्थकं भवेत्॥ विक्रीय वस्त्राभरणमृणमुद्धृत्यलेखि
तं कृतान्नं चाकृतान्नेन परिवर्त्य विभज्यते॥ ऊह्यतां रूपवाप्यंतः स्वानुसारेण भुज्यते॥ एकोस्त्री कार्ये
त कर्म यथांशेन गृहे गृहे॥ बहूनां समांशेना देया दासानामप्ययं विधिः। यथाभागानुसारेण सेव्य॥ क्षेत्रं वि
भज्यते॥ न चारस्रुवयांशेन कर्तव्यो रिक्थिभिः सदेति॥ अधमर्णाद् धृत्यैत्यर्थः॥ कात्यायनः॥ धनपत्र
निविष्टं तु धर्मोपपत्तिरूपिते उदकं चैव दासस्च निबंधः पुः क्रमागतः॥ धृतवस्त्रमलंकारो नानुरूपं
तु यद्भवेत्॥ यथाकालोपयुक्तानि तथा योज्यानि बंधुभिरिति॥ धनमिति धर्मो दृशेनोक्तस्य पत्रे लिखि
तमित्यर्थः॥ उदकं कूपपादिगतं॥ निबंधो वृत्तिः॥ नानुरूपं विभागयोग्यं॥ धात्रादि वचनं च नयास्त्वापि

तद्वयस्य विभागमाह॥ याज्ञवल्क्यः॥ अन्योन्यापहृतं द्रव्यं विभक्तैर्यत्तु दृश्यते॥ तत्पुनस्ते समैरंशैर्विभजेर
न्निति स्थितिः॥ अन्योन्यापहृतं ज्येष्ठकनिष्ठाद्यपहृतं॥ यत्तु मनुः॥ योज्येष्ठो विनिकुर्वीत लोभाद्भ्रातॄन्यवीय
सः सोज्येष्ठः स्यादभागश्च नियंतव्यश्च राजभिरिति तत्रापि ज्येष्ठपदं दंडापूपिकन्यायाद्यादृशमात्रोपलक्ष
कं॥ ज्येष्ठस्यापि दोषः किमुत यवीयसामित्यर्थः॥ अत एव गौतमः॥ योवै भागिनं भागान्नुदते च्यवत एवैनं
न च्यावयते ऽस्य पुत्रमथ पौत्रं च्यावयतइति॥ भागिने भागार्हं भागान्नुदते ऽति सन्तं तेनं नोत्तारं च यते नाशय
ति पश्चात्तस्य नाशयति तत्पुत्रपौत्रं वा नाशयतीत्यर्थः॥ नारदः॥ विभक्तेनैव यत्प्राप्तं तत्तस्यैव धनं भवेत्॥
हृतं नष्टं च यत्स्वंशं प्रायुक्तं च पुनर्भवेदिति॥ प्रायुक्तं दायादस्य धोकेन चित्तच्छादितं पुनर्भवेत्॥ विभागइ
ति शेषः॥ मनुः॥ विभागे तु कृते किंचित्सामान्यं यत्तु दृश्यते॥ नासौ विभागो विज्ञेयः कर्तव्यः पुनरेव हीति केन
चिद्विभागस्यापलापे निर्णायकान्याह याज्ञवल्क्यः॥ विभागनिह्नवे ज्ञातिबंधुसाक्ष्यभिलेखितैः॥ विभा
गभावनाज्ञेया गृहक्षेत्रैश्च यौतकैः॥ यौतकैः पृथक्कृतैर्गृहक्षेत्रैरिति विशेषणविशेष्यभावः॥ नारदः॥

विभागधर्मसंदेहे दायादानां विनिर्णयः॥ ज्ञातिभिर्भागलेख्येन पृथक्कार्यप्रवर्तनात्॥ स एव॥ भ्रातृणामवि
भक्तानामेको धर्मः प्रवर्तते॥ विभागे सति धर्मोपि भवेत्तेषां पृथक्पृथक्॥ अत्राविभक्तानामित्येवोद्देश्यस
मर्पकं॥ भ्रातृणामिति तु तद्विशेषणतादृविवक्षितं॥ तेन पितृपितामहपुत्रपौत्रपितृव्यभ्रातृपुत्रादिष्वप्य
विभक्तेष्वेक एव धर्मः॥ तत्र देशकालकर्त्रादीनामैक्येनैकप्रयोगविषयिणां कर्मणां न्यायेन प्राप्तापि तेत्रता
विभक्तकर्तृभेदेपि वचनेन बोध्यते॥ तेन श्रौतस्मार्ताग्निसाध्यास्तावद्धर्मा अविभक्तानां पृथगेव॥ अह
वनीयत्वावसथ्यत्वादीनां समं बंधिकत्वेन भेदात्॥ एवं श्राद्धमपि पितृव्यभ्रातृपुत्रादीनाममावास्या
दौ देवताभेदात्पृथगेव॥ ब्राह्मणानां तु निरग्निकानां तंत्रेणैव दैवतैवाक्यात्॥ पूर्वासादिनादेन भेदेनु पृथगेव॥
साग्निकानामग्निसाध्यानि तु पृथगेव गृहदेवतापूजावैश्वदेवादि तु तंत्रेणैव॥ अत एव शाकल्यः॥ एकपा
केन वसतां पितृदेवद्विजार्चनं गृहे॥ वैश्वदेवं तथैवैकं विभक्तानां गृहे गृहेति॥ प्रयोगपारिजाते आश्वलायनः॥ एक
नवसतां विभक्तानामपि त्वनु॥ एकस्तु चतुरो यज्ञान्कुर्याद्गृहपूर्वकान्॥ अविभक्ता विभक्ताश्च पृथ

व्य.म. पाकादिजातयः। कुर्युः पृथक्पृथक्पञ्चमहायज्ञान्भोजनान्वाहार्यादिना दिने दिने इति तत्संसृष्टिपरं। अविभक्तानामप्ये
।।५१।। कपाकेन वसतामित्यनेन विभक्ताश्चेत्यनेन च तत्प्रतिपादनात्। अतसंसृष्टिनां कदाचित्पृथक्पाके पृथ
आह्निकयज्ञाः। वाग्यज्ञो ब्रह्मयज्ञः तस्य वैकानिन्यतगुणसंविज्ञान। तद्गुणसंविज्ञाने तु वाग्यज्ञेत्याघन
र्थकं। प्रथमस्यागेकारणाभावादिति न्यायदेति न्यायदेव चतुर्णां प्राप्तिसंभवात्। अतो ब्रह्मयज्ञः पृथ
गेव कार्यः। इदं तु वचनद्वयं शिष्टैस्त्यानादियते यानि तु धर्मप्रवृत्तैर्वचांसि अविभक्ताः सुताः पित्रोरेकं
कुर्युर्मृताहिकं दशांतरे पृथक्कुर्युर्दर्शश्राद्धं तु मासिकं। यामांतरे जनेषु अब्दं विभक्तो मृते वत्सि दर्शत्व
मासिकं श्राद्धं कुर्युः। पित्रोः पृथक् पृथक्। अविभक्ताः पृथक्सौ मातृपार्जितधनाभिन। कुर्युस्ते भ्रातरः श्राद्धं
पार्वणं च पृथक्पृथगिति। यच्च स्मृतिसमुच्चये वैश्वदेवः स्याद्विकस्य महालयविधिस्तथा। देशांतरे
पृथक्कार्यो दर्शश्राद्धं तथैव च। चैति तान्यपि देशांतरस्थसंसृष्टविषयाणीति केचित्। वस्तुतस्त्वेतानि नि राम:
र्मूलान्येव। अपवादे श्राकालकत्वादीन मैकोन्यायेन प्राप्तं तत्ताकर्टनेदेनु वाचनिका। देशान्ते तु व ।।५२।।

१

चनस्य न्यायस्य चाभावात्पृथगेव श्राद्धादीति युक्तिमूलकानि केन चित्कृतानि। अन्यान्यपि विभागलिंगा
न्याह नारदः। साक्षित्वं प्रातिभाव्यं च दानं ग्रहणमेव च। विभक्ता भ्रातरः कुर्युर्नाविभक्ताः परस्परं। दानग्रहणप
श्वन्नगृहक्षेत्रपरिग्रहः। विभक्तानां पृथक्ज्ञेयः पाकधर्मागमव्ययाः। यथामेताः क्रिया लोके प्रवर्तंते स्व
रिक्थिषु। विभक्तानवगच्छेयुर्लेख्यमप्यंतरेण तानिति। दानग्रहणे ऋणविषये। तेन च दानग्रहणे द्वितीया
श्लोके नद्येते स्पष्टतार्थं। पश्वादि प्रतिग्रहो विभक्तानां पृथक्पृथगनुष्ठिता एव स्वत्वोत्पादकाः। अविभ
क्तानां त्वेकेन कृता परस्यापि स्वत्वजनका इत्यर्थः। दानधर्मो लेख्यादि आगमो मूलकला प्रवेशोदि व्यह
म्प्राति। पृथगायव्ययाधनं कुसीदं च परस्परं वणिक्कार्यं च पैकुर्युर्विभक्तास्तेन संशयः। वणिक्पथं वापि
ज्यं याज्ञवल्क्यः। भ्रातॄणामथ दंपत्योः पितुः पुत्रस्य चैव हि। प्रातिभाव्यमृणं साक्ष्यमविभक्तेन नस्मृ
तं। एतच्छिंग भावे तु दिव्यं। एषामन्यतमाभावे दिव्यात्मुच्यतं इति नैवोक्तत्वात्। मनुवृहस्पतियाज्ञवल्क्यः। विभा
ग धर्मसंदेहे बंधुसाक्ष्यभिलेखितैः। विभागभावनाकार्या न भवेद्दैविकी क्रियेति। तच्छिंगांतरसद्भावप

व्य.म.
।।५२।। रोकंचित्दपि विभागसंदेहान प्रमेयुनर्विभागमाहमनुः। विभागेयत्रसंदेहो दायादानांपरस्परं। पुनर्विभा
गकर्त्तव्यः पृथक्स्थानस्थितैरपि। विभक्तकृत्यमाह नारदः। यद्येकजाता बहवः पृथग्धर्माः पृथक्क्रियाः। पृथ
क्कर्मगुणोपेता न चेत्कार्येषु संगताः स्वभावाद्यदि कुर्युस्ते विक्रीणीयुरथापि वा। कुर्युर्यथेष्टं तत्सर्वमीशा
स्ते स्वधनस्य वै इति धर्मा वैधाः पंचयज्ञाः। क्रिया वाणिज्याद्या लौकिक्यः। कर्मगुणाः कर्मसाधनानि गृहो
पस्करादीनि। एतेषां पार्थक्येन विभागेऽप्यते विभक्ताः। परस्परानुमतिं विनापि दानक्रियादिषु युक्ता इति स
ग्रः। यत्तु बृहस्पतिः। अविभक्ता विभक्ता वा दायादाः स्थावरे समाः। एको ह्यनीशः सर्वत्र दानाधमन
विक्रयामिति। तदविभक्तानामप्यविभक्तेनाद्युत्पन्नसत्त्वादिदानादावनुमितिं विनाधिकारप्रतिषे
धार्थमिति मदनः। विभक्ताविभक्तसंदेहे निरासार्थं विभागोऽथ। उक्तानुज्ञयाव्यवहारसौकर्याय मितिवि
ज्ञानेश्वरादयः। स्वेच्छया विभक्तं पुनश्च विवदमानं पश्चात्सहस एवास्वेच्छाकृत विभागोपपुनरेव विसंवदेत्। राम:
सराज्ञा शास्य केस्याप्यशासनीयोनुबंधकृत्। अनुबंधो निबंधः। अपराधप्रतिबंधदापकर क्रमः। विभक्ते ।।५२३।।

ष्वसंसृष्टिनोऽप्यहरणेक्रममाह याज्ञवल्क्यः। पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा। तत्सुता गोत्रजा बंधु
शिष्यसब्रह्मचारिणः। एषामभावे पूर्वस्य धनभागुत्तरोत्तरः। स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिरिति
पत्नी पतिव्रते च धनेनयाहरिणी न व्यभिचारिणी। पत्नी पत्युर्धनहरी या स्यादव्यभिचारिणीति कात्यायनोक्ते
ः। विधवा यौवनस्था चेन्नारी भवति कर्कशा। आयुषः क्षपणार्थं तु दातव्यं जीवनं तदेति हारीतोक्तेः। प्रजाप
तिः। पूर्वं मृता त्वग्निहोत्रं मृते भर्तरि तद्धनं। लभेत्पतिव्रता नारी धर्म एष सनातनः। अग्निहोत्रमग्नीन् स
एवम्स्थावरं जंगमं हेम कुप्यं हेमरसांबरं। आदाय दापयेच्छ्राद्धं मासषाण्मासिकाब्दिकं। पितृव्यगुरुदौहित्रा
न्भर्तुः स्वस्रीयमातुलान्। पूरयेत्कव्यहव्याभ्यां वृद्धानाथातिथीन् स्त्रिय इति कुप्यं त्रपुसीसादि यत्तु बृह
स्पतिः। यद्विभक्ते धनं किंचिदाध्यादिविविधं स्मृतं। तज्जायास्थावरं मुक्त्वा लभते मृतभर्तृका। वृत्तस्थापि कृ
तेऽप्यंशे न स्त्री स्थावरमर्हतीति तत् दुहितृरहितपत्नीपरं दुहितृमती तु स्थावरमपि लभत इति स्मृतिचंद्रि
का। दायादानुमतिं विना स्थावरविक्रयादिपरमिति माधवः। यत्तु कात्यायनः। मृते भर्तरि भर्तृशं लभेत

अ.म.
॥५३॥

कुलपालिका। यावज्जीवं न हि स्वाम्यं दानाधमनविक्रये इति। तद्वदित्यारणाद्यर्थं दानादिनिषेधपरं। अदृष्टा
र्थं दानं तदुपयोग्याधमनादि तु भवत्येव। स्थावरजंगमं चेत्यादि पूर्वोक्तवाक्यात् व्रतोपवासनिरता ब्रह्मचर्ये
व्यवस्थिता। दमदाननरता नित्यमपुत्रापि दिवं व्रजेदिति कात्यायनवचनादपि स एव। अदायकं राजगामिपो
षिद्द्रव्यं वर्द्धिकं। अयास्यम्नोत्रिय यद्वंश्नोत्रिये भ्यस्तद्प्पयेदिति। यदपि नारद। अन्यत्र ब्राह्मणात्किं
त्विराजा धर्मपरायणः। तत्स्त्रीणांजीवनं दद्यादेष दायविधिः स्मृतइति तदवरुद्धस्त्रीपरं। पत्नीपदाश्रवणा
त्। यत्तु नारद। भ्रातृणामप्रजाः प्रेयात्कश्चिच्चेत्प्रव्रजेत वा। विभजेरं धनं तस्य शेषास्ते स्त्रीधनं विना। भर
णं चास्य कुर्वीरन् स्त्रीणामाजीवनक्षयात्। रक्षंति शय्यां भर्तुश्चेदा छिंदुरितरासु चेति। दविभक्तसंसृष्टभ्रातस्त्री
परं। तत्स्वक्रमे पाव्याद्दितिमदन। स्वर्यातस्यामितिस्त्री तु मासाच्छादनभागिनी। अविभक्ते धनांशे तु घासोत्साम
रणांतिकं। अविभक्तपदं संसृष्टस्याप्युपलक्षकं। तुशब्देवाशब्दार्थे। तेन यदसत्त्वं। तत्समंतः पत्नीपरा। भ्राद्यो
वरुद्धापर इति मदन। रातत्तव्य वस्त्रामूल्यं तु चिंत्य। ताविकांतु व्यस्थामादसएव। नेक्तुमर्दतिक्तपशंपुरुषस्त्र ॥५१४॥

राम:

पत्नीरता। न कुर्याद्यदि शुश्रूषा चैलपिंडं नियोजयेदिति सएव। अपकारक्रियायुक्ता निर्लज्जा वार्थनाशिनी। व्यभि
चाररता या च स्त्रीधनं नैव सार्हति। नारद। भरणं चास्य कुर्वीरन् स्त्रीणामाजीवनक्षयात्। रक्षंति शय्यां भर्तु
श्चेदाछिंदुरितरासु लिति पत्नु एवमेव विधिं कुर्याद्योषित्सु पतितास्वपि। वित्रान्नमासां देयं तु वसेयुश्च गृहा
तिकइति तद्वृद्धपरमिति यथ कृतः एवं विधिपरिति निस्त्यागरूपं शक्तिकितव्यभिचारायाम्पि भरणमात्रंमे
व। विधवा यौवनस्था चेन्नारी भवति कर्कशा। आयुषः क्षपणार्थं तु दातव्यं जीवनं तदेति हारीतोक्तेः। कर्कशांशकि
तव्यभिचारेति मिताक्षराद्या तत्सेधसं पतायत्नी धनं च हरिणाति। अनेकास्तकता विभज्य गृह्णीयु। तस्या अ
भावे दुहिता। अन्तरवमनु। तथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा। तस्यामात्मनि तिष्ठंत्यां कथमन्यो धनं
हरेत्। दुहितरो नेकाश्चेद्विभज्य गृह्णीयुः। तत्रापि कादिविद्वदा ऽपरान्नूढा चेदन्नूढा चेदन्नूढैव पत्नीवर्द्धे
न हरीयास्यादव्यभिचारिणी। तदभावे तु दुहिता यद्यन्नूढा भवेत्तदेति कात्यायनात्। ऊढासु काचित्सधना
ऽपरा निर्धना चेत्तत्रैव लभेत स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानां चेति गौतमोक्तेः। अप्रतिष्ठिता निधना

॥ भ्रापदं पैतुरप्युपलक्षकमितिर्मा प्रदायिका। दुहित्रभावे दौहित्राः। अपुत्रपौत्रसंताने दौहित्रा धनमाप्नुयुः
पूर्वेषां तु स्वधाकारे पुत्रा दौहित्रका मता इति विष्णूक्तेः। दौहित्राभावे पिता। तदभावे माता। तथा च कात्यायनः
अपुत्रस्याथ कुलजा पत्नी दुहितरोऽपि वा। तदभावे पिता माता भ्राता पुत्राः प्रकीर्तिताः। विष्णुश्च अपुत्रधन
पत्न्यभिगामि। तदभावे दुहितृगामि तदभावे दौहित्रगामि। तदभावे पितृगामि तदभावे मातृगामि तदभावे
भ्रातृगामि। तदभावे भ्रातृपुत्रगामि। तदभावे सकुल्यगामीति। यत्तु विज्ञानेश्वरः। द्वंद्वापवादके पितरावि
त्येकशेषे क्रमाप्रतीतावपि तदर्थबोधके विग्रहवाक्ये मातुरर्हस्य पूर्वनिपातात् आपवाद्यद्वंद्वे क्रमानु
मानात्पितुः पूर्वं तरसाधारणात् मातुस्त्वसाधारणपाचाद्यं मातुस्तदभावे पितुर्धनग्रहणमूचे। तदेतद्वचो
विरोधादुपास्त्यं। विग्रहवाक्ये मातृशब्दपूर्वनिपातेऽपि एकशेषस्पर्धं द्वैकल्पिकत्वेन तदपवादत्वे साधारण
साधारणपोः क्रमनियामकत्वे मानाभावाच्च। मातुरभावे भ्रातरः सोदराः। तदभावे तत्सुताः। यत्तु विज्ञानेश्वर
इयः। सोदराभावे भिन्नोदराः तदभावे सोदरसुता इत्याह। तत्र भ्रातृपदस्य सोदरे शक्त्या भिन्नोदरे च गौण्या प्र

वृत्तिद्वयविरोधाच्च। किंचित्तु भ्रातरश्च भ्रातृपुत्रौ स्वसृदुहितृभ्यामित्यनुशासनात् भ्रातरश्च स्वसारश्च
भ्रातर इति विरूपैकशेषेण भ्रात्रभावे भगिन्य इत्याहुस्तन्न। विरूपैकशेषे मानाभावात्। भ्रातृपुत्राभावेऽपि पि
तृव्यमरणकालेजीवत्पितृकतया संज्ञाधनसंबन्धाद्धनेकोपि कारणं तु पितृतो भागकल्पने तेन न्यायेन
पितृमरणं प्रागेव पितृव्यांतरैः सह विभज्य गृहीतेषु। भ्रातृपुत्राभावे गोत्रजाः सपिंडाः। तत्रादौ पितामही। मातर्यपि
च वृत्तायां पितुर्माता हरेद्धनमिति मनूक्तेः। यद्यपायं मातुरनंतरश्रुता तथापि बहुक्रम भ्रातृपुत्रौ शुमध्ये
निवेशायोगादागंतनामंतनिवेश इति वत् भ्रातृपुत्रांते निवेशः। तदभावे भगिनी। अनंतरसपिंडाद्यस्तस्य
तस्य धनं भवेदिति मनूक्तेः। बहवो ज्ञातयो यत्र सकुल्या बांधवास्तथा। यस्त्वासन्नतरस्तेषां सोऽनपत्यधनं ह
रेदिति वृहस्पत्युक्तेः। तस्या अपि भ्रातृगोत्रोत्पन्नत्वेन गोत्रजत्वाविशेषाच्च। सगोत्रा तदंनास्ति न च सात्रधन
ग्रहणप्रयोजकत्वेनोक्ता। तदभावे पितामहः सपत्नभ्रातरो विभज्य गृहीतेषु तत्वजनकजन्यत्वेन च सामा
न प्रत्यासत्तेः प्रत्यासत्तिसाम्ये पाठक्रमाद्यगुणविशेषांतराभावे चान्यत्राप्येवमेव। तेन तयोरभावे प्रपितामह

पितृव्याभिन्नोदरभ्रातृपुत्रा विभज्य गृह्णीयुः। सर्वेषां सपिंडाभावे समानोदका ग्राह्यत्वासन्नक्रमेण। तांश्चाह मनुः। स
पिंडता तु पुरुषे सप्तमे विनिवर्तते। समानोदकभावस्तु जन्मनाम्नोरवेदने इति। सप्तमेनातेत्यर्थः। गोत्रजा
भावे बंधवः। ते स्मृत्यंतरे। आत्मपितृष्वसुः सुता आत्ममातृष्वसुः सुताः आत्ममातुलपुत्राश्च विज्ञेया आत्मबंधवः॥ पितुः पितृष्व
सुः पुत्राः पितुर्मातृष्वसुः सुताः पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबांधवाः॥ मातुः पितृष्वसुः पुत्रा मातुर्मातृष्वसुः सु
ताः मातुर्मातुलपुत्राश्च विज्ञेया मातृबांधवाः। अत्र क्रमः पाठिक एव। ननु पत्न्यादीनां सर्वेषां मृतानिरूपि
तानामेव धनभाक्त्वं बांधवानां नाम पितृष्वेवास्त्वतः कथं पितृबांधवानां धनसंबंधः॥ पितुः पितृष्वसुः
पुत्रा इत्यादि तु संज्ञासंज्ञितसंबंधमात्रार्थं न धनसंबंधार्थमिति चेत्। अतो विनाप्येतद्वचनं पितृपितृमातुल
पितृव्यादिष्विव पितृमातृबंधुष्वपि योगेनैव तच्छब्दप्रवृत्तिसिद्धेः नवैसंज्ञासंज्ञिसंबंधबोधनानर्थक्यापत्तेः॥ राम:
तन बंधूनां तु रिक्थधनसंबंधविधौ पितृमातृबंधूनां पाठेनैव वचोर्थवत्त्वात्। बंधुद्देशेनाशौचविधावप्येवमे
वेति दिक्। बंधूनामभावे आचार्यस्तदभावे शिष्यः। पुत्राभावे प्रत्यासन्नः सपिंडस्तदभावे आचार्यस्तदभावे अंतेवा ॥५२६॥

सीत्यापस्तंबोक्तेः। शिष्याभावे सब्रह्मचारी। तदभावे श्रोत्रियः श्रोत्रिया ब्राह्मणस्यानपत्यस्य रिक्थं भजेरन्निति
गौतमोक्तेः। तदभावे ब्राह्मणाः सर्वेषामप्यभावे तु ब्राह्मणा रिक्थभागिनः। त्रैविद्याः शुचयो दांतास्तथा धर्मो
न हीयत इति कात्यायनात्। नारदश्च। सर्वत्राप्यदायकं राजा हरेद्ब्रह्मस्ववर्जितं। अदायिकं तु ब्रह्मस्वं श्रोत्रियेभ्य
प्रदापयेत्। बृहस्पतिः। ये पुत्राः क्षत्रविट्शूद्राः पत्नीभ्रातृविवर्जिताः। तेषां धनहरो राजा सर्वस्याधिपतिर्हि सः
इत्यादि रिक्थे विशेषमाह याज्ञवल्क्यः। वानप्रस्थयतिब्रह्मचारिणां रिक्थभागिनः। क्रमेणाचार्यसच्छिष्य
धर्मभ्रात्रेकतीर्थिनः। ब्रह्मचारी नैष्ठिकः। उपकुर्वाणस्य तु पित्रादय एव। धर्मभ्राता प्रतिभ्राता। एकतीर्थः एको
श्रमी धर्मभ्राता वा स चैकतीर्थश्चेति कर्मधारयः। आचार्यादीनां प्रातिलोम्येनेति मदनः। मृतस्य रिक्थया
हिरण्यादेनकेनापि राजपर्यंतेनौर्ध्वदेहिकं दाहांतं कार्यं तथा च विष्णुः। यश्चार्थहरः स पिंडदायी स्मृत इ
ति। निरूपितं चेदं श्राद्धमयूखेऽधिकारिनिर्णये मया। अथ संसृष्टिनिर्णयः। तत्र संसर्गमाह बृह
स्पतिः। विभक्तो यः पुनः पित्रा भ्रात्रा वैकत्र संस्थितः। पितृव्येणाथवा प्रीत्या स तत्संसृष्ट उच्यते। अत्र पितृभ्रा

द्व्यरेव सह संसृष्टतान्येव वचनेनुपादानात् इति मिताक्षरादिषु । विभागकर्तृसामानाधिकरण्येनैव से
तिवं पुत्रपित्रादिपदानि तु विभागकर्तृमात्रलक्षकाणि संसृष्टमंतवेदिमिनोन्मदयं दिवेदा तिवत् अन्य
थावाक्यभेदात् । तेन पत्नीपितामहभ्रात्रपौत्रपितृव्यपुत्रादिभिरपि सह संसृष्टता भवति विभक्तो य
एकत्र स्थितः संसृष्ट इति सामानाधिकरण्यपधिकरण्यपदाभिभक्तभ्रात्रोः पुत्रादीनां न संसर्गः । विद्यमानत्वा
विवाधनमावयोः पुनर्विभागाविधिमाधारणमित्याकारिकानुद्धिरिच्छा वा संसर्गः । तत्र संसृष्टिनां पुनर्वि
भागे विशेषमाह मनुः । संसृष्टाः सह जीवंतो विभजेरन् पुनर्यदि । समस्तत्र विभागः स्यात् ज्यैष्ठ्यं तत्र न विद्य
ते । अत्र समस्तत्र विभागः स्यादित्यनेनैव पूर्व्येनिरस्ते पुनर्ज्येष्ठ्यप्रतिषेधो ज्येष्ठकृतमुद्धारवैषम्यं नास्ति
संसर्गकालीनव्ययेन नाधिक्यं कृतं तु विभागवैषम्यं मत्स्यै वेति ज्ञापनार्थ इति केचित् । ज्येष्ठ्यमित्यादेरर्थ
वादमात्रत्वात् द्व्यन्यूनाधिक्येसमएव भागः । आचारोप्येवं । तेनाचारमूलकत्वेप्यत्तु च स संभवति त
द्विन्नद्व्यक्तिक कल्पनमन्यानमन्याय्यं । व्यवहारत्वस्थस्य व्याकरणवत् प्रायेणाचारमूलकत्वाच्चेति राम: ॥५५२३॥

तु परो बृहस्पतिः । संसृष्टिनां तु यः कश्चिद्विद्याशौर्यादिनाधिकं । प्राप्नोति तस्य दातव्यो द्व्यंशः शेषाः समांशि
नः । अर्जकस्य द्वौ भागावित्यनेनैव भागद्वयसिद्धावसंसृष्टविभागे विषिद्ध द्व्यापिरोधेर्वाजनेन भागद्वयेसं
सृष्टिभागे तु संसृष्टधनविरोधेनाप्यर्जनेन भागयमित्यपर्ववदेत द्वचनमिति मदनः । संसृष्टिधनहरणाधि
कारिणमाह याज्ञवल्क्यः । संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः । पत्न्याद्युहितरस्तस्यादेरपवादोयं तेना
यमर्थः संसृष्टधनहरणाधिकारितावच्छेदकं न पत्नीत्वादिकिं तु संसृष्टित्वमिति । यत्तु विज्ञानेश्वरमदना
द्योयवादस्योत्सर्गसमानविषयत्वनियमात् स्वर्यातस्याप्यपुत्रस्येत्येतस्य ददनुषंगाद्वेतदपि पुत्रही
नविषये । अतस्तादृशमृतसंसृष्टिसंनिहितपत्न्यादिसद्भावेप्यन्यः संसृष्टीवगृह्णीयात् इति चित्यं
तेन विनापि गतौ संनिवेत्यामनुषंगे मानाभावात् समानविषयत्वं तु न वांशेऽपेक्षितं किंतु यथाकथंचित्
मृतमपि इंविषतेया । अपुत्रस्येति पदस्यानुषंगाभावे स्वर्यातस्येतिस्याप्यनुषंगाभावेन मृतस्येति न लभ्य
ते त्विचेतन्न हीयेतां शापदानतः । म्रियेतान्यतरो वापीति वस्यमाणमनलपातत्ताभात् । अनुषंगे तु पित्रा

व्य·म:

॥५७॥

सहसंसृष्टिनोः पुत्रपौत्रयोर्वातुल्यांशापत्तिः। तत्रच व्यवहारस्यान्यथाभागापनिरानव्यवहारविरोधः। न त्वतु
ऽंगाभावेसपुत्रेप्रेतस्य पेतद्वचनप्रवृत्तेरसंसृष्टिपुत्रसंसृष्टिभ्रात्रादीनां समवायपातादिरेवम्नेतन पुत्रादि
रितिचेत्तन्न। उत्तरार्द्धव्याख्यया परिहरिष्यमाणत्वात्। स्मृतु प्रथमपादार्थमपवदति। सोदर्यस्येति संसृष्टि
नः संसृष्टिस्तूपज्यते। मृतसंसृष्टिनो धनं संसृष्टिनः सोदरासोदरयोः समवाये सोदर एव सं
सृष्टांशं गृह्णीयादित्यर्थः। उत्तरार्द्धे। दद्याच्चाहरयेच्चांशं जातस्य च मृतस्य चेति मृतसंसृष्टिनोऽस्य
विभागकालेऽनुत्पन्नत्वाद्गर्भीयांशस्य उत्पन्नस्य पुत्रस्यांशं दातस्मै संसृष्टपितृव्यादिर्दद्यात्। तदसत्वेतु
स्वयमेवांशं हरेदित्यर्थः। अत्र पुत्रत्वमात्रे पित्र्यांशग्रहणाधिकारितावच्छेदकं। न विभागोत्तरोत्पन्नत्व
मप्रयोजकत्वात् और वा द्वितीयांतरे विभागान्त्राग्युत्पन्नेऽज्ञाते चांशानधिकारितापत्तेः। अत। पूर्वोत्पन्नाया
संसृष्टिने पितृपसंसृष्टपि पितृव्यादिस्तदंशं दद्यादेव। असंसृष्टिसोदरसंसृष्टिभिन्नोदरयोर्विभज्यध राम:
नग्रहणमाह स एव। अन्योदर्यस्तु संसृष्टिनान्योदर्यो धनं हरेत्। असंसृष्टपि चादद्यात्संसृष्टो नान्यमातृ ॥५१८॥

जइति। अत्रान्योदर्यान्यमातृजादिपदैर्नसपदैर्नसपत्नैव भ्रातोच्यते। किंतु पितृव्यादिरपियोगाविशेषात्
असंसृष्टापीति देहलीदीपवत् पूर्वोत्तरपदाभ्यामन्वेति। संसृष्टपदं चावृत्त्याऽन्यससर्गवत्सोदरसं
सर्गवतश्च सोदरस्य बोधकं। अद्येयोपिराद्धो पितृव्यनंतरबोध्यार्थः। श्लोकान्ते एवकारोध्याहार्यः
तद्देतेवाक्यार्थः। अन्योदर्यो भ्रोदरः पत्नीपितृपितामहसपत्नभ्रातृपितृव्यादिः संसृष्टि चेद्धनं हरेत्। अ
संसृष्ट्यप्यन्योदर्येणेति तेनासोदरस्यान्वयव्यतिरेकाभ्यां संसर्गो धनग्रहणे कारणमुक्तं। असंसृष्ट्य
पिसंसृष्टांस्यऽसोदरो गृह्णीयात्। अनेन सोदरत्वमात्रमेव कारणमुक्तं। संसृष्टोऽन्यसंसर्गवान्यमातृ
जएव केवलं न गृह्णीयादिति। तेनैकसंसृष्टत्वेन परः सोदरत्वेनेति द्वावपि विभज्य गृह्णीयातामिति नि
गर्वः। एतमेवार्थं संसृष्ट्यधिकारे स्पष्टपतिस्तु। येषां ज्येष्ठः कनिष्ठो वा हीयेतांशप्रदानतः। म्रियेतान्यत
रोवापि तस्य भागो न लुप्यते। सोदर्या विभजेयुस्तं समेत्य सहिताः समं। भ्रातरो ये च संसृष्टा भगिन्यश्च
सनाभयः इति। हीयेतास्रमोत्तरगति यातीत्यादिना। सोदर्याभ्रातर इत्यन्वयः। ये च संसृष्टाः पत्नीपिताम

व्य.म.

॥५८॥

हस पत्न्याः पितृव्यादयः। अत्र विशेषमाह प्रजापतिः। अंतर्द्धनं तु यद्रव्यं संसृष्टानां तु तद्भवेत्। न स्त्रियस्तद्
त्वसंसृष्टाः प्रगृह्णीयुर्यथांशतः। अंतर्धनं न्यस्तनिक्षेपादिना गोपितगृहस्थं सुवर्णरूप्यादि संसृष्टे भिन्नोद
रा गृह्णीयात्। एवं तु सोदर आह भगिन्यो विभज्य गवाश्वादि तु सोदरा सोदरं त्वावरो भगिन्यश्चतुर्थं। भिन्नो
दरसंसृष्ट एव गवाश्वादि यातीति मदनः। तत्वतद्वचनानारूढं। अन्यतरमात्रसत्वे त्वसंसृष्टोपि सोदर एवेति स
स्मृतिचंद्रिकायां। तत्र मानं चिंत्यं। सोदरे घ्रापि केचिंसंसृष्टिनः। परे तु न तत्रापि संसृष्टिन एव गृह्णीयुः। सो
दरत्वसंसृष्टित्वकारणद्वयसद्भावात्। अत एव गौतमः। संसृष्टिनि प्रेते संसृष्टो रिक्थभागिति बृह
स्पतिः। संसृष्टौ यौ पुनः प्रीत्या तौ परस्परभागिनाविति। अत्रायं निर्गलितोर्थः। पुत्रपित्रा संसृष्टोऽसंसृष्टो
वा स्वपितृमंशं गृह्णीयात्। पुत्रत्वेपि वा रामस्वत्वाधिकारिता। विच्छेदाकत्वात्। पुत्रेष्वप्येकः संसृ
ष्टः परो न चेन्न संसृष्ट एव संसृष्टिनस्तु संसृष्टसुतः। संसृष्टपुत्रापुत्रे समवायेपि पुत्र एव। दायाश्वा प्रहरेत्सु (राम:)
शं मित्यनयाख्यातत्वात्। पुत्रभिन्नसंसृष्टेपि भ्रातृपितृव्यादीनां समवायेपि न एवेव। तत्राप्यादौ म ॥५९॥

तानंतः पितेति वक्ष्यते। भ्रातृपितृव्यादपत्न्य पि भिन्नैव गृह्णीयुः। सर्वेषु संसृष्टात्वरूपग्रहणाधिकारिता
विच्छेदकसद्भावात्। संसृष्टपितृव्यसपत्न्यभ्रात्रादीनां च समवायेपि विभिन्नैव। सोदरस्य तु सोदर इत्यक्ते
॥केवलाया। पत्न्या एव संसृष्टत्वसैव गृह्णीयात्। संसृष्टिनस्त संसृष्टस्य तु स्त्री संसृष्टस्यापि तया सह
न्येषां संसृष्टिनां समवायेत एव नासां। तथा च संसृष्टिप्रक्रमे शंखनारदौ। भ्रातॄणामप्रजः प्रेयात्कश्चि
च्चेत्प्रव्रजेत वा विभजेरन्धनं तस्य शेषास्ते स्त्रीधनं विना। भरणं चास्य कुर्वीरन् स्त्रीणामाजीवनक्षयात्
रक्षंति शय्यां भर्तुश्चेदाच्छिन्द्युरितरासु यातस्मृदुहितुस्तस्यापि स्याद्भरणमते। आसंस्काराद्धरेद्भागं
परतो बिभृयात्पतिः। अत्र यथा यस्य हविर्निरुक्तं पुरस्ताद्धेनमासुदियात्स्तेधा तेउभ्यान्विभजेदित्यत्र ह
विरनिरुद्दिश्यादितस्य नैव हविः प्रवृत्य वगमान्निर्वापाविवक्षा। तथा प्रक्रमादिवा मरणप्रजत्वाविभागा
दिषु संसृष्टिना कर्तृत्वावगमात् भ्रातॄणामित्यविवक्षितं यस्तु संसृष्टिप्रक्रमे शंखवाक्यं यतस्य ह्युत्पुत्रस्य
ह्यपुत्रस्य भ्रातृगामिद्रव्यं तदभावे पितरौ हरेयातां ज्येष्ठा वा पत्नीति। तत्पेन पितृव्यपत्नी ह्यपुत्र सयत्वे

व्य॰म॰
॥५१९॥

आचारसहसंसर्गह्नन्मरणोत्तरस्य स्पृष्टिमरणे तदीयासंसृष्टिभ्रात्रादीनां क्रमनियमार्थमिति मदनः॥ प-
त्न्यादौ माता ततः॥ पितेत्यपि स्मरणं॥ ज्येष्ठा संयता पत्न्यभावे भगिनी॥ तथा च बृहस्पतिः॥ तस्य भ-
गिनी सा तु ततो हरेत् धनमिति॥ अनपत्यस्य धर्मोऽयं अभार्यापितृकस्य च॥ केचित्स्युयात् स्नुषा दुहितेति
पितृव्यः॥ दुहितृभागिनेयाभावेऽनन्तरसपिंडः॥ अथ स्त्रीधनं॥ मनुः॥ अध्यग्न्यध्यावाहनिकं दत्तं च प्रीति-
कर्मणि॥ भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतं॥ षडिति न्यूनसंख्याविच्छेदार्था॥ तेन पितृमातृपति-
भ्रातृदत्तमध्यग्न्युपागतं॥ आधिवेदनिकाद्यं च स्त्रीधनं परिकीर्तितमिति याज्ञवल्क्योपपदे संगच्छते
॥ विष्णुश्चाधिकमाह॥ पितृमातृसुतभ्रातृदत्तमध्यग्न्युपागतं॥ आधिवेदनिकं बंधुदत्तं शुल्कान्वा-
धेयकमिति॥ अध्यग्न्यादीनाह कात्यायनः॥ विवाहकाले यत्स्त्रीभ्यो दीयते ह्यग्निसंनिधौ॥ तदध्यग्निकृतं
सद्भिः स्त्रीधनं परिकीर्तितं॥ यत्पुनर्लभते नारी नीयमाना पितुर्गृहात्॥ अध्यावहनिकं स्त्रीधनं तदुदाहृतं॥
प्रीत्या दत्तं तु यत्किंचित् श्वश्र्वा वा श्वशुरेण वा॥ पादवंदनिकं चैव प्रीतिदत्तं तदुच्यते॥ विवाहात्परतो यत्तु

राम:
॥५२०॥

लब्धं भर्तृकुलात्स्त्रिया॥ अन्वाधेयं तु तत्प्रोक्तं यल्लब्धं बंधुकुलात्तथा॥ गृहोपस्करवाह्यानां दोह्याभरणक-
र्मिणां॥ मूल्यं लब्धं तु यत्किंचित् शुल्कं तत्परिकीर्तितं॥ गृहोपस्करार्घं येन तन्मूल्येन कन्यादानकाले कन्यायै संत
शुल्कमित्यर्थः॥ अधिवेदनिकं विवृणोति याज्ञवल्क्यः॥ अधिविन्नस्त्रियै दद्यादाधिवेदनिकं समं॥ दत्ते स्त्री-
धनं यासां दत्ते त्वर्धं प्रकल्पयेत्॥ अर्धमिति यावताधिवेदनिकद्रव्यसमं भवति तावदित्यर्थः॥ देवलः॥ भर्त्रा
प्रतिश्रुतं देयमृणवत्स्त्रीधनमिति स्मृतेः॥ प्रधिनिश्रुतं देयमृणं ऋणापनतस्त्रीधनं स्मृतं॥ प्रतिश्रुतं च
स्त्रियै॥ स्त्रीभ्यो धनदाने विशेषमाह कात्यायनः॥ पितृमातृपतिभ्रातृज्ञातिभिः स्त्रीधनं स्त्रियै॥ यथाशक्त्या
द्विसाहस्राद्दातव्यं स्थावरादृते॥ स्थावरातिरिक्तं सहस्रद्वयपणावधि देयमिति मदनः॥ व्यासोऽपि॥ द्विस-
हस्रपरो दायः स्त्रियै देयो धनस्य च॥ इदं च द्विसाहस्रावधिकं दानं प्रतिवर्षं॥ अनेकवर्षेषु स्तोऽधिकमपि द-
कौ स्थावरमपि देयमित्यपि स्मरणं॥ दायादवचनेन च दत्तेऽदुर्धारणमात्रार्थं देशे च भूषणादौ स्त्रीस्वं नास्ती-
त्याह कात्यायनः॥ ततः सोपधिपदत्तं यच्च योगवशेन वा॥ पित्रा भ्रात्राथवा पत्या वा तत्स्त्रीधनमुच्यते॥ शिल्पप्राप्ते

व्य·म·
॥६०॥

पित्रा भिन्नसखा दि या मे पित्र्या धनत्वं नास्तीत्याह स एव। या मे शिल्पैस्तु यत्किंचित्प्रीत्या चैव यदन्यत। भर्तुः स्वा
म्यं तदा तत्र शेषं तु शेषं तु स्त्रीधनं स्मृतं। पत्नु नार्या पुत्रश्च दासश्च निर्धनाः वै सेए ते। यत्ते समधिगच्छंति यस्ये
ते तस्य तद्धनं। नंन्नचे दिति तदपि स्त्रीस्याद्यर्जित धनपरं। आधिवेदनिर्धनाः सर्व एव ते। आधिवेदनिकादि
घप्यस्वातंत्र्यपरमिति तु युक्तं। अत एव मनुः। न निर्हारं स्त्रियः कुर्युः कुटुंबाद्बहुमध्यगात्। स्वकादपि
वित्ताद्धि स्वस्य भर्तुरनाज्ञयेति। निर्हारो व्ययः। कस्मिंश्चिद्धने स्वातंत्र्यमाह कात्यायनः। ऊढया कन्यया वा
ऽपि पत्युः पितृगृहेऽपि वा। भ्रातुः सकाशात्पित्रोर्वा लब्धं सौदायिकं स्मृतं। सौदायिकं धनं प्राप्य स्त्रीणां स्वातं
त्र्यमिष्यते। यस्मात्तदानृशंस्यार्थं तैर्दत्तमुपजीवनं। सौदायिके सदा स्त्रीणां स्वातंत्र्यं परिकीर्तितं। विक्रये चैव
दाने च यथेष्टं स्थावरेष्वपि। भर्तृदत्ते तु स्थावरे तु न स्वातंत्र्यं न वेतदा। भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन्मृतेऽपि तत्
सा यथाकाममश्नीयाद्दद्याद्वा स्थावरादृते इति नारदोक्तेः। भर्त्रादीनां स्त्रीधनं स्वातंत्र्याभावमाह स एव। न भर्ता नैव च
सुतो न पिता भ्रातरो न च। आदाने वा विसर्गे वा स्त्रीधने प्रभविष्णवः। यदि त्वेकतरो ह्येषां स्त्रीधनं भक्षयेद्बला

राम:
॥५२॥

त्। सवृद्धिकं प्रदाप्यः स्याद्दंडं चैव समाप्नुयात्। तदेव यद्यनुज्ञाप्य भक्षयेत्प्रीतिपूर्वकं। मूलमेव स दाप्यः स्याद्यदा
स धनवान्भवेत्। मनुः। जीवंतीनां तु तासां ये तद्धरेयुः स्वबांधवाः। तांछिष्याच्चौरदंडेन धार्मिकः पृथिवीपतिः। पत्यौ
जीवति यः स्त्रीभिरलंकारो धृतो भवेत्। न तं भजेरन्दायादा भजमानाः पतंति ते इति। धृतो भर्त्रादिना तस्यै दत्तः स
तया धृत इत्यर्थः। देवलः। वृत्तिराभरणं शुल्कं लाभश्च स्त्रीधनं भवेत्। भोक्त्री च स्वयमेवेदं पतिर्नार्हत्यनापदि। वृ
था मोक्षे च भोगे च स्त्रियै दद्यात्सवृद्धिकं। पुत्रार्तिहरणे वापि स्त्रीधनं भोक्तुमर्हति। वृत्तिरनाथे पित्रादिदत्तं ध
नं लाभो वृद्धिः। मोक्षस्त्यागो दानमिति यावत्। पुत्रपदं कुटुंबोपलक्षकं। याज्ञवल्क्यः। दुर्भिक्षे धर्मकार्ये च व्या
धौ संप्रतिरोधके। गृहीतं स्त्रीधनं भर्ता नाकामो दातुमर्हति। अत्र भर्तृग्रहणात्तद्भिन्नेन दुर्भिक्षाद्यापद्यपि स्त्री
धनं न ग्राह्यमित्युक्तं। धर्मकार्यमावश्यकं। संप्रतिरोधके बंधने। क्वचिदकामोऽपि दद्यादित्याह देवलः। अन्य
चेत्सहिनार्यस्या लभवानजते पुनः। प्रात्यानित्युष्टमपि च पतिर्दाप्यश्च तद्बलात्। ग्रासाछादनवासानामा
च्छेदो यत्र योषितः। तत्र स्वमाददीत स्त्री विभागं रिक्थिनस्तदा। रिक्थिनः सकाशादित्यर्थः। इदं च माधवीयं

स्मृ·म·
॥६२॥

ह्यातु न पितृभागमर्हतीति तथा च स एव अप्रकारक्रियायुक्ता निर्मर्यादा धर्मनाशिका। व्यभिचाररता या च स्त्रीध
नं नैव सार्हति। स एव यज्ञार्थे द्रव्यमत्यन्तं तस्माद्द्रव्यं मुत्सृत्तं नियोजयेत्। स्थानेषु धर्मयुक्तेषु धर्मयुक्तेषु न स्त्रीमू
र्खविधर्मिषु। स्त्रीमरणानंतरं भर्त्राधेयादस्य तद्धनग्रहणे अधिकारित्वं वक्ष्यमाह मनुः। अन्वाधेयं च यद्दत्तं पत्या
प्रीतेन चैव यत्। पत्यौ जीवति वृत्तायाः प्रजायास्तद्धनं भवेत्। प्रजानां विहीन स्ति स एव। जनन्यां संस्थितायां तु सम
मं सर्वे सहोदराः। भजेरन्मातृकं रिक्थं भगिन्यश्च सनाभयः। यत्र दुहितृणां भावेन पुत्राणामेव साहित्येनाधि
कारः। अत्र तत्र तस्याहित्यं यत्र तु कन्यानामेवाधिकारः। आ तत्र तस्याहितमरूच्यतेन तु कन्यापुत्रयोः परस्प
रमप्राप्तं साहित्यं विधीयत इति मिताक्षराशयः। परे तु अन्वाधेयं नष्टे प्रीतिदत्तविषये कन्यापुत्रयोः परस्प
रमप्राप्तमसर्वं साहित्यं विधीयत इत्याहुः। भगिनीषु विशेषमाह मनुः। स्त्रीधनं स्यादपत्यानां दुहिता च तदंशिनी
अप्रत्ता चेत्समूढा तु लभते मानमात्रकं। तदंशिनी पुत्रसमांशिनी। अप्रत्ता अविवाहिता। तस्याः सर्वे कुंठामा
नमात्रं किंचिन्मात्रं लभेतेत्यर्थः। उदमात्रं कां तत तदंशिनी पुत्रसमांशिनी। अप्रत्ता अविवाहिता। तस्याः सर्वे ऊढा राम:
॥५२२॥

मानमात्रं किंचिन्मात्रं लभेत इत्यर्थः। अप्रत्ताभावे सधवानां त्वाह समीरांशा भगिन्यो बांधवैः सार्धं विभजेरन्त
न इत्कात्यायनोक्तेः। दौहित्र्योपि किंचिद्देया यास्वासां स्युर्दुहितरस्तासामपि यथार्हतः। मातामह्या
धनात्किंचित्प्रदेयं प्रीतिपूर्वकमिति मनूक्तेः। यौतकं तु नढानामेव न पुत्राणां। तथा च स एव मातुस्तु यौ
तकं यत्स्यात्कुमारीभाग एव सः। यौ न किंचित्ताविवाहकाले यत्पी सह देकासनमात्मयुतयोपेतिकामिति नि
घंटोक्तेरिति मदनः। अन्वाधेय नष्टप्रीतिदत्तमित्र पूर्वोक्तपरिभाषिके स्त्रीधने तु विषमाह गौतमः। स्त्रीधं
नं दुहितॄणामप्रत्तानामप्रतिष्ठितानां च। ब्राह्मणी कन्या तु समया सम्भवा भवेत्। चाकारश्चार्थे तेन विभ
ज्येति लभ्यते। ब्राह्मणपदं समोत्तमजातिकन्योपलक्षकमिति केचित्। मानं तु तत्र चित्तं दुहितृणामभा
वे दुहितृसंततिः। मातुर्दुहितरोभावे दुहितॄणां तदन्वयतिनारदोक्तेः। भिन्नमातृकाणां दुहितॄणां दौहित्रा
णां दौहित्राणां च अनेकपितृकाणां तु पितृतो भागकल्पनेति न्यायेनांत्राकल्पनायदुत्थापनं च। मा
तुर्दुहितरः शेषमृणात्ताभ्यां ऋते च मद इति। तत्राप्यन्वयपदं कन्यासंततिपरमिति केचित्। परे तु दुहि

व्य॰म॰

॥६२॥

न्नाभावे तु पुत्रा एव गृह्णीयुः। नारदीये तदा मातुरेव परामर्षादित्याद्यः॥ आचारसंवादोप्यपेयमर्थः। विषमं गादि
ति॥ ऋणसमं न्यूनं वा पुत्रा एव गृह्णीयुरिति सा प्रदायिका। दुहितॄणां तु नामभावे पुत्रपौत्राद्या गृह्णीयुः। दुहितृ
णामभावे तु रिक्थं पुत्रे पुत्र इनमितिकात्यायनोक्तेः। अपि दुहितृदीनां मातृधनोधिरैकौ त्र। अध्यग्न्याद्यावनि
कमित्यादि पूर्वोक्तपारिभाषिकस्त्रीधन एव मातृस्वामिकधनमात्रपरिभाषावैयर्थ्यात्तेन स्त्रीधनं स्यापेदं
स्मानां स्त्रीधनं दुहितॄणामित्यादीनि पूर्वोक्तानि स्त्रीधनपदवंति बृहस्पति गौतमादिवचनानि पारिभाषि
कपरारामेवायानि तु स्त्रीधनपदाभावे ये कार्यकानि भजेरन् सुताः। पित्रोरूर्ध्वं रिक्थमित्यादीनि तान्य
पेतत्परापेव। एकमूलकल्पनालाघवात्। यत्तु विभजेरन् सुताः। पित्रोरूर्ध्वं रिक्थमृणं समम् इति याज्ञ
वल्क्योक्तं तत्पारिभाषिकारितिक्तविभागे कर्तनादित्य संपरेतेन पारिभाषिकातिरिक्ते मातृधने दुहितृस
त्वे पुत्राद्ययव वलतेस्ततज्जनयविधसंतापभावे तु पारिभाषिकस्त्रीधने प्रकृत्य विशेषमाह याज्ञवल्क्यः। अतीता
याम प्रजसि बांधवास्तदवाप्नुयुः। विवाहभेदेन बांधवव्यवस्थामाह स एव। अप्रजःस्त्रीधनं भर्तुर्ब्राह्मादिषु

राम:

॥५२३॥

वेर्ष्यपि दुहितॄणां प्रसूता चोदेशे पेषु पितृगामितत्। भर्तुरभावे तत्कुले तस्याः प्रत्यासन्नो भर्तेपित्रभावे
वपितृकुले तस्याः प्रत्यासन्नः। अनंतरः सपिंडाद्यस्तस्य धनं भवेदिति मनुनाप्युक्तानिरूपितार्थ एव प्रत्यास
त्तेर्धनाधिकारितावच्छेदकत्वेनाभिधानात्। यत्तु मिताक्षरायामस्मिन्नभावे तत्प्रत्यासन्नानां सपिंडानामपि
त्राभावे च तत्प्रत्यासन्नानां सपिंडानामिति तत्रापि तेत स्याः प्रत्यासन्नास्तत्प्रत्यासन्नास्तदारान्तकुले प्रत्या
सन्नाः इति यावादित्येवादित्येव व्याख्येयं। ब्राह्मादिषु चतुरेवत तथा च मनुः। ब्राह्मदैवार्षगांधर्वप्राजापत्येषु
यद्वसु। अतीतायामप्रजसि भर्तुरेव तदिष्यते। यत्त्वस्यै स्याद्धनं दत्तं विवाहे ष्वासुरादिषु। अतीतायामप्रजसि
मातापित्रोस्तदिष्यते। ब्राह्मादिविवाहेषु भर्तुरभावे आसुरादिषु च पित्रोरभावे पारिभाषिकस्त्रीधनेऽ
धिकारिणः ह बृहस्पतिः। मातृष्वसा मातुलानी पितृव्यस्त्री पितृष्वसा श्वश्रूः। पूर्वजपत्नी च मातृतुल्याः प्रकीर्ति
ताः। यदासामौरसो न स्यात्सुतो दौहित्र एव वा। तत्सुतो वा धनं तासां स्वस्रीयाद्याः समाप्नुयुः। दुहितृदौहित्रौ
रप्यभावेऽत्र योध्यः। तदभाव एवौरसौ दौहित्रपौत्राधिकारात्। आसुरादिविवाहेषु बंधुदत्तेषु कात्यायनः।

बंधुदत्तं तु बंधुनामभावे पुत्रगामि तत्॥ शुल्कविषये तु गौतमः॥ भगिनीशुल्कः सोदर्याणामूर्ध्वं मातुरिति
मनुशंखः॥ शुल्कं नाम यद्यं वोढा ददाति तद्विवाहात्प्राक्प्रमृतायां वोढ्या॥ अत्र विशेषमाह कात्यायनः॥ मृतायां दत्तमादद्या
त्परिशोध्योभयव्ययं॥ पूर्वं दत्तं शुल्कं मृतायां कन्यायां स्वस्य तस्याः पितुश्चान्यथा ह्रवशिष्टं न गृह्णीयादिसि
पः॥ क्वचिद्विशेषमाह बौधायनः॥ रिक्थं मृतायां ग्रहणीयं पुः सोदराः समं तदभावे तु भर्तुरेवेदिति॥ इदं तु विवा
हात्प्राक्प्रमृतायां वाग्दानकाले मातामहादिदत्तालंकारादिविषयमिति सांप्रदायिकाः॥ अथ नंशाः॥ याज्ञव
ल्क्यः॥ क्लीबोथ पतितस्तज्जः पंगुरुन्मत्तको जडः॥ अंधोचिकित्स्यरोगाद्या भर्तव्याः स्युर्निरंशकाः॥ पतितो
त्पन्नः॥ विना गोचरमौषधादिना पुंस्त्वं नष्टं तत एव क्लीबोत्पन्नवत्॥ मनुः॥ अनंशौ क्लीबपतितौ जात्यंध
बधिरौ तथा॥ उन्मत्तजडमूकाश्च ये च केचिन्निरिंद्रियाः॥ निरिंद्रिया प्रमाणादि रहिताः॥ नारदः॥ पितृद्विट्पतित
षंढो यश्च स्यादौपपातिकः॥ औरसा अपि नैतेंशं लभेरन् क्षेत्रजाः कुतः॥ दीर्घतीव्रामयग्रस्ता जडोन्मत्तांधपंग राम:
वः॥ भर्तव्याः स्युः कुलस्यैते तत्सुतास्त्वंशभागिनः॥ औपपातिकः॥ राजद्रोहाद्यपराधेन बंधनिर्घटकोटे ॥५२४॥

दिनावहिष्कृत इति मदनः॥ व्यावसायार्थं नावा समुद्रमध्ये द्वीपांतरं गते ति तु युक्तं॥ द्विजस्याब्धौ तु नौयातुः शोधित
स्यापि संव्यवहारः इति तस्य कलौ संसर्गनिषेधात्॥ राजद्रोहादौ घटवृद्धिकारयोरविधानाच्च॥ शंखलिखितौ
अपपात्रिते रिक्थपिंडोदकानिवर्तंते इति॥ वसिष्ठः॥ अनंशास्त्वाश्रमांतरगता इति॥ नैष्ठिकब्रह्मचारिवा
नप्रस्थयतय इत्यर्थः॥ कात्यायनः॥ अक्रमोढासुतश्चैव सगोत्राद्यश्च जायते॥ प्रव्रज्यावसितश्चैव न रिक्थं तेषु
कर्हिचित्॥ सगोत्रादिति सगोत्रेणोढायां तस्माज्जात इत्यर्थः॥ अक्रमोढासुतः ज्येष्ठे जाते नानादिरिति केचि
त्॥ ज्येष्ठायां कन्यायामपरिणीतायां कनिष्ठा कृतविवाहा चेत्तदा तदेवापि अक्रमोढाशब्देनोच्यते इति तु यु
क्तं तत्र पितृसवर्णगत्वे शंका॥ नाक्रमाह स एवाक्रमोढासुतस्त्ववक्ष्यो सवर्णश्च यदा पितुः॥ असवर्णप्रसू
जश्चाक्रमोढायां च यो भवेत्॥ प्रतिलोमप्रसूतायां भर्तासुत्पन्नः पुत्रो नांशभाक्॥ तथा च स एव॥ प्रतिलोमप्र
सूतायास्तस्याः पुत्रो वा रिक्थभाक्॥ ग्रासाच्छादनमत्यंतं देयं तद्बंधुभिर्मतमिति॥ एतत्सूत्रांतरसत्त्वे इष्टं न
स्योशानाईतामाह मनुः॥ सर्व एव विकर्मस्था नार्हंति भ्रातरो धनमिति॥ बृहस्पतिः॥ सवर्णानां प्रगुणानां नार्हे

व्य·म·

॥६४॥

स्वाम्यित्वकेवलैः। मत्स्यिउदाः श्रीक्रियायेते षां तन्तु विधीयते। उत्तमर्णाधमर्णेभ्यः पितरं त्रायते सुतः। अतस्तु विप
रीतेन नास्ति प्रयोजनं। एते चानंशा रिक्थया। हि निर्यावज्जीवं पोषणीयाः। सर्वेषामपि तु न्याय्यं दातुं शक्त्या म
नीषिणा। ग्रासाच्छादनमत्यंतं पतितो ह्यददद्भवेदिति मनूक्तेः। अत्यंतं यावज्जीवं अनंशास्त्वात्मनिरंशका इति पूर्वोक्त
याज्ञवल्क्याच्च। आश्रमांतरगतपतिततत्सुतानां नेनर्त्तव्याः। तथा च वसिष्ठः। अनंशास्त्वाश्रमांतरगताः। क्लीबो
न्मत्तपतिताश्च भरणं क्लीबोन्मत्तजडांधकाः। पतितस्तदपत्यं च लिंगाद्यापौत्राभागिनः। तेषां पतितवर्ज्येभ्यो
भक्तवस्त्रं प्रदीयते। लिंगी निषिद्धलिंगधारी। बौधायनः। अतीतव्यवहारान् ग्रासाच्छादनैर्बिभृयुरंधजडक्ली
बव्यसनिव्याधितांश्चाकर्मिणः पतिततज्जवर्जमिति। मन्यानप्युततत्सुत्रवपिनन्नरणो प्रगाइतिमिदनादयः।
अनंशपुत्रास्तु निर्दोषा भागं लभंत एव। तेषामेवौरसाः पुत्रा भागहारिणो न तु पतितस्य पुतना ये कर्मणि
जाते नरोत्पन्नाः। प्रतिलोमासु स्त्रीषूत्पन्नाश्च भागिनस्तत्सुताः। पैतामहं द्रव्यं इति विज्ञेयं। औरसाः क्षेत्रजा
स्तेषां निर्दोषा भागहारिण इति याज्ञवल्क्योक्तेः। अनत्यं त्वन्या तु पत्नीपुत्रविशेषमाह सएव सुताश्चैषां प्रभर्त्त रामः

॥५२५॥

व्या यावद्वै भर्तृसात्कृताः। अपुत्रा योषितश्चैषां भर्त्तव्याः साधुवृत्तयः। निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव
च। व्यभिचारे च हीनिर्मासनमशेषाणां च प्रतिकूल्येन हिंसासनेव। भरणं तु कार्यमेवेति मिदनादयः। इति
श्रीमीमांसक शंकरभट्टात्मज नीलकंठकृते भगवद्भास्करे व्यवहारमयूखे दायभागनिरूपणं प्र
ष्ठं। ७। अथ ऋणादानं। तत्र धनिकस्य प्रयोगप्रकारमाह बृहस्पतिः। परिपूर्णं गृहीत्वाधिं बंधं वा साधु
लग्नकं। लेख्यारूढं साक्षिमद्वा ऋणं दद्याद्धनी सदा। यावन्नावकमृगानशो ध्यते तावद्देतं कृदस्ते त्वादेदां न
न विक्रेया धीकरणाघन्यदंनकरिष्यामीति निर्बंधो बंधः। लग्नकः प्रतिभूः। सएव कुत्सितात्सीदात्स्वे
व निर्दिष्टकैः प्रगृह्यते। चतुर्गुणं वा षड्गुणं कुसीदारव्यमतः स्मृतं। कृणिकेन तु या वृद्धिरधिका संप्रक
ल्पिता। आपत्कालकृता नित्यं दातव्या कारिता तु सा। प्रतिकालं ददात्येवं शिखावृद्धिस्तु सा स्मृतेति। प्रतिकालं
प्रतिदिनं प्रतिमासं प्रतिवर्षं वेत्यर्थः। याज्ञवल्क्यः। अशीतिभागो वृद्धिः स्यान्मासि मासि सबंधके। वर्णक्रमाच्छ
तं द्वित्रिचतुःपंचकमन्यथा। अन्यथा बंधके व्यासं बंधे भाग आशीतः षष्टो भागः सलग्नके। निराधाने

द्विकं शतं मासस्त्वान्न उदाहृतं॥ याज्ञवल्क्यः। कारकास्तु दशकं सामुद्रा विंशकं शतं। दद्युरितु सरवा वास्तव्यानु
षंगः दद्युर्वा स्वकृतां वृद्धिं सर्वे सर्वासु जातिषु इति। विष्णुः। योगृहीत्वा ऋणं सर्वेभ्यो दास्यामीति मासान्नकं न ददा
त्यो मतः द्विना द्वृद्धिमवाप्नुयात्। याचिते वृद्धिमाह कात्यायनः। यो याचितकमादाय तमदत्वा दिशं व्रजेत्। ऊ
र्ध्वं संवत्सरात्तस्य तद्धनं वृद्धिमाप्नुयात्। कृत्वोद्धारमदत्वा यो याचितस्तु दिशं व्रजेत्। ऊर्ध्वं मासत्रयात्तस्मा
त्तद्धनं वृद्धिमाप्नुयात्। स्वदेशे वा स्थितो यस्तु न दद्याद्याचितः क्वचित्। ते ताकारितां वृद्धिमनिच्छतिचदा
पयेत्। नारदः। न वृद्धिः प्रीतिदत्तानां स्यादनाकारिता क्वचित्। अनाकारितमप्यूर्ध्वं वत्सरार्द्धाद्विवर्द्धते। कात्याय
नः। प्रीतिदत्तं न वर्द्धेत यावन्न प्रतियाचितं। याच्यमानमदत्तं चेद्वर्द्धते पंचकं शतं। परपण्यं गृहीत्वा यो मूल्येम
दत्वैव दिशं व्रजेत्। ऋतुत्रयस्योपरिष्टात्तद्धनं वृद्धिमाप्नुयात्। निक्षिप्तं वृद्धिशेषं च क्रयं विक्रयमेव च
याच्यमानमदत्तं चेद्वर्द्धते पंचकं शतं। नारदः। पण्यं मूल्यं भृतिर्न्यासो दंडो यश्च प्रकल्पितः। बृहस्पतिः।
हिरण्ये द्विगुणा वृद्धिस्त्रिगुणा वस्त्रकुप्यके। धान्ये चतुर्गुणा प्रोक्ता शदवाह्यलवेषु वा। शादः शुष्पमूलफल

दि। वाह्यं वाहनादि। लवं रोमेषोर्णं चमरीकेशादि। यत्तु मनुः। धान्ये शदे लवे वाह्ये नातिक्रामति पंचतामिति। तत्
पंचगुणादिनिषेधपरं। कात्यायनः। मणिमुक्ताप्रवालानां सुवर्णरजतस्य च। तिष्ठति द्विगुणा वृद्धिः फलकैटाविक
स्यतु। कैटकीटप्रजं वपट्टकूलतसरीवस्त्रादि। वसिष्ठः। ताम्रायःकांस्यरीतीनां त्रिगुणा सीसकस्य च। त्रिगुणाति
ष्ठतो वृद्धिः फलावीरकृतस्य तु। व्यासः। शाककार्पासबीजेषु षड्गुणा परिकीर्तिता। कात्यायनः। तैलानां चैव सर्वेषां
मद्यानामथ सर्पिषां। वृद्धिरष्टगुणा ज्ञेया गुडस्य लवणस्य तु। विष्णुः। हिरण्यस्य द्विगुणा वृद्धिस्त्रिगुणा वस्त्रस्य धा
न्यस्य चतुर्गुणा रसस्याष्टगुणा संततिः स्त्रीपशूनामिति। पुष्पमूलफलानि चतुर्लाधृतमष्टगुणामिति। नार
दः। ऋणानां सर्वबंधानां विधिः करः स्मृतः। देशाचारस्थितस्त्वन्यो यत्रर्णमवतिष्ठते। सार्वभौमो सार्वत्रिकः।
द्वंद्वं चैव द्विगुणपादि समस्तप्रयोग एव। कालान्तरेण पुरुषान्तरेण तत्रैव रेकेसेकोदिता वा प्रयोगान्तरेण परमद्वहे
रप्येधिका भवति। तथा च मनुः। कुसीदवृद्धिर्द्वैगुण्यं नात्येति सकृदाहिता। एकप्रयोगमध्ये तरांतरागृहीत्वा
णे पि परमद्वैरप्यधिकामिति सांप्रदायिका विज्ञानेश्वरादयः। अपापविधिः। बृहस्पतिः। स्वाधिर्वधास

माख्यातः स च प्रोक्तश्चतुर्विधः॥ जंगमस्थावरश्चैव गोप्यो भोग्यस्तथैव च॥ नारदः॥ अधिः क्रियत इत्याधिः स विज्ञेयो द्विल
क्षणः॥ कृतकालोपमेयश्च यावद्देयोद्यतस्तथा॥ हारीतः॥ बंधं यथास्थापितं स्यात्तथैव परिपालयेत्॥ अन्यथा
नश्यते लाभो यावद्देयो द्यतस्तथा॥ हरीतः॥ बंधं यथांशं॥ याज्ञवल्क्यः॥ गोप्याधिभोगे नो वृद्धिः सोपकारेथ हापित
इति॥ हापिते उपकाराक्षमनीते इत्यर्थः॥ कात्यायनः॥ अकाममननुज्ञातमाधिं यः कर्म कारयेत्॥ भोक्ता कर्म
फलं दाप्यो वृद्धिं वा न लभेत सः॥ कर्म कारयेत वा प्रयुंजीत कर्मफलं भाटकं॥ याज्ञवल्क्यः॥ नष्टो देयो विनष्टश्च दै
वराजकृताद्दृते॥ नष्टो विकृतिं गतः॥ पूर्ववत्कृत्वा देयः॥ बृहस्पतिः॥ मुक्ते तु मारुजं प्राप्ते मूल्यहानिः प्रजायते॥ आ
धेर्विनाशे नष्टस्य दातव्यमिति धारणं॥ यदीदृदोषो न्नष्टश्चेद्वधो देमादिकान वेत्॥ तेषां रूपाणसत्त्वाने मंशो
धोन मूल्यं दापयेद्धनी॥ नारदः॥ विनष्टे मूलनाशः स्याद्दैवराजकृताद्दृते॥ मनुः॥ न त्वेनाधौ षयेद्येवेनमाधिस्ते
नोन्यथा भवेत्॥ बृहस्पतिः॥ दैवराजोपघातेन यत्राधिर्नाशमाप्नुयात्॥ तत्राधिर्दापयेद्द्यात्सो धनं वा रुणी॥ व्या
सः॥ दैवराजोपघाते तु न दोषो धनिनः क्वचित्॥ इति॥ कात्यायनः॥ न चेद्धनिकदोषेण नपतिर्दाप्यविक्रयेत वा॥ आ

धिमन्यं स दाप्यः स्यादृणान्मुच्यते न णिकः॥ याज्ञवल्क्योपि॥ आधेः स्वीकरणात्सिद्धी रक्ष्यमाणोप्यसारतां॥ यातश्चे
दन्य आधेयो धनभाग्वा धनी भवेत्॥ नारदः॥ आधिस्तु द्विविधः प्रोक्तो जंगमस्थावरस्तथा॥ सिद्धिरस्योभयस्या
पि भोगो यद्यस्ति नान्यथा॥ वसिष्ठोपि॥ तुल्यकाले निसृष्टानां लेख्यानामाधिकर्मणि॥ येन भुक्तं भवेत्पूर्वं तस्या
धिर्बलवत्तरः॥ स एव यद्येकदिवसे तेषु भोक्तुकामानुपागतो॥ विभज्याधिः समस्तत्र भोक्तव्य इति निश्चय
:॥ कात्यायनः॥ आधिमेकं द्वयोर्यस्तु कुर्यान्न प्रतिपद्यते॥ तयोः पूर्वकृते ग्राह्यं तत्कर्ता चोरदंडभाक्॥ याज्ञवल्क्य
:॥ आधिः प्रणश्येद्द्विगुणे धने यदि न मोच्यते॥ काले कालकृतो नश्येत्फलभोग्यो न नश्यति॥ बृहस्पतिः॥ हिरण्ये
द्विगुणीभूते पूर्णे काले कृतावधौ॥ बंधकस्य धनी स्वामी द्विसप्ताहं प्रतीक्ष्य तु॥ व्यासः॥ गोप्याधिर्द्विगुणे ऊर्ध्वं कृतका
लः कृतावधेः॥ ऊर्ध्वं वेदपितृण्ये कुले भोक्तव्यस्तदनंतरं॥ बृहस्पतिः॥ हिरण्ये द्विगुणीभूते तेन्मृते तु दृष्टे धमर्णिके॥ द्रव्यं
तदीयं संगृह्य विक्रीणीत समाक्षिकं॥ याज्ञवल्क्यः॥ चरित्रबंधककृतं सवृद्धा दापयेद्धनं॥ सत्यंकारकृतं द्रव्यं
द्विगुणं प्रतिदापयेत्॥ धनिकविश्वासेनान्यद्रव्यार्पणमतिवर्तुल्यः स्थापितश्चेदेव धनिकविश्वासेन वात्सल्यम्

स्योवकृष्यार्थं स्थापितं श्चेच्चरित्रबंधकं। अथवा चरित्रं गंगास्नानादि तत्पुण्यमाधीकृतं चरित्रबंधकं। एतदुभय
विधमपि चरित्रबंधकं द्विगुणं कृतेपि द्रव्ये न नश्यति। द्विगुणीभूतमपि द्रव्यमेव देयं नाधिनाश इति सत्यंकार
कृतं तदपि द्विगुणीकृते द्रव्ये न नश्यतीत्यर्थः। स एव। उपस्थितस्य मोक्तव्य आधिः स्तेनोन्यथा भवेत्। प्रयोज
के सति नं कुलेऽन्यस्याधिमाप्नुयात्। तत्कालकृतमूल्यो वा तत्र तिष्ठेदवृद्धिकः। उत्तमर्णेऽसंनिहिते तस्य कुलेन्य
स्य हस्ते सवृद्धिके धनं दत्वाधिर्ग्राह्यः। आधिविक्रयेण तु धनदित्सायां तत्कालं मूल्यं कृत्वा वृद्धिरहितः स्थाप्य इ
त्यर्थः। बृहस्पतिः। क्षेत्राधिकं यदा भुक्तं मूल्यं तत्तमधिकं ततः। मूलोदयं प्रतिविष्टं चेत्तदाधिं प्राप्नुयादृणी। याज्ञ
वल्क्यः। यदा तु द्विगुणीभूतमृणमाधौ तदा खलु। मोच्य आधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धने। अथ प्रतिभूः। तत्रै
विध्यमाह याज्ञवल्क्यः। दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते। प्रत्ययः समीचीनोयमित्यस्माकं विश्वासो रामः
त्पादनं बृहस्पतिस्तु चातुर्विध्यमाह। अहं दर्शयामीति साधुरित्यपरो ब्रवीत्। दाताहमेतद्द्रविणम
र्पयामीति चापरः। अर्पयामि दापयिष्यामीत्यर्थः। कात्यायनः। नष्टस्यान्वेषणार्थं तु देयं पक्षत्रयं परं। यद्यसौ ॥५२८॥

दर्शयेत्तत्र मोक्तव्यः प्रतिभूर्भवेत्। पक्षत्रयमित्यन्वेषणे वा कालोपि दिष्टस्तावंतं दद्यादित्यर्थः। कात्यायनः।
दर्शनप्रतिभूर्यस्तु देशे काले न दर्शयेत्। निबंधमावहेत्तत्र दैवराजकृतादृते। निबंधमावहेद्धनिकाय धनं दद्या
त्। बृहस्पतिः। आद्यौ तु वितथे दाप्यौ तत्कालावेदितं धनं। उत्तरौ तु विसंवादे तौ विनाजन्मनौ तथा। कात्यायनः।
प्रातिभाव्यागतं पौत्रैर्दातव्यं न तु तत्क्वचित्। पुत्रेणापि समं देयमृणं सर्वत्र पैतृकम्। व्यासोपि। ऋणं पैतामहं
पौत्रः प्रातिभाव्यागतं सुतः। समं दद्यात्तत्सुतौ तु न दाप्याविति निश्चयः। पैतामहमृणं पौत्रैर्मूलमात्रं दद्यात्प्रा
तिभाव्यागतं पुत्रपौत्राभ्यामपि समं वृद्धिकं देयं। तथा च कात्यायनः। गृहीत्वा बंधकं यत्र दर्शनेस्य स्थितो
भवेत्। विना पित्रा धनात्तस्माद्दाप्यः स्यात्तदृणं सुतः। याज्ञवल्क्यः। बहवः स्युर्यदि स्वांशैर्दद्युः प्रतिभुवो धनं। एक
च्छायाश्रितेषु धनिकस्य यथारुचि। अहमेवं सर्वं दास्यामीति प्रत्येकं प्रतिज्ञा एकच्छायानाश्रितेष्वापन्नेषु
धनिके छायायाः कश्चिद्दद्यात्। अंशैर्दास्याम इति प्रतिज्ञायां तु तथा देयमित्यर्थः। कात्यायनः। एकच्छायाप्रवि
ष्टानां दाप्यो यस्तत्र दृश्यते। प्रोषिते तत्सुतः सर्वं पित्र्यंशं तु मृते सुतः। पित्र्यंशान्न पित्र्यंशानुसारेण। याज्ञवल्को

व्य.म.
॥६८॥

पि॥ प्रतिगृहीतं पितो यस्तु प्रकारो धानिनो धनं॥ द्विगुणं प्रतिदातव्यं ऋणिकैस्तस्य तद्भवेत्॥ बृहस्पतिः॥ प्रातिभाव्यं
चयोर्दद्यात्पाउितः प्रतिभावितः॥ त्रिपक्षात्परतः सोपि द्विगुणं लघु मर्हति॥ अथोत्तमस्सर्षं ग्रहणप्रकारः॥ बृहस्प
तिः॥ प्रतिपन्नस्य रणं दाप्यः सामादिभिरुपक्रमैः॥ धर्मोपाधिबलात्कारैर्गृहसंरोधनेन च॥ प्रतिपन्नमधर्मेणागी
कृतं॥ उपक्रमैरुपायैः॥ नान्विपणेतिसएव॥ सुहृत्संबंधुसंदिष्टैः सामोक्त्यानुगमेन च॥ प्रायेण वा ऋणं दाप्यो
धर्म एष उदाहृतः॥ छद्मना याचितं चार्थ आनीयते ऋणीकारणं॥ अन्वाहितादिसंगृह्य दाप्यते प्रवसो बधिः॥
ब धात्स्वगृहमानीय ताडनाद्यैरुपक्रमैः॥ ऋणिको दाप्यते यत्र बलात्कारः स उच्यते॥ पुत्रदारं पशुं बध्वा द्वारे त्वाश
रोपवेशनं॥ यत्रणिको दाप्यते यं तदाचरितमुच्यते॥ अनुगमो नुसरणं प्रायः प्रार्थना॥ अन्वाहितमन्यस्मै दा
तुं दत्तमलंकारादि॥ धर्माद्युपायानां नियममाह कात्यायनः॥ राजानं स्वामिनं विप्रं सांत्वेनैव प्रदापयेत्॥ ऋ
णिनं सुहृदेवापि छलेनैव प्रदापयेत्॥ वणिजः कर्षकांश्चैव शिल्पिनश्चाब्रवीद्गुरुः॥ देशाचारेण दातव्यास्सु
दुष्टात्सुपायैः प्रदापयेत्॥ स एव धार्योपरुद्ध ऋणिकः प्रकारो जनसंसदि॥ यावद्दद्यादिदं देशाचारस्थि रामः
॥५२॥

तिर्यथा॥ अवरुद्धस्य विण्मूत्रशंकायामवरोधनं निषेधेति स एव॥ विण्मूत्रशंका यत्र स्यात्प्रार्थमानस्य देहिनः
दृष्टस्तमनुगंतव्यो निबंधं वा समुत्सृजेत्॥ निबंधेस्त्वप्रतिनिधिस्तत्पुत्रादिकं॥ अवरुद्धो दर्शनप्रतिभुवं
गृहीत्वा देहनाकव्य इत्याह स एव॥ सहृतप्रतिभूश्चैव मोक्षव्यस्यादिने दिने॥ आहारकाले रात्रौ च निबंधे
प्रतिभूस्थितः॥ यो दर्शनप्रतिभूर्वनाधिगच्छेन्न वा श्रयेत्॥ स वारके निरोधव्यः स्याद्योवावेधारक्षिणा॥ न चारके
निरोद्धव्यः अर्थप्रत्यतः॥ शुचिलेनिबंधान्मोक्तव्यो निबंधः शापथेन वा॥ नवश्रयेन्न दद्यात् चारके कारागारे रक्षि
णोरक्षकानावेदयस्थाप्य॥ अस्यापि को विच्यस्य॥ बृहस्पतिः॥ पूर्णे वधेर्यातलाभेऽ ऋणमुद्धरयेद्धनी॥ कारयेद्वाध
मर्लिखं चक्रवृद्धिव्यवस्थया॥ पूर्णवधौ द्विगुणं पादिके जाते अत एव यातलाभ नवोपपद्यते धनी ऋणं तदुत्
क्ष्येत् गृह्णीयात् वृद्धिमपि मूलेप्रदेयतस्यापि वृद्धिकरणं चक्रवृद्धिः॥ नारदः॥ अथ शक्तिविहीनः स्यादृणी
कालविपर्ययात्॥ शक्त्यपेक्षं ऋणं दाप्यं काले कालेयथोदयं॥ मनुः॥ कर्मणापि समं कुर्याद्धनिकस्याधमर्णि
कः॥ समोपकृष्टजातिश्च दद्याच्छ्रेयांस्तु तच्छनैः॥ यमुयाज्ञवल्क्यः॥ हीनजातिं परिक्षीणमृणार्थं कर्म कारये

तः। ब्राह्मणस्तु परिक्षीणः शनैर्दाप्यो यथोदयमिति। तत्र ब्राह्मणपदमुत्कृष्टजातिपरं॥ स एव। प्रपन्नं साधयन्न
र्थं न वाच्यो नृपतेर्भवेत्। साध्यमानो नृपं गच्छन्दंड्यो दाप्यश्च तद्धनं॥ बृहस्पतिः। प्रतिपन्नस्य धर्मोयं व्यपलापी तु
संसदि। लेख्येन साक्षिभिर्वापि भावयित्वा प्रदाप्यते। नरो धर्म्यः क्रियावादी संदिग्धेर्थे कथंचन॥ आसेधयस्तु
नासेध्यं दंड्यो भवति धर्मतः। आसेधो राजसमयावरोधः। स एव। प्रदातव्यं यद्भवति न्यायऽतस्तद्दाप्यते। एवं पत्र
र्णिको ब्रूते क्रियावादी स उच्यते। कात्यायनः। पीडयेत्तु धनी यत्र ऋणिकं न्यायवादिनं। तस्मादर्थात्स हीयेत तत्स
मं वाप्नुयाद्दमं॥ बृहस्पतिः। ज्ञात्वा नैव धनं राज्ञे यः संदिग्धेर्थे प्रवर्तते। असंख्य सविनेयः स्यात्स्ववाप्यर्थेन सिध्यति
यमः। ऋणिकः सधनो यस्तु दौरात्म्यान्न प्रयच्छति। राज्ञा दापयितव्यः स्याद्गृहीत्वा द्विगुणं ततः॥ याज्ञवल्क्यः। राज्ञाध
मर्णिको दाप्यः साधिताद्दशकं शतं। पंचकं च शतं दाप्यः प्राप्तार्थो ह्युत्तमर्णिकः। दशकं दशोत्तरं दशकं शतमित्यर्थ
ः। तन्नैतावंशो राज्ञोऽन्यस्तु तमर्णिकस्येति भावः। दशकग्रहणं निर्धनिकपरं सधने तु विशेषमाह नारदः। ऋणिकः स
धनो यस्तु दौरात्म्यान्न प्रयच्छति। राज्ञा दापयितव्यः स्याद्गृहीतानुक्रमादायो धनिनामधमर्णिकः। दत्वा तु ब्रा

ह्मणायैन नृपतस्तदनंतरं विवादस्त्वाकरे कात्यायनः। नीतार्थसमवाये तु यद्यत्स्वं कृतं भवेत्। तत्र देवाग्रतो दे
यं राज्ञः श्रोत्रियतो नु च। एकाहे लिखितं पत्रं तत्र कुर्याद्दृणं समं। ग्रहणं त्वान्यथा तु यथा तु यथाक्रमं। य
स्य द्रव्येण यस्तु ऋणं साधितं यो विभावयेत्। तदृणिको नैव दातव्यं तस्य नान्यथा॥ याज्ञवल्क्यः। लेख्यस्य पृष्ठेऽभिले
खेद्दत्वा दत्वर्णिको धनं। धनी वोपगतं दद्यात्स्वहस्तपरिचिह्नितं। लेख्यं दद्याद्विशुद्धर्णे तदभावे प्रतिश्रवाधध
निकर्णिकयोरेवं विविशुद्धिः स्यात्परस्परं। प्रतिश्रवः प्रतिदानं श्रवणं यद्वा द्विपत्रं। ऋणादाने धर्मेणोक्तानि ष्टं
फलमाह कात्यायनः। उद्धारादिकमादाय स्वामिने न ददाति च। स तस्य दासो भृत्यः स्त्री पशुर्वा जायते ध्रुवं। उ
द्धारो ऋणं। स्वादिना याचितनिक्षेपयोर्ग्रहणं। दासो गर्भदासः। भृत्यो भृत्योपात्तः॥ नारदः। याचमानं न दद्याच्चेद
णं वापि प्रतिग्रहं। ततद्रव्यं वर्धते तावद्यावत्कोटिगुणं भवेत्। ततः कोटिशतोते पूर्णे वेष्टितस्तेन कर्मणा। ब्रह्मस्व
रो वृषो दासश्च भवेज्जन्मनि जन्मनि याच्यमानं दत्तं प्रतिश्रुते। व्यासोपि। तपस्वी चाग्निहोत्री च ऋणवान्म्रियते यदि त
पश्चैवाग्निहोत्रं च सर्वं च धनिनो भवेत्। बृहस्पतिः। ऋणमात्मीयवत्पित्र्यं पुत्रैर्देयं विभावितं। तामहसमं देयं

तत्सुतस्य च। याज्ञवल्क्यः। पितरि प्रोषिते प्रेते व्यसनाभिप्लुतेऽपि वा। पुत्रपौत्रैर्ऋणं देयं निह्नवे साक्षिभावितं॥ वि
शंति वर्षवयसा पुत्रादीनां ऋणं देयमित्याह नारदः। अर्वाक् संवत्सराद्विंशात् पितरि प्रोषिते सुतः। ऋणं दद्या
त्पितृव्ये च ज्येष्ठे भ्रातर्यथा पिता॥ कात्यायनः॥ विद्यमानेऽपि रोगार्ते स्वदेशात्प्रोषितेऽथवा। विंशात्संवत्सराद्देय
मृणं पितृकृतं तथा॥ प्रोषितपदं मृतस्याप्युपलक्षकं॥ अतएव विष्णुः। धनग्राहिणि प्रेते प्रव्रजिते द्विदशाः स
माः प्रोषिते वा तत्पुत्रपौत्रैर्न देयं। नारदः॥ पितर्युपरते पुत्रा ऋणं दद्युर्यथांशतः। विभक्ता अविभक्ता वा यो वा
तामुद्वहेत्॥ कात्यायनः॥ पित्रर्णे विद्यमाने तु न च पुत्रो धनं हरेत्। देयं तद्धनिके देयं कृते पुत्रस्तु दाप्यते। द्रव्यमृत
इति संबंधः। द्रव्यं विनेत्यर्थः॥ बृहस्पतिः॥ पित्र्यमेवाग्रतो देयं पश्चादात्मीयमेव च॥ तयोः पैतामहं पूर्वं देयमेव
ऋणं सदा। याज्ञवल्क्यः॥ सुराकामद्यूतकृतं दंडशुल्कावशिष्टकं। वृथादानं तथैवेह पुत्रो दद्यान्न पैतृकं॥ बृह
स्पतिः॥ सौराक्षिकं वृथादानं कामक्रोधप्रतिश्रुतं॥ प्रतिभाव्यं दंडशुल्कं शेषं पुत्रं न दापयेत्। उशना। दंड
वा दंडशेषं च शुल्कं तच्छेषमेव च। न दातव्यं तु पुत्रेण तच्च न व्यावहारिकं। ऋणदानाधिकारिणां क्रममाह या

रामः
।।५३१।।

ज्ञवल्क्यः। रिक्थग्राह ऋणं दाप्यो योषिद्ग्राहस्तथैव च। पुत्रोऽनन्याश्रितद्रव्यः पुत्रहीनस्य रिक्थिनः॥ जेरव्या
दिदोषयुक्ते पुत्रे विद्यमानेऽपि यो न्यायेन दोषाभावेऽप्यन्यायेन वा तत्पित्र्यं रिक्थं हरते स रिक्थग्राहः॥ एव
मेव परस्त्रीहृतयोषिद्ग्राहः॥ अनन्याश्रितद्रव्यत्वं भूतत्वमप्यपि अन्याश्रितत्वरूपविशिष्टप्रतियोगिका
भावाद्व्यरूपविशेषणमात्रप्रतियोगिकाभावः। अत्रादौ रिक्थग्राहः तदभावे योषिद्ग्राहस्तदभावेऽनन्या
श्रितद्रव्यः पुत्रः तदभावे पौत्रमात्रं तदभावे प्रपौत्रः पत्नीकन्यादयो रिक्थिनो द्रव्यग्राहिणोऽप्येवं दद्यु
रित्यर्थः॥ रिक्थग्रहणाभावे प्रपौत्रेण पत्न्यादिनिःस्वनः॥ पुत्रहीनस्यात्र मर्त्यस्य ऋक्थिनोऽद्रव्यग्रहणाधि
कारिणः पत्नीकन्यादयः पत्न्यादीनामधर्मेणाद्यरोगे क्लीबत्वरित्यन्वयो तिमपादार्थः॥ विष्णुः॥ अपुत्रस्य वाप
पुत्रस्य ऋक्थग्राही ऋणं दद्यादित्यर्थः। बृहस्पतिः॥ स्त्रीहारी च तथैव स्यात्तदभावे धनहारिणः॥ कात्यायन
॥ ऋणं तु दापयेत्पुत्रं यदि स्यान्निरुपद्रवं। द्रविणार्हश्चतुर्थश्च नान्यथा दापयेत्सुतं॥ पूर्वं दद्याद्धनग्राह
ः पुत्रस्तस्मादनंतरं॥ योषिद्ग्राहः सुताभावे पुत्रे वात्यंतनिर्धने। नारदः॥ या तु सप्रधनैव स्त्री सापत्या चान्य

व्य॰म॰

॥७१॥

माश्रयेत्। सोस्याद्द्यादृणं भर्तुरुत्सृजेद्वा तथैव तां। कात्यायनः। निर्द्धनेरनपत्यैस्त्रक्ष्य यत्कृतं शौंडिकादि
भिः। तत्स्त्रीणामपि भोक्ता तु दद्यान्नदृणमेव हि। नारदः। धनस्त्रीहारिपुत्राणामृणभाग्यो धनं हरेत्। पुत्रो
सतोः स्त्रीधनिनोः स्त्रीहारी धनपुत्रयोरितिस धनपुत्राभावे स्त्रीहारीकृणं दद्यादित्यनुपादार्थः। कात्याय
नः। प्रोषितस्यामतेनापि पितुर्द्रव्यार्थमृणं कृतं। दासस्त्रीमातृशिष्यैर्वा दद्यात्पुत्रेणवान्यथा। याज्ञवल्क्यः
तपोषित्पतिपुत्राभ्यां नपुत्रणकृतं पितादद्यादृते कुटुंबार्थौ पतिःस्त्रीकृतं तथा। कात्यायनः। येयेप्रति
ष्कृतं यद्यासयस्यादनुमोदितं। नारदः। कृतवांपदृणं ऋक्षेदघातुत्रस्पतलिता। याज्ञवल्क्यः। गोपशौंडि
कशैलूषरजकव्याधयोषितां ऋणं दद्यात्पतिस्तासां यस्माद्वृत्तिस्तदाश्रया। सएव। प्रतिपन्नस्त्रिया देयं
पत्यावसह यत्कृतं। स्वयंकृतं प्रवादृणं नान्यस्त्रीदातुमर्हति। अप्रतिपन्नमपरिवस्थायाहितास्त्रीदद्या
त्। तथाच कात्यायनः। भर्तुर्का मेनया भर्त्रोत्कर्के देयमृणं तया। अप्रपन्नापित्ता दायधनं दद्यात्स्थितं
स्त्रिया। नारदः। पुत्रणात्तमसंसृज्य पुत्रस्त्रीयायस्माश्रयेत् तस्याऋणं हरेत्सर्वं निःस्वायाःपुत्रसूत्रं इदं रामः

॥५३२॥

तुरिक्थग्राहस्पुत्रपरं॥ नारदः। पितृव्येण विभक्तेन भ्रात्रा वायदृणं कृतं। मात्रा वायत्कुटुंबार्थे दद्युस्तत्सर्वंरि
क्थिग्राहस्पुत्रपरं नारदः। पितृव्येण विभक्तेन भ्रात्रा वा यदृणं कृतं। उत्तमर्णस्तत्सुत्राद्यभावे ऋणदानेप्रकारमा
ह नारदः। ब्राह्मणस्यतु यद्देयं सान्वयस्य न चास्तिसः। निर्वपेत्तत्सकुल्येषु तदभावेस्य बंधुषु। यदातु न सकुल्या
स्युर्न च संबंधिबांधवाः। तदा दद्याद्द्विजेभ्यस्तु तेष्वसत्स्वप्सु निक्षिपेत्। प्रजापतिरपि। बंधुरभावे विप्रेभ्यो देयं स्वे
प्वं जलेपि वा जले क्षिप्तं तयोर्भोगेच धानं स्यात्पारलौकिकं। यदा तु जलादौ क्षिप्तेधन्यापतितदासत्रा भोत्येव
इति श्रीभट्टशंकरात्मजभट्टनीलकंठकृते भगवंतभास्करे व्यवहारमयूखे ऋणादानप्रकरणं। अथ निक्षेपः।
नारदः। स्वद्रव्यं यत्र निक्षेपाद्विक्षिपत्यविशंकितः। निक्षेपो नाम तत्प्रोक्तं व्यवहारपदं बुधैः। असंख्यातमवि
ज्ञातं समुद्रं यन्निधीयते। तज्जानीयादुपनिधिं निक्षेपं गणितं विदुः। बृहस्पतिः। द्रदत्तो यद्भवेत्पुण्यं हेमरूप्यांबरादि
कं। तत्स्यात्याञ्चयतोन्यासं तथैव न्नारणायते स्थापितं येन विधिना येन यच्च यथा विधि तथैवतस्पदातव्यं नदेयं
त्वनंतरे। न्यासोनिक्षेपः। मनुः। यो निक्षेपं तार्यपति पश्चान्निक्षिप्य याचते। तावुभौ चौरवच्छास्यौ दाप्यौ वा तत्समं द

व्य.म.

।।७२।।

ममिति॥ नैरेनोपेक्षया नाशितं रोषः॥ याज्ञवल्क्यः। आजीवन् स्वेच्छया दण्ड्यो दाप्यस्तच्चापि सोदयं॥ आजीवनान्ना
गवृद्ध्यर्थप्रयोगादिनोपजीवनः। तस्य विशेषमाह। कात्यायनः॥ निक्षेपं वृद्धिशेषं च क्रयं विक्रयमेव च॥ या
च्यमानं तं चेद्याद्दत्तेपं च कं ज्ञातं॥ मितिमनुः॥ निक्षेपस्यापहर्त्तारं तत्समं दापयेद्दमं॥ तथोपनिधिहर्त्तारं वि
शेषेणैव पार्थिवः॥ बृहस्पतिः। दैवराजोपघातेन यदि तन्नाशमाप्नुयात्॥ गृहीतद्रव्यसहितं न तत्र दोषो न विद्यते।
याज्ञवल्क्यः॥ न दाप्योपहृतं तत्तु राजदैविकतस्करैः॥ स्वयमेव तु यो दद्यान्मृतस्य प्रत्यनंतरं॥ न स राज्ञा नियोक्त
व्यो नानिष्टे प्रस्वत्वं धुनिः॥ अत्यनंतरसंनिहित। प्रमाणं विनाधिकारविषये तानियोज्य इत्यर्थः॥ सर्वमपं तु
निक्षेपन्यायमन्यत्राप्यतिदिशति बृहस्पतिः॥ अन्वाहिते याचितके शिल्पिन्यासे सबंधके॥ एष एवोदितो ध
र्मस्तथा च शरणागते॥ अन्वाहितममुकेनमपि स्थापितं त्वया तस्मै देयमिति पुरुषांतरहस्ते र्पितं याचित
मुद्वाहादौ शोभार्थं नीतमलंकारादि शिल्पिन्यासो हेमकारादिषु कुंडलादिघटनार्थं निक्षिप्तं नारदोपि॥ एष एव
विधिर्दृष्टो याचितान्वाहितादिषु॥ शिल्पिषूपनिधौ न्यासे प्रतिन्यासे तथैव च॥ प्रतिन्यासः स्वामिनायत्र नि

रा.म.

।।५२।।

क्षिप्तं तेनाप्यन्यत्र निक्षिप्तं॥ राजदैवादिनष्टस्यापि शिल्पिन्यस्तस्य कश्चित्प्रतिन्यासः स्वामिना यत्र निक्षिप्तं तेना
प्यन्यत्र निसोदिवसैः परिनिष्ठितैः। तद्द्रव्यं स्थापयेच्छिल्पी दाप्यो दैवात्कृतेपि तं॥ याज्ञवल्क्यः॥ वसानत्रःस्त्रीलगा
न्दं ओरजकस्तु पराङ्मुकं॥ विक्रयावनयाचितेषु पण्यान्दद्यात्॥ आवक्रयो भाटकं॥ गृहीत्वान्यत्रार्पणं आधाम
धीकरणं॥ सुवर्णनिन्न धातावयोध्मायमोक्षोसनियमो माह सएव॥ अग्नौ सुवर्णमक्षीणं रजतं द्विपलं शतं॥ अ
ष्टौ त्रपुणि सीसे च ताम्रे पंच दशायसि॥ इतोधिके रूप्यादेः क्षये हेमकारादेर्दंडः॥ कश्चिद्वस्त्रायर्पतं तंतुसंसर्पणेव
द्धौ निरोषमाह सएव॥ शते दशपला वृद्धिरौर्णकार्पाससौत्रिके॥ मध्ये पंचपला वृद्धिः सूक्ष्मे तु त्रिपला मता॥ क
चित्क्षयमाह सएव॥ कार्मिके रोमबंधे च त्रिंशद्भागः क्षयो मतः। न क्षयो न वृद्धिश्च कौशेय वल्क
लेषु चेति॥ कार्मिके सिद्धपदादौ पदस्वस्तिकाद्याकारनिर्माणे॥ निपतावधिके शिल्पिन्यस्तेन्वधिमध्ये
याचितोऽदत्ते नष्टेपि च शिल्पिनो षाभावमाह सएव॥ यदि तत्कार्यमहिद्वपकालं परिनियम्य वा याचितो न
कृते तस्मिन्नप्राप्ते न तु दाप्यते एतद्विपर्ययमाह सएव॥ प्राप्तकाले कृते कार्ये न दद्याद्याचितोपि सन्॥ तस्मिन्न

ष्टेहृते वापि प्रहीतान्मूल्यमावहेत् सएव। योयोचितकमादाय न दद्यात्प्रतियाचितः सनिगृह्य बलाद्दाप्यो दंड्यश्च
न ददातियः॥ ॥इति व्यवहारमयूखे निक्षेपप्रकरणं॥ अथास्वामिविक्रयः व्यासः। याचितान्वाहितन्यासं हत्वा
चान्यस्य यद्धनं। विक्रीयते स्वाम्यभावे स ज्ञेयोऽस्वामिविक्रयः कात्यायनः अस्वामिविक्रयं दानमाधिकां विनिव
र्त्तयेत्। अस्वामीति पृथक्पदक्रियाविशेषणं च। नारदोपि प्रकाशात॥ क्रयःशुद्धः क्रेतुस्तेयं रहःक्रमात्
नारदः॥ अस्वाम्यनुमताद्दासादसतश्च जनाद्रहः। हीनमूल्यमवेलायां क्रीणंस्तद्दोषभाग्भवेत्। तद्दोषश्चौर
दोषः। याज्ञवल्क्यः आगमोप्युपभोगेन न दृष्टो नाश्यमतोन्यथा। पंचबंधो दमस्तस्य राज्ञे तेनाविभाविते। पंच
बंधो नष्टद्रव्यपंचमांशः। नाष्टिकोपन्यस्तसाक्षिणां विरुद्धोक्तौ नष्टद्रव्याद्द्विगुणं दंडमाह व्यासः। वादी चे
न्मार्गितद्रव्यं साक्षिभिर्न विभावयेत्। दाप्यस्याद्द्विगुणं दंडं क्रेता तद्वा यमर्हतीति। क्रेतुः कस्मै माह सएव
मूले समाहृते क्रेता नाभियोज्यः कथंचन। मूलेन सह वादस्तु नाष्टिकस्य विधीयते बृहस्पतिः विक्रे
तादर्शितो यत्र हीयते व्यवहारतः। क्रेता राज्ञे मूल्यदंडौ प्रदद्यात्स्वामिनो धनं। कात्यायनः मूलानयनकालत

द्देयो देशसंख्यया। असमाहार्यमूलस्तु क्रयमेव विशोधयेत्। विशोधिते क्रये राज्ञा वक्तव्यः स न किंचन। अभियोक्ता
धनं कुर्यात्प्रथमं ज्ञातिभिः स्वकं। पश्चादात्मविशुद्ध्यर्थं क्रयं क्रेता स्वबंधुभिः। क्रेत्रा क्रये साधिते पि द्रव्यं नाष्टिक
एव लभते तथा च मनुः अथ मूलमनाहार्यं प्रकाशक्रयशोधितं। अदंड्यो मुच्यते राज्ञा नाष्टिको लभते धनं
अनाहार्यप्रदर्श्य प्रकाशशोधितं द्रव्यमित्यर्थः। कात्यायनः अनुपस्थापयन्मूलं क्रयं वाप्यविशोधयन्। यथा
भियोगं धनिने धनं दाप्यो दमं च सः। बृहस्पतिः वणिग्वीथीपरिगतं विज्ञातं राजपूरुषैः। अविज्ञाताश्रयात्क्री
तं विक्रेता यत्र चाप्सृतः। स्वामी दत्वार्द्धमूल्यं तु प्रगृह्णीत स्वकं धनं। अर्द्धं द्वयोरपहृतं तत्र स्याद्व्यवहारतः
मरीचिः अविज्ञातनिवेशात्वा यत्र मूलं न लभ्यते। हानिस्तत्र समा कल्प्या क्रेतुर्नाष्टिकयोर्द्वयोः। निवेशो विक्रेतृ
स्थलं। नारदः उद्दिष्टमेव नोक्तव्यस्तापस्य वसुधापि वा। अर्पितं तु यो भुक्ते भुक्तभोगं प्रदापयेत्। उद्दिष्टमनुज्ञाते
भुक्तभोगानुरूपं नाटकं। याज्ञवल्क्यः शौल्किकैः स्थानपालैर्वा नष्टापहृतमाहृतं अर्वाक्संवत्सरात्स्वामी
हरेत परतो नृपः। यत्तु मनुः प्रनष्टस्वामिकं द्रव्यं राजा त्र्यब्दं निधापयेत्। अर्वाक्त्र्यब्दाद्धरेत्स्वामी परतो नृपतिर्हरे

दिति। तच्छोत्रियस्वामिकद्रव्यविषयं स एव। आददीताथ षड्भागं प्रनष्टाधिगतान्नृपः। दशमं द्वादशं वापि सतां
धर्ममनुस्मरन्निति। तत्र प्रथमे वर्षे सर्वं दद्यात्। द्वितीयवर्षे द्वादशांशं गृहीत्वा दद्यात्। तृतीये दशमं चतुर्थे
षष्ठमिति। हरते परतोन्यद्यस्मेतत्स्वामिन्यनागते त्र्यब्दादूर्ध्वं व्यपाकरणमनुज्ञामात्रपरं। आगते तु स्वामि
निक्रयीकृतमपि देयमिति मिताक्षरायां। इदं च स्वामिनो ज्ञाने। यदा त्वमुकस्येदं द्रव्यं विस्मृत्यगतवधारणं
तदा त्रिवर्षादूर्ध्वमपि लभते। राज्ञोपि न त्र्यब्दादधिकारः। नागंतुकं चिद्रक्ष्यादेव। परस्वामिकनष्टलब्धपशू
नामेकदिनरक्षणे वृत्तिमाह याज्ञवल्क्यः। पणमेकशफे दद्याच्चतुरः पंचमानुषे। महिषोष्ट्रगवा द्वौ द्वौ पादं पा
दमजादिके। लब्धितं तु देयमेवामि वा निधिप्राप्तौ याज्ञवल्क्यः। राजा लब्ध्वा निधिं दद्याद्द्विजेभ्योर्द्धं द्विजः पुनः। वि
द्वानशेषमाददीत स सर्वस्य प्रभुर्यतः। इतरेणानिधौ लब्धे राजा षष्ठांशमाहरेत्। अनिवेदितविज्ञानो दाप्यस्तं दंड
मेव चेति। यदा तु कश्चित्क्रिमानादिस्वस्वकीयनिधिं भावयति तदाधिगंत्रे द्वादशभागं दत्वा स्वयं षष्ठं गृहीत्वा राम:
तस्मै दद्यात्। ममायमिति यो ब्रूयान्निधिं सत्येन मानवः। तस्याददीत षड्भागं राजा द्वादशमेव वा। इति। द्वादशांशस्त्वधिगं ॥५३५॥

वे। चौरहृतं प्रत्याहर्तव्यं एव। दातव्यं सर्ववर्णेभ्यो राज्ञा चौरैर्धनं हृतं। राजा तदुपयुंजानश्चौरस्याप्नोति किल्बि
षं। यदात्वाहरणे शक्तस्तदा स्वकोशाद् द्वैपायनः। प्रत्याहर्तुमशक्तस्तु धनं चौरैर्हृतं यदि। स्वकोशात्तद्धि देयं स्या
दशक्तेन महीक्षितेति। इत्यस्वामिविक्रयनिरूपणं। अथ संभूयसमुत्थानं। नारदः। वणिक्प्रभृतयो यत्र कर्म
संभूय कुर्वते। तत्संभूयसमुत्थानं व्यवहारपदं स्मृतं। बृहस्पतिः। बहूनां संमतो यस्तु दद्यादेको धनं नरः। क
रणं कारयेच्छापि स वैरेव कृतं भवेत्। परीक्षकाः साक्षिणस्तु त एवोक्ताः परस्परं। संदिग्धेषु विवंचनायान चेद्धि
द्वेषसंयुता। यः कश्चित्कारयेत्किंचित्तेषां विज्ञातकयविक्रये। शपथैः सोपि संशोध्यः स्यात्सर्ववादेष्वयं विधिः। या
ज्ञवल्क्यः। जिह्मं त्यजेयुर्निर्लाभमशक्तोन्येन कारयेत्। प्रतिषिद्धमनादिष्टं प्रमादाद्यच्च नाशितं। स तद्द्या
द्विषवाद्रक्षितां दशमांशमवाप्नुयात्। कात्यायनः। शिल्पका निजकुशलाभ्याचार्यश्चेति शिल्पिनः। एकद्वित्रिच
तुर्भागान्हरेयुस्ते यथोत्तरं। शिल्पिकाः शिष्याः अभिज्ञाज्ञानवंतः कुशलाः दक्षाः। आचार्यान्तत्तन्मार्ग
प्रवर्तकाः। बृहस्पतिः। हर्म्यं देवगृहं वापि धार्मिकोपस्कराणि च। संभूय कुर्वतां तेषां प्रमुखो द्व्यंशमर्हति स ए

द्य॰
॥७५

का नामेव धर्मः सद्भिरुदाहृतः॥ तान्जज्ञौ लभते धर्मं गायन स्तुमम शिनः कात्यायनः॥ तेषां चैव प्रसूतानां
ांसमवाप्नुयात्॥ तन्मोक्षणार्थं यद्दत्तं वहेयुस्तेयथाशतः॥ वणिजां कर्षकाणां च वैराणां शिल्पिनां तथा
म्नांशाकर्षणां सर्वेषामेव निर्णयः॥ इति मनूपमत्रुक्तं॥ अथ दत्ताप्रदानं॥ नारदः॥ दत्वा द्रव्यमसम्यग्य
दातुमिच्छति। दत्ताप्रदानिकं नाम व्यवहारपदं हि तत्॥ असम्यगिति क्रियाविशेषणं निषिद्धमित्यर्थ
॥ अथ देयमदेयं देवेतं चादत्तमेव च॥ व्यवहारसुविज्ञेयो दानमार्गश्चतुर्विधः॥ अन्वाहितं याचित
ःसाधारणं च यत्॥ निक्षेपं पुत्रदारं च सर्वस्वं चान्वये सति॥ अदेयान्याहुराचार्या यच्चान्यस्मै प्रति॰
॥ अपुत्रदारं तेषु स्वत्वान्नावान्तरद्विषयेनांतरज्ञेनदिनातिवन्निषिधातुवादमात्र॥ एतेनास्विकृतं बा
न देयदारसुता इतइतियाज्ञवल्कीय॥ पर्युदासोपिव्याख्यातः॥ पुत्रदारेषु स्वत्वलाभवः॥ इ वस्तु प
ःसत्ववादे॥ एतद्दानेन केवलं व्यवहारासिद्धिः किंतु प्रायश्चित्तमयीत्याहेतानिष्कृत्पदहा॥ योदद्य राम:
डात्मा प्रायश्चित्तीयते तनरः॥ मनुः॥ अदेयं यश्च गृह्णाति यश्चादेयं प्रयच्छति॥ तावुभौ चौरवच्छास्यौ दद्यो ॥५३६॥

चोत्तमसाहसमिति देयमाह बृहस्पतिः॥ ॐ टुंबभक्तवसनाद्देयं यदतिरिच्यते॥ अवरूपदेहामाह कात्या
यनः॥ स्वेच्छया यः प्रतिश्रुत्य ब्राह्मणाय प्रतिग्रहं॥ न दद्याद्दणवद्दाप्यः प्राप्नुयात्पूर्वसाहसं॥ गौतमः॥ प्रतिश्रु
त्याप्यधर्मसंयुक्ताय न दद्यादिह त्रेदानविक्रयोप्रतिषेधतिव्यासः॥ येजाताये प्यजाताश्च येचगर्भे व्यवस्थित
॥ वृत्तिं च ते निकांक्षंति न दानेन न च विक्रय इति॥ दत्तादत्तमेदानाहाह दत्तं सप्तविधं प्रोक्तमदत्तं षोडशात्मकं॥ प॥
ण्यमूल्ये भृतिस्तुष्ट्या स्नेहात्प्रत्युपकारतः॥ स्त्रीशुल्कानुग्रहार्थं च दत्तं दानविदो विदुः॥ अनुग्रहे धर्मः॥ अदत्तं
तु भयक्रोधशोकवेगरुगन्वितैः॥ तथोत्कोचपरिहासः व्यत्यासच्छलयोगतः॥ बालमूढास्वतंत्रार्त्तमत्तोन्म
त्तापवर्जितं। कर्त्ता ममायं कर्मेति लाभेच्छया च यत्॥ अपात्रे पात्रमित्युक्ते कार्ये वा धर्मसंज्ञिते॥ यद्दत्तं स्यादवि
ज्ञानाददत्तमिति तत्स्मृतं॥ लग पत्नापः॥ नयादि कृतोपतापान्वितैरित्यर्थेन्वयः॥ ताडनादिभयाद्धयपतमेन दत्त
मित्यर्थः॥ एवं क्रोधादिके ध्ययोजनीयमितिविद्यादत्तं॥ व्यत्यासो रूप्यं दातुं प्रवृत्तेन ताम्रमात्सुवर्णादत्ता छलयोग
तः देवदत्ताय ज्ञात्वा गृहीतं देवदत्तवेषायान्यस्मै नन्ददत्ताय वा पदत्तं॥ आर्तो रोगेणास्थिरचित्तः म

व्य.म.
॥७६॥ त्तो मद्दत्तो यश्च युद्धे गउन्मत्तो वा दिता र्दिना॥ अपवर्जितं तं मामकमा॥ बीजमपत्यं तु वणावद्वेत्यर्थः॥ नारदः॥ स्वंदा
समिच्छेद्यः कर्त्तुमदासं प्रीतमानसः स्कंधादादाय तस्यापि भिंद्यात्कुंभं सहांभसा साक्षताभिः सपुष्पाभिर्मू
र्धन्यद्भिरवाकिरन् अदास इति चोक्त्वा त्रिः प्राङ्मुखं तमथोत्सृजेत्॥ ततः प्रभृति वक्तव्यः स्वाम्यनु
ग्रहपालितः॥ भोज्यान्नोप्यथ प्रतिग्राह्यो भवत्यभिमतः सतां॥ कात्यायनः॥ दासेनोढा त्वदासी या सापि दासी
त्वमाप्नुयात्॥ यस्माद्भर्त्ता प्रभुस्तस्याः स्वाम्यधीनः प्रभुर्यतः॥ दासस्य तु धनं यत्स्यात्स्वामी तस्य प्रभुर्मतः॥
इति॥ इत्यभ्युपेत्याशुश्रूषा॥ अथ वेतनादानं॥ नारदः॥ भृतानां वेतनस्योक्तो दानादानविधिक्रमः॥ वेतनस्या
नपाकर्म तद्विवादपदं स्मृतं॥ याज्ञवल्क्यः॥ दाप्यस्तु दशमं भागं वाणिज्यपशुसस्यतः॥ अनिश्चित्य भृतिं य
स्तु कारयेत्स महीक्षिता॥ एतदप्यपास्य परं आयासकृते बृहस्पतिः॥ त्रिभागं पंचभागं वा गृह्णीयात्सीर
वाहकः॥ भक्ताच्छादभृतः सीराद्भागं गृह्णीत पंचमं जातं सस्यात्त्रिभागं तु प्रगृह्णीयादथाभृतः॥ भृतोन्नवस्त्र राम:
दानेन योषितः॥ नारदः॥ कर्माकुर्वन्प्रतिश्रुत्य कार्यो दत्वा भृतिं बलात्॥ भृतिं गृहीत्वा कुर्वाणो द्विगुणां भृति ॥५३॥

माप्नुयात्॥ मनुः॥ भृतो नार्तो न यः कुर्याद्दर्पात्कर्म यथोदितं॥ स दंड्यः कृष्णलान्यष्टौ न देयं चास्य वेतनं॥ स एव
यथोक्तमार्तः स्वस्थो वा यस्तत्कर्म न कारयेत्॥ न तस्य वेतनं देयमल्पोनस्यापि कर्मणः॥ आर्तस्तु कुर्यात्स्वस्थ
सन्यथाभाषितमादितः॥ स दीर्घस्यापि कालस्य तल्लभेतैव वेतनं॥ विष्णुः॥ भृतकश्चापूर्णे काले त्य
जन्सकलमेव मूल्यं जह्यात्॥ दंडं च पणशतं दद्यादिति॥ स एव॥ स्वामी त्वामावेद्य भृतकमपूर्णे काले जह्यात्त
स्य सर्वमेव मूल्यं च राज्ञेऽन्यत्र भृतकदोषात्॥ बृहन्मनुः॥ प्रमादान्नाशितं दाप्यः समं द्विर्वाहनाशितं॥ नष्टं
दाप्यो हृतं चौरैर्दग्धमूढं जलेन वा॥ द्रोहादेषः उदमयहृतं॥ याज्ञवल्क्यः॥ प्रस्थानविघ्नकृच्चैव प्रदाप्यो द्वि
गुणां भृतिं॥ प्रक्रांते सप्तमं भागं चतुर्थं पथि संत्यजन्॥ बृहन्मनुः॥ पथि विक्रीय तद्भांडं वाणिग्भृत्ये यदि
मृत्युतस्यापि देयं स्याद्गतेरर्द्धं लभेत सः॥ कात्यायनः॥ यथा च पथि तद्भांडमाक्षिप्येत ह्रियेत वा॥ यावान्
ध्वागतस्तेन प्राक्कयात्तावतीं भृतिं॥ त्यजेत्पथि सहायं यः श्रांतं रोगार्तमेव वा॥ प्राप्नुयात्साहसं पूर्वं ग्रामे त्र्यह
मपालयन्॥ आसिध्येत राजाज्ञया आवरुध्येत॥ बृहस्पतिः॥ प्रभुणा विनियुक्तः सन्भृतको विदधा

व्य.म.
७७॥

वियः॥ तदर्थमस्तुनं कर्मस्वामी तत्र पराध्रुयात्॥ कृते कर्मणि यः स्वामी न दद्याद्वेतनं भृते राज्ञा दाप्यः स भृत्य
स्याद्वेतनं चानुरूपतः इति नारदः॥ अनयन्भाटयित्वा तु भांडं वा यानवाहने॥ दाप्यो भृतिचतुर्भागं सर्वाम
र्धपथे त्यजन्॥ यानं स्थापि वाहनं साज्ञा स्थापि॥ कात्यायनः॥ हस्त्यश्वगोखरोष्ट्रादीन् गृहीत्वा भाटकेन यः नार्पये
त्कृतकृत्यः सन् तावद्दाप्यः स भाटकं॥ नारदः॥ परभूमौ गृहं कृत्वा स्तोमं दत्वा वसेत्तु यः स तद्गृहीत्वा निर्गच्छेत्तृण
काष्ठेष्टकादिकं॥ स्तोमाद्विनो वसित्वा तु परभूमावनिश्चितः॥ यान्येवस्तृणकाष्ठानि त्विष्टिका विनिवेशिता॥ वि
निर्गच्छंस्तत्सर्वं स्वामिने विनिवेदयेत्॥ स्तोमं भाटकं॥ अथ संविद्व्यतिक्रमः॥ नारदः॥ पाषंडनैगमादीनां स्थि
तिस्समय उच्यते॥ समयस्यानपाकर्म तद्विवादपदं स्मृतं॥ पाषंडवेदमार्गविरोधिनो वाणिज्यादिकरा नैगमा
स्तदविरोधिनः॥ आदिपदेन त्रैविद्या गृह्यते॥ न वराजकृत्समाह बृहस्पतिः॥ वेदविद्याविदो विप्राः श्रोत्रिया नाग्नि
होत्रिणः॥ आहृत्य स्थापयेत्तत्र तेषां वृत्तिं प्रकल्पयेत्॥ अनाच्छेद्यकरास्तेभ्यः प्रदद्याद्गृहभूमयः॥ मुक्तभो राम:
ग्याश्च नृपतिर्लेखयित्वा स्वशासने॥ अनाच्छेद्योऽप्यहार्यकरो यास्ताश्चनाच्छेद्यकराः॥ मुक्तभाव्या आमुक्तभु ॥५३॥

क्तद्विनाद्यं भूम्यादिफलं यासां ता इत्यर्थः॥ तेषां च श्रोत्रियादीनां धर्ममाह याज्ञवल्क्यः॥ निजधर्माविरोधेन यस्तु
सामयिको भवेत्॥ सोऽपि यत्नेन संरक्ष्यो धर्मो राजकृतश्च यः॥ नारदः॥ पाषंडनैगमश्रेणिपूगव्रातगणादिषु
संरक्षेत्समयं राजा दुर्गे जनपदे तथा॥ नानाजातीया नामेकजातीयं कर्म कुर्वतां संघातः श्रेणयः॥ तेषामे
व भिन्नजातीयाकया कर्म कुर्वतां संघाताः पूगाः॥ व्राताः॥ ज्ञातिसंबंधिबंधूनां संघाताः॥ एत एव कुलानीत्य
प्युच्यन्ते॥ पाषंडिनो नैगमाश्च व्याख्याताः॥ एतेषां च आदिनां व्रतासंघा गणाः॥ एतेषां समये भेदे दंडमाह याज्ञव
ल्क्यः॥ गणद्रव्यं हरेद्यस्तु संविदं लंघयेच्च यः॥ सर्वस्वहरणं कृत्वा तं राष्ट्राद्विप्रवासयेत् इति॥ इति संविद्व्यतिक्र
मः॥ अथ क्रीतानुशयः॥ नारदः॥ क्रीत्वा मूल्येन यः पण्यं केता न बहुमन्यते॥ क्रीतानुशय इत्येतद्विवा
दपदमुच्यते॥ पण्यपरीक्षावधिमाह स एव॥ अहो दोह्यं परीक्षेत पंचाहाद्वाह्यमेव तु॥ मुक्तावज्रप्रवाला
नां सप्ताहं स्यात्परीक्षणं॥ द्विपदामर्धमासं तु पुंसां तद्द्विगुणं स्त्रियाः॥ दशाहं सर्वबीजानामेकाहं लोहवास
सां॥ कात्यायनः॥ भूमेर्दशाहं तु न्यायः केतुर्विक्रेतुरेव वा॥ बृहस्पतिः॥ अतो वोक्रयणं दोषवत्पदिसंजायते क

चेत् विक्रेतुः प्रतिदेये तत् क्रेता मूल्यमवाप्नुयात्। कात्यायनः। अविज्ञातं तु यत्क्रीतं दुष्टं पश्चाद्विभावितं। क्रीतं तत्
 स्वामिने देयं पण्यं कालेऽन्यथा न तु। नारदः। क्रीत्वा मूल्येन यः पण्यं दुःक्रीतं मन्यते क्रयी। विक्रेतुः प्रतिदेयं तत्
तस्मिन्नेवाह्न्यविक्षितं। द्वितीयेऽह्नि ददत् क्रेता मूल्यात् त्रिंशांशमावहेत्। द्विगुणं तत् तृतीयेऽह्नि परतः क्रेतु
रेव तत्। नारदः। परिभुक्तं तु यद्वासः क्लिष्टरूपं मलीमसं। सदोषमपि तत्क्रीतं विक्रेतुर्न भवेत्पुनः॥ इति क्री
तानुशयः। अथ विक्रयासंप्रदानं। नारदः। विक्रीय पण्यं मूल्येन क्रेतुर्यन्न प्रदीयते। विक्रीयासंप्रदानं तत् वि
वादपदमुच्यते। याज्ञवल्क्यः। गृहीतमूल्यं यः पण्यं क्रेतुर्नैव प्रयच्छति। सोदयं तस्य दाप्योऽसौ दिग्लाभं वा दि
गागते। दिग्देशान्तरं। तद्धानो देशान्तरीयपण्यलाभः स एव। राजदैवोपघातेन पण्ये दोषमुपागते। हानिर्वि
क्रेतुरेवासौ पातितस्याप्रयच्छतः॥ स एव। हानिश्चेत्क्रेतृदोषेण क्रेतुरेव हि सा भवेत्। नारदः। दीयमानं न गृ
ह्णाति क्रीत्वा पण्यं च यः क्रयी। विक्रीणानस्तदन्यत्र विक्रेता नापराध्नुयात्। याज्ञवल्क्यः। मत्तोन्मत्तेन विक्री
तं हीनमूल्येन येन वा। अस्वतन्त्रेण मूढेन त्याज्यं तस्य पुनर्भवेत्। अपंचमवेपि विधिर्मूल्यदत्ते तु न्यमेवदे रामः
॥५३॥

येनान्यस्येति विक्रेतास्तानमये कृति बोध्यः। दत्तमूल्यपण्यपण्यस्य विधिरेष प्रकीर्तितः। अदत्तेऽन्यत्र समयान्न
विक्रेतुरतिक्रमः इति नारदोक्तेः। सदोषपण्यविक्रये याज्ञवल्क्यः। याज्ञास्य दोषं यः पण्यं विक्रीणीतावि
ज्ञाणः। तदेव द्विगुणं दाप्यस्तत्समं विनयं तथा॥ इति विनयं तपा॥ इति विक्रीयासंप्रदानं। अथ स्वामिपा
लविवादः॥ पालदोषेण पश्वादिनाशे याज्ञवल्क्यः। पालदोषेण पश्वादिपाले दंडो विधीयते। अर्द्धत्रयोद
शपणा। स्वामिने द्रव्यमेव च। द्रव्यं गवादि। पश्वादिमरणं निश्चापकमाह मनुः। कर्णौ चर्म च वालांश्च ब
स्तिं स्नायुं च रोचनां। पशुस्वामिषु दद्यात्तु मृतेष्वंकानि दर्शनं। अंकः शृंगादीति मदनः॥ गवादिप्रचारार्थं भूमि
भागमाह याज्ञवल्क्यः। धनुःशतं परिणाहो ग्रामक्षेत्रान्तरं भवेत्। द्वे शते खर्वटस्य स्यान्नगरस्य चतुःशतं
परिणाहो गवादिप्रचारार्थो भूः। अयमेव परीहारः। धनुःशतं परीहारो ग्रामस्य स्यात्समंततः इति मनूक्तेः
॥ अनेककाष्ठकर्षाबलयुक्तो ग्रामः खर्वटः। बहुकंटकसंतानः इति केचित्। परसस्यादिभक्षणे स्वामि
नो दंडमाह याज्ञवल्क्यः। माषानष्टौ तु महिषी सस्यघातस्य कारिणी। दंडनीया तदर्द्धं तु गौस्तदर्धमजाविकं

प्रव्रजितो पनिष्टानां यथोक्तो द्विगुणो दमः॥ सममेषां विवीते परिवृते ह्रुमहिषी समं॥ यावत्सस्यं विनश्येत्तु तावत्सा
त्क्षेत्रिणः फलं॥ गोपस्ताड्यस्तु यं कर्म करिष्यतीति कर्मेंकुर्वाणाय दत्तं॥ स्वधर्मविनियोक्तो धर्मं करिष्यतीति
बुध्या दत्तं॥ एतान्लिय रावर्त्तते कात्यायनः॥ कामक्रोधास्वतंत्रार्त्तक्लीबोन्मत्तप्रमोहितः चश्रस्पर्षा॥ यस्तु तो ब
लात् दंडं चैकादशगुणमाक्रुणोगी यमानवाः॥ उत्कोचस्य रूपमाह स एव॥ स्तेहस्याहसिको हृतवारहारि
कशंसनात्॥ दर्शनान्नष्टहन स्य तया सत्स प्रवर्तनात्॥ प्राप्नमेतैस्तु यत्किंचिदुत्कोचाख्यं तदुच्यते मनुः॥ योध
ःगाधसमविक्रो यैनैगन्तान प्रतिग्रहं॥ यस्य चाप्युपधिपरो तत्सर्वं विनिवर्त्तयेत॥ योगश्च पाधिः॥ यस्य वा
प्यन्यस्य वापि कार्यस्यात तत्सर्वमुपधपगमे परावर्त्तत इत्यर्थः॥ कात्यायनः॥ स्वच्छेनार्त्तेन वा दत्तं श्राविते
धर्मकारणात्॥ अदत्वा तु मृते दाप्यस्तत्सुतो नात्र संशयः॥ अत्र विस्तरो गुरुकृते द्वैतनिर्णये द्रष्टव्यः॥ इ
ति दत्ताप्रदानिकनिर्णये॥ अथाभ्युपेत्याशुश्रूषा॥ नारदः॥ अभ्युपेत्य तु शुश्रूषां यस्तां न प्रतिपद्यते॥ अभ्यु राम:
श्रूषाभ्युपेत्येतद्विवादपदमुच्यते॥ तत्र शुश्रूषकत्रैविध्यमाह बृहस्पतिः॥ अध्युधीरस्तु मा प्रोक्तो मध्यम ॥५४८

स्तु कृषीवलः॥ आरवाहो धमः प्रोक्तो स्तथा च गृहकर्मकृत॥ नारदः॥ सर्वेष्वधिकृतो यः स्यात्कुटुंबस्य तथो
परिसो धिकर्मकृतो ज्ञेयः सच कौटुंबिकस्मृतः॥ कात्यायनः॥ स्वतंत्रस्यात्मनो दाना दासत्वं दारवद्गुरुः॥ त्रि
ष्वेषु वर्षेषु विज्ञेयं दास्यं विप्रस्य न क्वचित॥ वर्णानामानुलोम्येन दास्यं न प्रतिलोमतः॥ राजन्यवैश्यशूद्राणां
त्यजतां हि स्वतंत्रतां॥ नारदः॥ वर्णानां प्रतिलोम्येन दासत्वं न विधीयते॥ कात्यायनः॥ प्रव्रज्यावसिता यत्र
त्रयो वर्णा द्विजातयः॥ निर्वासं कारयेद्विप्रं दासत्वं क्षत्रियंनृपः॥ क्षत्रियहरणं विट्शूद्रयो रूपलक्षणं॥ वि
प्रनिवासनप्रकारमाह तु देवनारदो परिव्रज्यां गृहीत्वा तु यः स्वधर्मे न तिष्ठति॥ श्वपदेनांकयित्वा तु राज
शोघ्र प्रवासयोत्स ये तं॥ कात्यायनः॥ सवर्णेपि तु विप्रं तु दासत्वं नैव कारयेत॥ शीलाध्ययनसंपन्ने तदनुक
र्मकारं मतः॥ तत्रापि नाशुभं किंचित्करवीत द्विजोत्तम॥ मनुः॥ क्षत्रियं चैव वैश्यं च ब्राह्मणो वृत्तिकर्षितौ
बिभृयादानृशंस्येन स्वानि कर्मणि कारयेत॥ स्वामिकर्म उत्तमं तद्योगेसितस्यर्थः॥ कात्यायनः॥ आददीत ब्राह्म
णीयस्तु विक्रीणीयात्पैव च॥ राजा तदकृतं कार्यं दंड्याः स्युः सर्व एव ते॥ कामात्तु संश्रिता यस्तु कुर्यादासी कुल

स्त्रियां क्रमेयेन्नवाप्नुयाद्दंडमयत्नाच्चाहृतं न वेत्॥ बालधात्रीं च दासीं च विद्यनुनक्रियः॥ परिचारयतीं च प्राप्नुयात्स
र्वसाहसं विदुः॥ यस्तु तु मम वर्णं दास्ये नियोजयति तस्योत्तमसाहसो दंडः॥ कात्यायनः॥ विक्रीणामानां योन्य
कादासं विक्रेतुमिच्छति। अनापदिस्थः सक्तः सन्नप्राप्नुयात्पूर्वसाहसं॥ दासत्वे नारदः॥ गृहजातस्त
था क्रीतो लब्धो दायादुपागतः॥ अनाकालभृतस्तद्वदाहितः स्वामिना च यः॥ मोक्षितो महतश्चर्णाद्युद्धप्रा
प्तः पणजितः॥ तवाहमित्युपगतः प्रव्रज्यावसितः कृतः॥ भक्तदासश्च विज्ञेयस्तथैव वडवाहृतः॥ विक्रेता
चात्मनः शास्त्रे दासाः पंचदश स्मृताः॥ तत्र पूर्वश्चतुर्वर्गो दासत्वान्न निवर्त्तते॥ प्रसादात्स्वामिनोऽन्यत्र दास्यमे
षां क्रमागतं॥ विक्रीणीते स्वतंत्रः सन्य आत्मानं नराधमः॥ स जघन्यतमस्तेषां सोपि दास्यान्न मुच्यते॥ यो वे
षां स्वामिनं कश्चिन्मोचयेत्प्राणसंशयात्॥ दासत्वात्स मुच्येत पुत्रभागं लभेत च॥ याज्ञवल्क्यः॥ प्रव्रज्यावसि
तो राज्ञो दास आमरणांतिकं॥ नारदः॥ अनाकालभृतो दास्यान्मुच्यते गोयुगं ददत्॥ आहितोपि धनं दत्वा रामः
स्वामी यद्येनमुद्धरेत्॥ ऋणं तु सोदयं दत्वा ऋणी दास्यान्प्रमुच्यते॥ तवाहमित्युपगतो युद्धप्राप्तः पणे जितः॥ ॥५४२

प्रतिशीर्षप्रदानेन मुच्येरन्स्तुल्यकर्मणा॥ कृतकालव्यपगमात्॥ कृतो दासो विमुच्यते॥ भक्तस्योपेक्षणात्स
द्यो भक्तदासः प्रमुच्यते॥ निग्रहाद्वडवायास्तु मुच्यते वडवाहृतः इति॥ प्रतिशीर्षः प्रतिनिधिः॥ वडवा दासी॥ प्रतिनि
धिः॥ याज्ञवल्क्यः॥ बलाद्दासीकृतश्चौरैर्विक्रीतश्चापि मुच्यते॥ नारदः॥ तवाहमिति चात्मानं यो स्वतंत्रः प्रयच्छति॥
न स तं प्राप्नुयात्कामं पूर्वस्वामी लभेत तं॥ अस्वतंत्र परदासः॥ अस्मिन्प्रकरणे दासपदं गतमुत्त्वस्यापि विवक्षि
तत्वाद्दास्यामप्येष एव विधिर्ज्ञेयः॥ तत्र दासीत्वविमोककारणमाह कात्यायनः॥ स्वां दासीं यस्तु संगच्छेत्प्रस
ज्ञा च न वेत्ततः॥ अवेत्त्यबीजं कार्या स्याद्दासी सान्वया तु सा॥ मातु पूर्वोक्तं दंडमर्हति॥ विवादे तं त्वृणकादि
संचयस्तुलं॥ एतदपवादस्तु उशना॥ अदंड्याश्चोत्सवे गावः श्राद्धकाले तथैव च॥ व्यासः॥ अश्वकंपं च द्विजैरुक्तं
परीक्षणे श्ववो धवे॥ गो निग्रहे च राजाई लववाजपेयाद्विशिष्यते॥ उशना॥ गोभिर्विनाशितं धान्यं यो नरः प्रतिपा
चते॥ पितरस्तस्य नाश्नंति पद्दिस्तु त्रिदिवौकसः॥ इति स्वामिपालविवादः॥ अथ सीमाविवादः॥ सीमाज्ञानोप
पायमाह बृहस्पतिः॥ करीषास्थितुषांगारशर्करा नमकपालिकाः॥ सिकतेष्टकगोबालकार्पासास्थीपि भस्म

प्रक्षिप्य कुंभेष्वेतानि सीमांतेषु निधापयेत्। अन्यसाक्षिणां विशेषमाह याज्ञवल्क्यः। सामंता वा समग्रामाश्चत्वा
रोऽष्टौ दशापि वा। रक्तस्रग्वसनाः सीमां नयेयुः क्षितिधारिणः॥ नारदः। नैकः समुन्नयेत्सीमां नरः प्रत्ययवानपि
गुरुत्वादस्य कार्यस्य क्रियैषा बहुषु स्थिता॥ बृहस्पतिः। ज्ञातचिह्नैर्विना साक्षी रक्तोऽप्यनघसंमतः। रक्तमा
ल्यांबरधरो मृदमादाय मूर्द्धनि। सत्यव्रतः सोपवासः सीमानं दर्शयेन्नरः॥ कात्यायनः। सीमाचंक्रमणे कोशे
पादस्पर्शे तथैव च। त्रिपक्षपंचसप्ताहैर्दैवराजिकमिष्यते॥ मनुः। यथोक्तेन नयंतस्ते पूयंते सत्यसाक्षि
णः। विपरीतं नयंतस्ते दाप्याः स्युर्द्विशतं दमं॥ नारदः। अथ चेदनृतं ब्रूयुः सामंताः सीमनिर्णये। सर्वे पृथक्पृथग्दंड्या रा
ज्ञा मध्यमसाहसं॥ कात्यायनः। बहूनां तु गृहीतानां न सर्वे निर्णयं यदि। कुर्युर्भयाद्वा लोभाद्वा दाप्यास्तूत्त
मसाहसं॥ याज्ञवल्क्यः। अभावे ज्ञातृचिह्नानां राजा सीम्नः प्रवर्तिता॥ मनुः। सीमायामविषह्यायां स्वयं रा
जैव धर्मवित्। प्रदिशेद्भूमिमेकेषामुपकारादिति स्थितिः॥ स एव। निवेशकालादारभ्य गृहवारायणा
दिकं। येन यावदुपभुक्तं तस्य तन्न विचालयेत्॥ कात्यायनोपि। मेखलाभ्रमनिःकासगवाक्षान्नोपरोध

रामः
॥५५२॥

येत्। प्रणालीं गृहवास्तु च पीडयन्दंडमाप्नुयात्॥ मेखला भित्तिमूलबंधः। भ्रमो जलनिर्गमः। निष्कासो
हर्म्यादिविनिर्गतकाष्ठादिनिर्मितमस्तकभूमिकमुपवेशनस्थलमिति मदनः। धूमनिष्कास इति क्वचित्पाठः।
धूमनिर्गमार्थं गवाक्षादीति तदर्थः। आदिपदेन परभित्त्यादि। स एव। निवेशसमयादूर्ध्वं नैते योज्याः कदाच
न। दृष्टिपातं प्रणालीं च न कुर्यात्परवेश्मसु॥ बृहस्पतिः। वर्चःस्थानं वह्निचयं गर्तां छिद्रं बुसेचनं। अत्पारात्परकु
ड्यस्य न कर्तव्यं कथंचन॥ वर्चःस्थानं शौचस्थानं। अत्पारादिति समीपे। कात्यायनः। विण्मूत्रोदकसेकं च वह्निघट्टनि
वेशनं। अर्गलिद्वयमुक्त्वान्यपरकुड्यान्निवेशयेत्॥ बृहस्पतिः। यांत्यायांति जना यत्र पशवश्चानिवारिताः। तदुच्य
ते संसरणं न रोद्धव्यं तु केनचित्॥ नारदः। अवस्करस्थलश्वभ्रस्यंदनिकादिभिः। चतुष्पथसुरस्थानराजमार्गान्न रो
धयेत्॥ कात्यायनः। सर्वे जनाः स्युर्दायेन प्रयांति सा चतुष्पथा। अनिषिद्धा यया कामं राजमार्गः स उच्यते॥ बृहस्पति
ः। मत्तवसंकरं धान्यं वा रोपणमेव च। कामात्पुरीषं कुर्याच्चेत्तस्य दंडस्तु माषकः॥ मनुः। समुत्सृजेद्राजमार्गे
यस्त्वमेध्यमनापदि। स द्वौ कार्षापणौ दद्यादमेध्यं चाशु शोधयेत्॥ कात्यायनः। तडागोद्यानतीर्थानि योऽमेध्येन विना

व्य.म.
॥८१॥

शायेत॥ अमेध्यंशोधयित्वातुदंडयेत्सर्वमाहसं॥ याज्ञवल्क्यः॥ मर्यादायाः प्रभेदे तु सीमातिक्रमणे तथा॥ क्षेत्रस्य
हरणे दंडा ह्यधमोत्तममध्यमाः॥ गृहं वटं गमारामं क्षेत्रं वा भीषया हरन्॥ शतानि पंचदंड्यः स्यादज्ञानाद्द्विश
तादमः॥ कात्यायनः॥ सीमामध्ये तु जातानां वृक्षाणां पत्रान्यसंस्थिता॥ स्वामिनं तं विजानीयाद्यस्य क्षेत्रेषु संस्थि
ता॥ याज्ञवल्क्यः॥ स्वामिने यो निवेद्यैव क्षेत्रे सेतुं प्रवर्तयेत्॥ उत्पन्ने स्वामिनो भोगस्तदभावे महीपतेः॥ स एव
न निषेध्योऽल्पबाधस्तु सेतुः कल्याणकारकः॥ परभूमिं हरेत्कूपः स्वल्पक्षेत्रो बहूदकः॥ नैनं षेध्यः इत्यनुषंग
॥ नारदोपि॥ परक्षेत्रस्य मध्ये तु न प्रतिषिध्यते॥ महागुणोल्पदोषश्चेद्वृद्धिरिष्टा क्षये सति॥ नारदः॥ पूर्वप्रवृत्तमु
त्सन्नमपृष्ट्वा स्वामिनं तु यः॥ सेतुं प्रवर्तयेद्यस्तु न स तत्फलभाग्भवेत्॥ व्यासः॥ क्षेत्रं गृहीत्वा यः कश्चिन्न च
कारयेत् स्वामिने सशदं दाप्यो राज्ञे दंडं च तत्समं॥ शदं क्षेत्रोत्पत्तिफलं॥ इति सीमाविवादः॥ अथ वाक्पारु
ष्यं॥ बृहस्पतिः॥ देशजातिकुलादीनां क्षेपापायेनियोजनं॥ द्रव्यं विना तु प्रथमं वाक्पारुष्यं तदुच्यते॥ भगिनी
मातृसंबंधउपपातकसंशनं॥ पारुष्यंमध्यमं प्रोक्तं वाचिकं शास्त्रवेदिभिः॥ अभक्ष्यापेयकथनं महापातकदूष राम:
॥५४३॥

णं॥ पारुष्यमुत्तमं प्रोक्तं तीव्रमर्मभिघट्टनमिति॥ द्रव्यं विना द्रव्यवैशिष्ट्यं विना केवलो वाक्कृतमेवेतदर्थः॥ अभि
घट्टनमुद्घाटनं॥ विष्णुः॥ समवर्णाक्रोशने द्वादशपणान् दंड्यः॥ स्मृत्यंतरे॥ पारुष्यदोषावृतयो युगपत्संप्रवृत्तयो
॥ विशेषश्चेन्न दृश्येत विनयः स्यात्समस्तयोः॥ नारदः॥ पूर्वमाक्षारयेद्यस्तु नियतं स्यात्स दोषभाक्॥ पश्चाद्य
ः सोप्यसत्कारी पूर्वं तु विनयो गुरुः॥ मनुः॥ शतं ब्राह्मणमाक्रुश्य क्षत्रियो दंडमर्हति॥ वैश्योप्यर्धशतं द्वे वा शूद्र
स्तु वधमर्हति॥ बृहस्पतिः॥ विप्रे शतार्धं दंडस्तु क्षत्रियस्याभिशंसने॥ विशस्यादर्धपंचाशच्छूद्रस्यार्धत्रयोद
श॥ शूद्रविषये स एव॥ धर्मोपदेशकर्तारं चेद्वेदोदाहरणान्वितं॥ आक्रोशकस्तु विप्राणां जिह्वाछेदेन दंड्यते॥ मात
रं पितरं जायां भ्रातरं श्वसुरं गुरुं॥ आक्षारयन् शतं दाप्यः पंथानं चाददद्गुरोः॥ भ्राताज्येष्ठः॥ पित्रादिसाहचर्या
त्॥ माता तु मातुलान्यपराधत्वेजाया याप्यनिरापराधत्वे दंड इति मिताक्षरादिषु॥ याज्ञवल्क्यः॥ बाहुग्रीवानेत्रसक्थि
विनाशे वाचिके दमः॥ शत्यस्तदर्धिकः पादनासाकर्णकरादिषु॥ अशक्तस्तु वदन्नेवं दंडनीयः पणान् दश॥ तथा॥ श
क्तः प्रतिभुवं दाप्यो गते मायतस्य तु॥ स एव॥ अभिगंतास्मि भगिनीं मातरं वा तवेति च॥ शपंतं दापयेद्राजा पं

चविंशतिकं दमं ॥ त्रैविद्यनृपदेवानां दंडउत्तमसाहसः ॥ नारदः ॥ पतितं पतितेत्युक्त्वा चोरं चोरेति वा पुनः ॥ वचना
त्तुल्यदोषः स्यान्मिथ्या द्विर्दोषतां व्रजेत् ॥ याज्ञवल्क्यः ॥ सत्यासत्यान्यथास्तोत्रैर्न्यूनांगेंद्रियरोगिणां ॥ क्षेपं करोति
चेद्दंड्यः पणानर्धत्रयोदश ॥ उशना ॥ मोहात्प्रमादात्संघर्षात्प्रीत्या वोक्तं मयेति यः ॥ नाहमेवं पुनर्वक्ष्ये दंडार्धं त
स्य कल्पयेत् ॥ इति वाक्पारुष्यं ॥ अथ दंडपारुष्यं ॥ नारदः ॥ परगात्रेष्वभिद्रोहो हस्तपादायुधादिभिः ॥ भस्मादिभि
श्चोपघातो दंडपारुष्यमुच्यते ॥ बृहस्पतिः ॥ आकृष्टस्तु समाक्रोशंस्ताडितः प्रतिताडयेत् ॥ हत्वापराधिनं चैव ॥
नापराधी भवेन्नर इति ॥ कात्यायनः ॥ कर्णोष्ठघ्राणपादाक्षिजिह्वाशिश्नकरस्य च ॥ छेदने चोत्तमो दंडो भेदने मध्यमो भृगु
॥ याज्ञवल्क्यः ॥ भस्मपंकरजःस्पर्शे दंडो दशपणः स्मृतः ॥ अमेध्यपार्ष्णिनिष्ठ्यूतस्पर्शने द्विगुणः स्मृतः ॥ समेष्वेवं पर
स्त्रीषु द्विगुणस्तूत्तमेषु च ॥ हीनेष्वर्धदमो मोहमदादिभिरदंडनं ॥ पार्ष्णिपादपश्चात्भागः ॥ कात्यायनः ॥
छर्दिमूत्रपुरीषाद्यैरापाद्यः स चतुर्गुणः ॥ षड्गुणः कायमध्ये स्यान्मूर्ध्नि त्वष्टगुणः स्मृतः ॥ याज्ञवल्क्यः ॥ उद्गूर्णे हस्त
पादे तु दश विंशतिकौ दमौ ॥ परस्परं तु सर्वेषां शास्त्रे मध्यमसाहसः ॥ स एव पादकेशांशुककरोलुंचनेषु प

राणान्दश पीडाकर्षांशुकावेष्टनपादाध्यासे शतं दमः ॥ शोणितेन समं डुःखं कुर्वन्काष्ठादिभिर्नरः ॥ द्वात्रिंशतं पणा
न्दद्यो द्विगुणो दर्शने सृजः ॥ पीडेत्यादि ॥ अंशुकेनावेष्ट्य दृढमाकृष्य पादेनाध्यासे शतमित्यर्थः ॥ स एव कर
पाददतो भंगे छेदने कर्णनासयोः ॥ मध्योदंडो व्रणोद्भेदे मृतकल्पहते तथा ॥ विप्रपीडाकरं छेदं यमुंगमत्रालयण
स्याततु ॥ उद्गूर्णे प्रथमो दंडः संशये तु न दंडिकः ॥ मनुः ॥ येन केनचिदंगेन हिंस्याच्छ्रेयांसमंत्यजः ॥ छेत्तव्यं तत्तदेवास्य
तन्मनोरनुशासनं ॥ पाणिमुद्यम्य दंडं वा पाणिच्छेदनमर्हति ॥ कात्यायनः ॥ वाक्पारुष्ये यथैवोक्ताः प्रातिलो
म्यानुलोमतः ॥ तथैव दंडपारुष्ये पात्या दंडा यथाक्रमं ॥ विष्णुः ॥ एकं बहूनां निघ्नतां प्रत्येकं शास्त्रोक्तो दंडो द्विगु
णः ॥ कात्यायनः ॥ देहेंद्रियविनाशे तु यथा दंडं प्रकल्पयेत् ॥ तथा तुष्टिकरं देयं समुत्थानं च पंडितैः ॥ तुष्टिस्ता
डिततोषकरं समुत्थानमौषधादिमूल्यं च पंडितैरभिज्ञैः कल्पितं देयमित्यर्थः ॥ पशुताडनादौ याज्ञवल्क्यः ॥ दु
ःखे च शोणितोत्पादे शाखांगच्छेदने तथा ॥ दंडः क्षुद्रपशूनां तु द्विगुणः प्रभृतिक्रमात् ॥ लिंगस्य छेदने मृत्यौ म
ध्यमो मूल्यमेव च ॥ महापशुषु चैतेषु स्थानेषु द्विगुणो दमः ॥ वृक्षोपघाते मनुः ॥ वनस्पतीनां सर्वेषामुपभोगो

यथायथा। तथातथा दमः कार्यो हिंसायामिति धारणा॥ इति दंडपारुष्यः॥ अथ स्तेयं। तत्र उपयोगितया त्रिविधं
द्रव्यमाह नारदः। मृद्भांडासनखट्वास्थिदारुचर्मतृणादि यत्। शमीधान्यं कृतान्नं च क्षुद्रद्रव्यमुदाहृतं॥ वासः
कौशेयवर्जं च गोवर्जं पशवस्तथा। हिरण्यवर्जं लोहं च मध्यं व्रीहियवादि च॥ हिरण्यरत्नकौशेयं स्त्रीपुंगोगजवा
जिनः। देवब्राह्मणराज्ञां च विज्ञेयं द्रव्यमुत्तमं॥ तत्र प्रकाशतस्करानाह स एव। नैगमा वैद्यकितवास
भ्योत्कोचकवंचकाः। देवोत्पातदकराः शुभाशिल्पज्ञाः प्रतिरूपकाः॥ अक्रियाकारिणश्चैव मध्यमाकूटसाक्षिणः।
प्रकाशतस्करा ह्येते तथा कुहकजीविनः॥ स्मृत्यंतरेपि प्रकाशवंचकास्तत्र कूटमानतुलाश्रिता॥ उत्कोच
कासोपधिकाः वंचकाः पापयोषितः। प्रतिरूपकराश्चैव मंगलादेशवृत्तयः। इत्येवमादयो ज्ञेया ज्ञेयाः प्रकाश
तस्करा भुवि॥ बृहस्पतिः। प्रच्छाद्य दोषं कौव्यानि मिश्रपुनःसंस्कृत्य विक्रयी। पण्यं तद्विगुणं दाप्यो वणिगदत्वाच
तत्समं॥ अज्ञानौषधिमंत्रस्तु व्याधरत्नवित्। रोगिभ्योर्थं समादत्ते सदंड्यश्चोरवद्भिषक्॥ कूटाक्षदेविनः राम:
क्षुद्राराज्ञा नाव्यहराश्च ये। गणका वंचकाश्चैव दंड्या स्त्रे कितवाः स्वस्मृता। अन्यापवादिनः सम्यास्ते वै वो ।।५४५।।

त्कोचजीविनः। विश्वस्तवंचकाश्चैव निर्वास्याः सर्व एव ते॥ ज्योतिर्ज्ञानं तथोत्पातमविदित्वा लधान्नरणां॥ यं कु
नादि वपेद्युसुदि नेपास्ते प्रयत्नतः॥ वस्त्रालंकरणैर्युक्तं मात्मानं दर्शयंति ये॥ हिंसंति छद्मना न्नणां वध्या
स्ते राजपुरुषैः॥ स्वल्पमल्पं तु संस्कृत्य नयंति बहुमूल्यतां॥ ये चान्यकान्वंचयंति दंड्यास्ते पर्यनुसारतः॥ दे
मल्पं भवालानात्कृत्रिमानकुर्वंति ये। केतुर्मूल्यं प्रदाप्यास्ते राज्ञे च द्विगुणं दमं॥ मध्यस्थावंचका
सुश्चेदगलोक्तादि नाय दासाक्षिणश्चान्यथा ब्रूयुर्दाप्यास्ते द्विगुणं दमं॥ व्यासः। साधनाद्वंचितारन्वौयदिव
छन्नचारिणः। अविज्ञातनिवासाश्च ज्ञेयाः प्रच्छन्नतस्कराः॥ स एव। उत्क्षेपकासंधिभेत्तापांथमुष्णापिमो
चकाः। स्त्रीपुंगोश्वपशुस्तेयो चौरो नवविधः स्मृतः॥ संधिभित्त्यादि: याज्ञवल्क्यः। उत्क्षेपकग्रंथिभेदौ करसंदंश
हीनकौ कार्यौ द्वितीयापराधे करपादविहीनकौ॥ संदंशः तर्जन्यंगुष्ठौ॥ संधिं छित्वा तु ये चौर्यं रात्रौ कुर्वंति तस्कराः
।। तेषां छित्वा नृपो हस्तौ तीक्ष्णशूले निवेशयेत्॥ बृहस्पतिः। तथा पांथापमुषो वृक्षे गले बद्धावलंबयेत्॥
अंगुलीग्रंथिभेदस्य छेदयेत्प्रथमे ग्रहे॥ द्वितीये हस्तचरणौ तृतीये वधमर्हति॥ अंगुली तर्जन्यंगुष्ठौ॥ एवं गृहीत्वा चौर

व्य.म.
९५

पत्मापने विशेषमाह याज्ञवल्क्यः। गोचरे यस्य मुष्येत तेन चौरः प्रयत्नतः। ग्राह्यो दाप्योथ वा पदं यदि न निर्गतं
निर्गते तु पुनरेतस्मान्न चेदन्यत्र पातितं। पंचग्रामी बहिः क्रोशाद्दशग्राम्यथ वा पुनः। स्त्रीहरणे व्यासः। स्त्री
हर्त्ता लोहशयने दग्धव्यो वै कटाग्निना। नरहर्त्ता हस्तपादौ छित्वा स्थाप्यश्चतुष्पथे। नारदः। सर्वस्वं हरतो ना
रीं कन्यां हरतो वधः। वाजिवारणलोहानां चाददीत बृहस्पतिः। सर्वस्वमित्यनुषंगः। व्यासः। पशुहर्तुस्त्व
र्धपादं तीक्ष्णशस्त्रेण कर्त्तयेत्। महापशुस्तेनयतो दंडउत्तमसाहसं। मध्यमं मध्यमपशून् पूर्वं क्षुद्रपश्
न्स्यता। मनुः। धान्यं दशभ्यः कुंभेभ्यो हरतोभ्यधिके वधः। शेषेष्वेकादशगुणं दाप्यस्तस्य च तद्धनं। कुंभो विंशति
प्रस्थः। सराव सुवर्णानां चैव रत्नानां हरणे वधमर्हति। नारदः। सुवर्णरजतादीनां मुत्तमानां च वाससां रत्ना
नां चैव सर्वेषां शतादभ्यधिके वधः। मनुः। सुवर्णरजतादीनामुत्तमानां च वाससां। पंचाशतस्त्वभ्यधिके ह
स्तच्छेदनमिष्यते। शेषेष्वेकादशगुणं मूल्याद्दंडः प्रकल्प्यते। याज्ञवल्क्यः। संधिं छित्वा तु ये चौर्यं हत्वा स्वरा रामः
ज्ञाद्विप्रवासयेत्। मनुः। प्रायश्चित्तं च कुर्वाणाः पूर्वे वर्णा यथोदितं। नांक्या राज्ञा ललाटे तु दाप्यास्तूत्तमसाहसं ॥५९६॥

याज्ञवल्क्योपि। चौरं प्रदाप्यापहृतं घातयेद्विविधैर्वधैः। नारदः। भक्तावकाशदातारस्तेनानां ये प्रसर्पतां
शक्ताश्च ये उपेक्षंते ते ते पि तद्दोषभागिनः। तद्दंडभागिनश्च इति शेषः। अथ साहसं। तस्य स्वरूपं नारदेनोक्तं
सहसा क्रियते कर्म यत्किंचिद्बलदर्पितैः। तत्साहसमिति प्रोक्तं सहो बलमिहोच्यते इति बृहस्पति
ः मनुष्यमारणं चौर्यं परदाराभिमर्शनं। पारुष्यमनृतं चेति साहसं स्याच्चतुर्विधं। उभयं वाक्पारुष्यं चे
ति। नारदः। फलमूलोदकादीनां क्षेत्रोपकरणस्य च। भंगाक्षेपोपमर्दाद्यैः प्रथमं साहसं स्मृतं। वासः
पश्वन्नपानानां गृहोपकरणस्य च। एतेनैव प्रकारेण मध्यमं साहसं स्मृतं। व्यापादो विषशस्त्राद्यैः परदा
राभिमर्शनं। प्राणोपरोधि यच्चान्यदुक्तमुत्तमसाहसं। याज्ञवल्क्यः। वंदिग्राहांस्तथा वाजिकुंजराणां वि
हारिणः। प्रसह्यघातिनश्चैव शूलमारोपयेन्नृपः। बृहस्पतिः। प्रकाशघातकास्तु तथा चोपांशुघातकाः।
ज्ञात्वा सम्यक् धनं हृत्वा हंतव्या विविधैर्वधैरिति। बृहस्पतिः। एकस्य बहवो यत्र प्रहरंति रुषान्विताः।
मर्मप्रहारकारं तु घातकं तमुदाहृतं। कात्यायनः। आरंभकृत्सहायश्च तथा मार्गानुदेशकः। आश्रयः

व्य·म·
॥६६॥

स्वदानाच नक्रदाता विकर्मणां॥ युद्धोपदेशकश्चैव तद्विनाशप्रवर्त्तकाः॥ उपेक्षाकार्ययुक्ताश्च दोषेण ज्ञानुमो
दकाः॥ अनिषेधात्क्रमो यस्मात्सर्वेते कार्यकारिणः॥ यथाशक्त्यनुरूपं तु दंडमेषां प्रकल्पयेत्॥ विप्रस्य दंडे विषमा
ह॥ नारदः॥ अविशेषेण सर्वेषां एष दंडविधिः स्मृतः॥ वधादृते ब्राह्मणस्य न वधं ब्राह्मणोऽर्हति॥ शिरसो मुं
डनं दंडस्तस्य निर्वासनं पुरात्॥ ललाटे चाभिशस्तांकः प्रयाणं गर्दभेन चेति॥ आततायिन्यपि विप्रे न वध्यः नात
तायिवधे दोषोऽन्यत्र गोब्राह्मणादिति सुमंतूक्तेः॥ कात्यायनः॥ आततायिनि चोत्कृष्टे तपःस्वाध्यायसंयुते
वधस्तत्र तु नैव स्यात्पापे हीने वधो भृगुः॥ आततायिनमाह स एव॥ उद्यतासिर्विषाग्निश्च शापोद्यतकर
स्तथा॥ आथर्वणेन हंता च पिशुनश्चापि राजनि॥ भार्यातिक्रमकारी च रंध्रान्वेषणतत्परः॥ एवमाद्यान्वि
जानीयात्सर्वानेवाततायिनः॥ वसिष्ठोऽपि॥ अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः॥ क्षेत्रदारहरश्चैव षडे
ते ह्याततायिनः॥ यत्तु मनुः॥ गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतं॥ आततायिनमायांतं हन्यादेवाऽवि
चारयन्निति॥ यच्च कात्यायनः॥ आततायिनमायांतमपि वेदांतगं रणे॥ जिघांसंतं जिघांसीयान्न तेन ब्र रामः
॥५४७॥

ह्महा भवेदिति॥ तदपि शस्त्राद्यादशस्त्राद्यब्राह्मणभिन्नाततायिवधपरं॥ ब्राह्मणग्रहणं तु कैमुतिकन्यायार्थं॥ आ
ततायिब्राह्मणोऽपि वध्यः किमुतान्यमुतान्य इति मिताक्षरायां॥ उद्यम्य शस्त्रमायांतं भ्रूणम
प्याततायिनं॥ निहत्य भ्रूणहा न स्यादहत्वा भ्रूणहा न स्यादहत्वा भ्रूणहा भवेदिति स्वाध्यायिनं कुले
जातं यो हन्यादाततायिनं॥ अहत्वा भ्रूणहा स स्यादहत्वा भ्रूणहा भवेदिति बृहस्पत्युक्तेश्च तच्च वधार्थमागम
नाततायी ब्राह्मणोऽपि वध्य एव॥ क्षेत्रदारादिहरो ब्राह्मणो न वध्यः॥ क्षत्रियादिस्तु तादृशोऽपि वध्य एव॥ क्षे
त्रदारादिहरो ब्राह्मणो न वध्यः॥ क्षत्रियादिस्तु तादृशोऽपि वध्य इति चंद्रिकाशयः॥ युक्तश्चायमनुकल्पः यतः
गालववृहस्पतिवचसोस्तु वयोश्चेताततायिविशेषविषयासामान्यविषयो पूर्वोक्तिस्तु मंतुकात्यायनवचसोर्वा
धस्योचितत्वात्॥ यत्तु बृहस्पतिः॥ आततायिनमुत्कृष्टं वृत्तस्वाध्यायसंयुतं॥ यो हन्याद्वधप्राप्तं सोऽश्वमेधफलं
लभेदिति तदपि स्ववधे वृत्तमन्याततायिपरं॥ किंच॥ आततायिद्विजाग्र्याणां धर्मयुद्धेन हिंसनमिति कलौ
वधो व्रतस्याततायिनो विप्रस्य हननं निषिद्धं॥ तस्य विधितो प्राप्तेः कलौ निषिद्धं॥ तस्य विधितोऽप्राप्तेः कलौ निषिद्धं

व्य.म.

॥८७॥

तस्य विधितो ब्राह्मेकल्लौ निषेधो व्यर्थः स्यात् सर्वेषामपि कलिनिषेधानां विधिप्राप्तगोचरत्वस्य इमान् धर्मान् ध
र्मान्कलियुगे वर्ज्यानाहुर्मनीषिणः इति धर्मप्रस्तरे मेनसर्वे निबंधेषु व्यवस्थापितस्यात् ॥ अजः कलौ स्ववधो
द्यतोप्याततायिनि विप्रो न वध्यः । युगांतरे तु वध्य एव । अत एव त्वाततायिविप्रः सर्वेष्वपि युगेषु वध्यः । क्षत्रियादि
स्त्वाततायि सर्वोपि सर्वयुगेषु वध्य इति दिक् ॥ हीनमध्योत्तमद्रव्यहरणे दंडमाह बृहस्पतिः क्षेत्रोपकर
णं चैव पुष्पमूलफलानि च । विनाशयन् हरेन् दंड्यः शतनाद्यमनुपतः ॥ पशुवस्त्रान्नपानानि गृहोपकरणं त
था । हिंसन्सन् चोरयन् चोरयन्मध्यमो द्विशत्यो द्विशताद्यं दमं तथा । स्त्रीपुंसोर्हेमरत्नानि देवविप्रधनं तथा ॥
पौषेयं चोत्तमद्रव्यमेषां मूल्यसमो दमः । द्विगुणो वा कल्पनीय पुरुषापेक्षया न्वपेः । हर्त्तुर्वा घातनं नयस्मात्प्रसं
गविनिवृत्तये । पौषास्त्रीधने । वाद्य एव वा पौ । अत्र विनाशयन्हर्तेति पंक्तः स्वरसात्साहसविषयवेतत्वचइ तिमद राम:
न । साहसप्रयोजकस्य दंडमाह याज्ञवल्क्यः । यः साहसं कारयति स दाप्यो द्विगुणं दमं । यश्चैवमुक्त्वाहं दाता ॥५४८॥
कारयत्स चतुर्गुणं दैगुण्यात्तुर्गुणो मा ज्ञात्वा तद्दंडापेक्षया । विप्रांत्र्वला जच्छतो दंडमाह मनुः । सहस्रं ब्राह्मणो

दंड्यो विप्रां गुप्तां बलाद्व्रजन् । तादृग्रूपं विप्रायां क्षत्रियाद्यस्तु बृहस्पतिराह । साहसाकामये घस्तु धनेनैतस्या
ऽविलं हरेत् उत्कृत्य लिंगवृषणौ ग्रामयेत् खरेण तु । कामयेत्परपत्नीं गच्छेत् । क्षत्रियादीनामुत्तमानां च ब
लात्सजातीयपरनार्यागमने दंडमाह कात्यायनः । स्त्रीकृत्वोपभोगः स्यात् समद्युपुरुषायदा । वधेत्तत्र प्रवर्त्तु
कार्यातिक्रमणं हि तत्र सू एव । अनीच्छंतियो तु स्कागुप्तां तावासयेदृहे । मलिनां गीमधः शय्यापिंडमात्रोप
जीविनीं स एव । हीनवर्णीय तु स्कावात्याज्या वधाप्यवान वेत् । वधस्त्विच्छंतीबोध्य हीनमध्योत्तमसाहसेषु
दंडमाह नारदः । तस्य दंडः क्रियापेक्षः प्रथमस्य शतावरः मध्यमस्य च शास्त्रज्ञैर्दृष्टः पंचशतावरः । उत्तमे साह
से दंडः सहस्रावर इष्यते । वधः सर्वस्वहरणं पुरान्निर्वासनांकने । तदंगच्छेद इत्युक्तो दंड उत्तमसाहसः इति व
धच्छेनाकपदेवास्तकराजानं प्रतितान्यस्य तस्येव दंडकरणेऽधिकारात् । इति साहसं । अथ स्त्रीसंग्रहणं । बा
बलात्परनार्यागमनस्य साहसत्वात्पूर्वमेव दंड उक्तः । छलेन सजातीयपरनार्यागमने त्वाह बृहस्पतिः । छ
मनाकारयेद्यस्तु तस्य सर्वहरो दमः । अंकयित्वा भगांकेन पुरान्निर्वासयेत्ततः । सर्वहरः सर्वस्वहरः । अयं च

दंडमसमायो हीनायामेव दर्द्धं ॥ उत्तमायां वधः ॥ तथा च स एव ॥ दमोनत्य समायां च हीनायामर्द्धिकस्ततः ॥ पुंसः कार्यो
तु गमने संप्रमापणं ॥ हीनमध्योत्तमत्रिविधस्त्रीसंग्रहणे दंडमाह स एव ॥ त्रयाणामपि चैतेषां प्रथमो मध्य उत्त
म विनयः कल्पनीयस्तान्मध्यमो पि बलात् इह ॥ छद्मेनस्य परस्त्रिया सह संजल्पने दंडमाह मनुः ॥ परस्य पत्न्या
पुरुषः संभाषां योजयेद्रहः ॥ पूर्वमाक्षारितो दोषैः प्राप्नुयात्पूर्वसाहसं ॥ पित्रादिभिर्निवारितयोः स्त्रीपुंसोः सं
भाषणे दंडमाह याज्ञवल्क्यः ॥ स्त्रीनिषेधे शतं दद्यात् द्विशतं तु दमं पुमान् ॥ प्रतिषेधे तयोर्दंडो यथा संग्रहणे त
था ॥ प्रत्येकनिषेधविषयं पूर्वमर्धं ॥ उभयनिषेधे उत्तरार्धं ॥ उभयोरनुरागकृते संयोगे दंडमाह याज्ञवल्क्यः ॥
सजातावुत्तमो दंड आनुलोम्ये तु मध्यमः ॥ प्रातिलोम्ये वधः पुंसो नार्याः कर्णादिकर्तनं ॥ कात्यायनः ॥ सर्वेषु चापराधे
षु पुंसो योर्थः दमः स्मृतः ॥ तदर्द्धं योषितो दद्युर्वधे पुंसोंगकर्तनं ॥ व्यभिचरितविप्रागमने तु मनुः ॥ शतानि पं
च दंड्यः स्यादिच्छंत्यास्सह संगमे ॥ इदं सजातीयापरं ॥ व्यभिचरितास्वनुलोमानुगमने स एव ॥ अगुप्ते वैश्यरा
जन्ये शूद्रां वा ब्राह्मणो व्रजन् ॥ शतानि पंच दंड्यः स्यात्सहस्रं त्वंत्यजस्त्रियमिति ॥ यत्तु सहस्रं ब्राह्मणो दाप्यो

गुप्तेविटक्षत्रिये व्रजन् इति तत्साध्वीपरं ॥ शूद्रस्य प्रातिलोम्येन गमने दंडमाह मनुः ॥ शूद्रो गुप्तमगुप्तं वा द्वैजा
तं वर्णमावसन् ॥ अगुप्तमंगसर्वस्वैर्गुप्तं सर्वेण हीयते ॥ शूद्रो अगुप्तां द्विजां गच्छन् लिंगछेदनं सर्वस्वहर
णं चार्हति ॥ गुप्तां तु गच्छन् सर्वस्वहरणं वधं चार्हतीत्यर्थः ॥ गौतमः ॥ आर्यस्त्र्यभिगमने लिंगोद्धारः सर्वस्व
हरणं च गुप्ता चेद्वधोधिक इति ॥ मनुः ॥ ब्राह्मणीं तु यदा गुप्तां गच्छेतां वैश्यपार्थिवौ ॥ वैश्यं पंचशतं कुर्यात्क्ष
त्रियं तु सहस्त्रियं ॥ स एव ॥ उभावपि हि तावेव ब्राह्मण्या गुप्तया सह ॥ विप्लुतौ शूद्रवद्दंड्यौ दग्धव्यौ वा कटाग्निना
स एव ॥ वैश्यश्चेत्क्षत्रियां गुप्तां वैश्यां वा क्षत्रियो व्रजेत् ॥ यो ब्राह्मण्यामगुप्तायां तावुभौ दंडमर्हतः ॥ अगुप्तां वै
श्यां वा क्षत्रियो व्रजेत् ॥ यो ब्राह्मण्यामगुप्तायां तावुभौ दंडमर्हतः ॥ अगुप्ताब्राह्मणीगमने यो दंडः स इत्यर्थः ॥ वसि
ष्ठः ॥ राजन्यश्चेद्ब्राह्मणीमभिगच्छेच्छरपत्रैर्वेष्टयित्वा राजन्यमग्नौ प्रास्येदेवं वैश्यो राजन्यायां मैथुनमाचरन्
शूद्रस्तु राजन्यवैश्ययोरिति ॥ नारदः ॥ एवं मातृसमा माता मातुलानी पितृष्वसा ॥ पितृव्यसखिशिष्यस्त्री भगि
नी सखी स्नुषा ॥ दुहिताचार्यभार्या च सगोत्रा शरणागता ॥ राज्ञी प्रव्रजिता धात्री साध्वी वर्णोत्तमा च या ॥ आसा

व्य॰म॰ न्यतमां गच्छन् गुरुतल्पग उच्यते। शिश्नस्योत्कर्तनात्तत्र नान्यो दंडो विधीयते याज्ञवल्क्योपि। पितुः स्वसारं मा
॥८५॥ तुश्च मातुलानीं स्नुषामपि। मातुः सपत्नीं भगिनीमाचार्यतनयां तथा। आचार्यपत्नीं तनयां गच्छंस्तु गुरुतल्पगः
छित्वा लिंगं वधस्तस्य सकामायाः स्त्रिया अपि। अयं च दंडो न ब्राह्मणस्य। परदाराभिमर्शेषु प्रवृत्तान्नॄन्महीप
तिः। उद्वेजनकरैर्दंडैश्छिन्नयित्वा प्रवासयेत्। अब्राह्मणः संग्रहे प्राणांतं वधमर्हतीति ब्राह्मणाधिकारे बृह
स्पतिवचनात्। शंखलिखितौ। येन येनांगेनापराधं कुर्यात्तत्तदस्य छेत्तव्यमन्यत्र ब्राह्मणात्। ब्राह्मणं दास्या
दिगमने दंडमाह याज्ञवल्क्यः। अवरुद्धासु दासीषु भुजिष्यासु तथैव च। गम्यास्वपि पुमान्दाप्यः पंचाशत्
पणिकं दमं। अवरुद्धाः स्वामिना पुरुषांतरं प्रतिगंतुं निषिद्धाः। नारदः। स्वैरिण्यब्राह्मणी वेश्या दासी निष्कासनि
ष्कासिनी च या। गम्याः स्युरानुलोम्येन स्त्रियो न प्रतिलोमतः। आस्वेव तु भुजिष्यासु दोषः स्यात्परदारवत्। अ
ब्राह्मणीति स्वैरिणीति स्वैरिणीविशेषणं। स्वैरिणी स्वतंत्रा पुंश्चली। निष्कासिनी कुटुंबान्निर्गता पुंश्चली। या रामः
ज्ञवल्क्यः। अंत्याभिगमने त्वंक्यः कबंधेन प्रवासयेत्। शूद्रस्तथांत्य एव स्यार्यागमे वधः। स्त्रीकृते संग्रहणे ॥५५०॥

तस्या दंडमाह। गृहमागतया नार्या प्रलोभ्य स्पर्शनादिना। कामयेत्तत्र सा दंड्या नरस्यार्द्धः दमः स्मृतः। ब्राह्मण
णादीनां शूद्रादिगमने दंडमाह बृहस्पतिः। वृषलीं सेवते यस्तु ब्राह्मणो मदमोहितः। तां च निर्वासयेद्राजा संस्थाने वध
घातिनां। वैश्यं वा क्षत्रियं वापि ब्राह्मणी सेवते तु या। शिरसो मुंडनं तस्याः श्यारणं गर्दभेन तु। वृषलः शूद्रः। वध
तिनः सौनिकाः तेषां स्थान इत्यर्थः। अयं च दंडोऽत्यासक्तावितिचंद्रिकायां। अभिचारनिश्चयोपायमाह। याज्ञ
वल्क्यः। पुमान्संग्रहणे ग्राह्यः केशाकेशि परस्त्रिया। सद्यो वा कामजैश्चिह्नैः प्रतिपत्तौ द्वयोस्तथा। द्वयोरित्यनेनान्य
तरेण प्रतिपन्नेपि व्यभिचारनिश्चय। दूषणमाह याज्ञवल्क्यः। शतं स्त्रीदूषणे दद्याद्द्वे तु मिथ्याभिशंसने। पशून्ग
च्छन्शतं दाप्यो हीनां स्त्रीं चैव मध्यममिति। तथा। अयोनौ गच्छतो योषां पुरुषं चाभिमेहतः। चतुर्विंशतिको दंडस्त
था प्रव्रजितागमे। हीनां दुःखितां स्वपत्नीमपि। स्त्रीसंमुखं पुरीषादि कुर्वत इत्यर्थः। इति स्त्रीसंग्रहणं। अथ स्त्री
पुंधर्माः। आज्ञासंपादिनीं दक्षां वीरसूं प्रियवादिनीं। त्यजन्दाप्यस्तृतीयांशमद्रव्यो भरणं स्त्रियाः। स्त्रियं प्रत्या
हस एव स्त्रीभिर्भर्तृवचः कार्यमेष धर्मः परः स्त्रियाः। आशुद्धेः संप्रतीक्ष्यो हि महापातकदूषितः। इति स्त्रीपुंधर्म

॥ ॥अथ द्यूतं॥ ॥याज्ञवल्क्यः॥ ॥ग्रामेन्नृपतिना भागे प्रसिद्धे धूर्तमंडले। जितं ससभिके स्थाने दापयेदन्य
थानतु। प्रसिद्धे अप्रछिन्ने। द्यूतमंडले द्यूतस्थले सभिको राज्ञा कृतो द्यूताध्यक्षः। एवं प्रकारेण जितं राजा दा
पयेन्नान्यथेत्यर्थः। द्यूते कपटकर्तुर्दंडमाह स एव। राज्ञा सचिह्नं निर्वास्याः कूटाक्षोपधिदेविनः। उपधिछलं
राजाज्ञेविद्यूते दंडमाह मनुः। द्यूतं समाह्वयं चैव यः कुर्यात्कारयेत वा। सर्वांस्तान्घातयेद्राजा शूद्रांश्च द्विजलिंगि
नः। द्विजलिंगमुपवीतवेदपाठादि। द्यूतधर्मं समाह्वये तिदिशति याज्ञवल्क्यः। एष एव विधिर्ज्ञेयः प्राणि
द्यूते समाह्वये। प्राणिद्यूतं समाह्वय विशेषणं तदभिन्नमित्यर्थः। इति द्यूतसमाह्वयप्रश्नः। अथ प्रकीर्णकं
॥ ॥याज्ञवल्क्यः॥ ॥ऊनं वाप्यधिकं वापि लिखेद्यो राजशासनं। पारदारिकचौरं वा मुंचतो दंड उत्त
मः। अभक्ष्येण द्विजं दूष्य दंड्य उत्तमसाहसं। मध्यमं क्षत्रियं वैश्यं प्रथमं शूद्रमर्धिकं। अभक्ष्यं सुरालशुनपुरी
षादि। सत्व। कूटस्वर्णव्यवहारी विमांसस्य च विक्रयी। अंगहीनस्तु कर्तव्यो दाप्यश्चोत्तमसाहसं। वि राम:
मांसं गवादिमांसं। चराष्टेनां गच्छेदमयातिताश्वरायां शाक्तो द्यमो दापन्नार्थं दंडप्रिणं शृंगिणां तथा। प्रथ ॥५५१॥

मं साहसं दंड्यो विक्रेता द्विगुणं तथा। विक्रेता स्तन्मनुः। मनुष्यमारणाक्षिप्रं चौरवत्किल्विषं भवेत्। प्राणि
चर्मसु महत्स्वर्द्ध गोगजोष्ट्रहयादिषु। क्षुद्रकाणां पशूनां तु हिंसं मंद्विशतो दमः। पंचाशत्तु भवेद्दंडः शुभेषु मृग
पक्षिषु गर्दभाजाविकानां तु दंडः स्यात्पंचमाषकः। माषकस्तु भवेद्दंडः श्वशूकरनिपातनइति। अपंचेहतम
न्यदानोत्तरबोध्यः। याज्ञवल्क्यः। जारचौरेत्यभिवदन्दाप्यः पंचाशतं दमं। उपजीव्य धनं मुंचन्स्तदेवाष्टगुणं।
स्मृतं। उपजीव्यगृहीत्वा। राज्ञो निष्टप्रवक्तारं तस्यैवाक्रोशकारिणं तन्मंत्रस्य च भेत्तारं जिह्वां छित्वा प्रवासयेत्।
अनिष्टं मरणादिप्राक्रोशस्तत्र राज्यम्भ्रांशो भवत्वित्यादि। मनुः। राज्ञः कोशापहर्तृंश्च प्रतिकूलेषु च स्थितान्।
घातयेद्विविधैर्दंडैः अरीणां चोपजापकं। याज्ञवल्क्यः। मृतांगलग्नविक्रेतुर्गुरोस्ताडयितुस्तथा। राज्ञानसमारो
हुर्दंडउत्तमसाहसं। मृतांगलग्नं मृतकवस्त्रादि स एव। द्विनेत्रभेदिनो राजद्विष्टादेशकृतस्तथा। विप्रत्वेनच शू
द्रस्य जीवतोष्टशतो दमः। नेत्रद्वयभेत्तुः राजनिषिद्धकर्मकर्तुर्विप्रत्वमाजीवितुः शूद्रस्येत्यर्थः। आद्ये भोजनेतुय

ज्ञोपवीतधारणेन प्रयत्नात्कथायज्ञोपवीतवज्जेरवाकार्येति मिताक्षरायां॥ व्यवहारान्यथाकारिणां दंडमाह स एव
दुर्दृष्टांस्तु पुनर्दृष्ट्वा व्यवहारान्नृपेण तु॥ सभ्याः सजनयिनो दंड्या विवादाद्विगुणं दमं॥ यो मन्यताजितोस्मीति न्यायेनापि
पराजितः। तमायांतं पुनर्जित्वा दापयेद्विगुणं दमं॥ अत्र सर्वत्रानुक्तसंख्यायां संख्या पणविषयिणी ज्ञेया॥ पणस्तु
कर्षोन्मितं ताम्रं कार्षिकस्तु मितं ताम्रं कार्षिकस्ताम्रिकः कर्षपणश्चतुर्थो द्वाः॥ वराटकानां दशकद्वयं च ताः काकिणी
ताश्च पणश्चतस्र इति भास्कराचार्योक्तश्च पणः॥ उत्तममध्यमसाहसादिकं तु साराणीति पणसाहस्रो दंड उत्तमसाहसः॥
तदर्द्धं मध्यमः प्रोक्तस्तदर्द्धमधमः स्मृत इति॥ तथापराधे शुल्कपनिमाणं दंडैर्दमनासंभवे धिकोपि दंडः॥ यथा
हापस्तंबः दंडैर्दमनादित्याह स्तेनादीनां न दमयेदिति॥ तथा सर्वस्वापहारदंडे विशेषमाह नारदः॥ अप्युधान्यायु
धान्युयुधीनां वाद्यादीन्याश्चजीविनां॥ वेश्यपास्त्रीणामजंकानूवाद्या दितद्विदां॥ यच्च यस्योपकरणं येन जीवति
कारुकाः सर्वस्वहरणेप्येतन्न राजा हर्तुमर्हति॥ अमायाद्यपहानस्य दंडस्य प्रतिपत्तिमाह याज्ञवल्क्यः॥ राजा॥

न्यायेन यो दंडो गृहीतो वरुणाय तं॥ निवेद्य दद्याद्विप्रेभ्यः स्वयं त्रिंशद्गुणीकृतं॥ त्रिंशद्गुणो दंडो न संकल्प्य वि
प्रेभ्यो दद्यादित्यर्थः॥ ॥इति श्री सेंगर वंशावतंस महाराजाधिराज श्री भगवंतदेवादिष्ट श्रीजगद्गुरुभ
ट्टनारायणसूरिसूनु पंडितशिरोरत्न मीमांसापारावारपारीण धुरीण भट्टशंकरसूनो र्भट्टनीलकंठस्य कृ
तौ भगवद्भास्करे व्यवहारमयूखः संपूर्णम्॥ मंगलं लेखकानां च पाठकानां च मंगलं॥ मंगलं सर्वलोकानां भू
मिभूपति मंगलं॥ १॥ लेखकपाठकयोः शुभं भवतु॥ कल्याणमस्तु॥ ॥श्रीरामः॥ ॥श्रीरविर्जयति॥

व्य·म·
।।९२।।

राम:
।।५५३।।